वर्षम्-६

संस्कृतदिवसविशेषाङ्कः

ISSN : 975-2676

अङ्काः-२१-२४

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५११५-१६ वैक्रमाब्दः २०७०-७१ आषाढ-कृष्ण ९ - आषाढ-शुक्ल ३ शकः १९३५-३६ जुलाई, २०१३ - जून, २०१४

## स्वागतं नूतनाभ्यः कुलाध्यक्षाभ्यः



२३ मार्च, १९७६ दिनाङ्के नवदेहल्यां जनिं प्राप्तवत्यः श्रीमत्यः स्मृति-जुबिन-ईरानी-महोदयाः देशस्य अत्यन्तं सक्रियाः राजनीतिज्ञाः वर्तन्ते। इमाः 'भारतीय-जनता-पार्टी' इत्यस्य दलस्य सुप्रतिष्ठिता महिला-नेत्र्यः सन्ति। मूलतः इमाः कला-क्षेत्रेण सम्बद्धाः वर्तन्ते। सर्वैरेव ज्ञायते खलु यत् इमाः भारतीय-चलचित्राभिनेत्र्यो वर्तन्ते इति। चलचित्र-क्षेत्रे इमाः अतीव प्रतिष्ठापूर्णं कार्यमकुर्वन्। तत्र इमाः नैकान् पुरस्कारान् सम्मानानि च प्राप्तवत्यः।

२००४ तमे वर्षे एव एताः भाजपा-दलस्य महाराष्ट्र-युव-पक्षस्य उपाध्यक्षत्वेन नियोजिताः जाताः। भाजपा-दलेन पञ्चवारम् इमा केन्द्रीय-समितेः कार्यकारि-सदस्यरूपेण मनोनीताः। इमा भाजपा-दलस्य राष्ट्रिय-सचिवत्वेनापि नियुक्ता अभवन्। २०१० तमे वर्षे इमा 'भाजपा-महिला-मोर्चा' इत्यस्य राष्ट्रियाध्यक्षत्वेन नियुक्ताः। २०११ तमे वर्षे इमाः गुजरातेभ्यः राज्य-सभायाः सांसदत्वेन नियुक्ताः। एतासां राजनीतौ महत्त्वपूर्णं योगदानं निमित्तीकृत्य नवनिर्वाचित-सर्वकारे मानव-संसाधन-विकास-मन्त्रि-रूपेण कार्यभारः प्रदत्तो वर्तते।

२७ मई, २०१४ दिनाङ्के भारत-शासने इमाः मानव-संसाधन-विकास-मन्त्रित्वेन कार्यभारं ग्रहीतवत्यः। तदनुसारेण एताः राष्ट्रिय-संस्कृत-संस्थानस्य पदेन कुलाध्यक्षाः वर्तन्ते। अस्माकं नूतनाभ्यः कुलाध्यक्षाभ्यः सुस्वागतम्।

## कुलपतिवाक्

संस्कृतवार्तायाः प्रकृताङ्कस्य प्रकाशनं प्रायशः एकवर्षानन्तरं भवति। अस्याः पूर्वाङ्कः गतवर्षस्य संस्कृतसप्ताहोत्सवावसरे लोकायाऽर्पितोऽभूत्। अस्मिन्नन्तराले राष्ट्रियसंस्कृतसंस्थानेन नैके कार्यक्रमाः अनुष्ठिताः। तेषु राष्ट्रियसंस्कृतसम्मेलनं कौमुदीमहोत्सवः युवमहोत्सवः अखिलभारतीया शास्त्रीयस्पर्धा संस्कृतशिक्षकप्रशिक्षणवर्गः तथा च प्रतिपरिसरं विविधलोकोपयोगिविषयान् समाश्रित्य समायोजिताः राष्ट्रियाः सङ्गोष्ठ्यः मुख्यभूताः सन्ति। कार्यक्रमैरेतैः निश्चप्रचमेव सुरसरस्वत्या हृदि निखातानि नैकानि अज्ञाततत्त्वानि प्रकाशितानि सञ्जातानि।



संस्कृतभाषा यथा चिरपुरातनी तथैव नवनवाभिः सम्भावनाभिः संवलिता। अस्यां हि लोकोपयोगीनि बहूनि तत्त्वानि विलसन्तीति तेषामनुसन्धाने प्रचारणे प्रसारणे च राष्ट्रियसंस्कृतसंस्थानं विद्यते दत्तावधानम्। संस्कृतसप्ताहोत्सवस्याप्येतदेव प्रयोजनं यदस्मिन् पवित्रे दिवसे सर्वेऽपि वयमेकीभूय संस्कृतभाषायामन्तर्निहितानि युगानुसारीणि तत्त्वानि विमृशामः। तांश्च लोकोपकृत्यै समर्पयामः। संस्कृतवार्ताया अयमभिनवाङ्कुरस्तादृशसम्भावनानां सम्प्रेषणे सफलो भविष्यतीति मे दृढो विश्वासः।

वस्तुतः अयं संस्कृतभाषायाः तस्याः साहित्यस्य च समुत्कर्षस्य कालः। भारतसर्वकारेण संस्कृतस्य विकासाय नैके समुपक्रमाः सङ्कल्पिताः सन्ति। राष्ट्रियसंस्कृतसंस्थानमाध्यमेन ते सर्वेऽपि समुपक्रमाः क्रियान्विता भवन्ति। अद्य भारतस्य ग्रामे ग्रामे नगरे नगरे संस्कृतस्य अपूर्वः कश्चन प्रचारो दृश्यते। सुदूरे देशस्य पूर्वोत्तराञ्चलेऽपि जनाः संस्कृतपिपठिषवः समवलोक्यन्त इति अनौपचारिकसंस्कृतशिक्षणमाध्यमेन तादृशप्रयासं विधातुं राष्ट्रियसंस्कृतसंस्थानस्य सर्वेऽपि प्राध्यापका अधिकारिणः कर्मचारिणश्च मया साधुवादैः पुरस्क्रियन्ते।

राष्ट्रियसंस्कृतसंस्थानं सम्प्रति श्रीमत्याः स्मृति-जुबिन्-ईरानी-महाशयाया कुलाध्यक्ष्ये अग्रे सरति। ताभिः संस्कृतसप्ताहसमायोजनमिषेण संस्कृतभाषायाः प्रचाराय यो हि पन्थाः प्रवर्तितः यश्च स्वीयः शिवसङ्कल्पः प्रतिविद्यालयं प्रतिविश्वविद्यालयं प्रतिसंस्थानं प्रति च प्रेषितस्तदतीव हर्षनिर्भरमानसेन अभिनन्दति राष्ट्रियसंस्कृतसंस्थानम्। वर्धापनाततिभिश्च ताः सर्वदा सर्वतोभावेन सम्भावयति। तासां मार्गदर्शनेन सत्सङ्कल्पेन च सुरभारतीकल्पलतेयं नवनवैः किसलयपल्लवैः निखिलेऽपि भूमण्डले प्रसरेदिति च कामयते।

संस्कृतसेवातत्पराः विद्वांसः अनूचानाः अस्माकं शिष्याः अन्ये च संस्कृतानुरागिणो जनाः संस्कृतदिवसोत्सवेऽस्मिन् शुभकामनासुमनोऽञ्जलिभिः सादरं सभाज्यन्त इत्यलम्।

*-आर.पी. सिसोदिया*

**मुख्यपरामर्शदाता**

श्री आर.पी. सिसोदिया

कुलपतिः (प्र.)

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**

डा. बिनोदकुमारसिंहः

डा. रत्नमोहनझाः

कू. वेङ्कटेशमूर्तिः

**सम्पादकौ**

आचार्यः रमाकान्तपाण्डेयः

डा. प्रफुल्लगडपालः


'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायं, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

संस्थानस्य जालपुटेऽपि संस्कृतवार्ता दृष्टुं शक्यते-
**www.sanskrit.nic.in**


# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

**ISSN : 975-2676**

प्रकाशकः

**कुलसचिवः**

**राष्ट्रियसंस्कृतसंस्थानम्**

(राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितः, भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058

011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in

website : www.sanskrit.nic.in




## कौशलवर्धिनीपाठ्यक्रमः सम्पन्नः

२२.०१.२०१४ तः ०९.०४.२०१४ पर्यन्तं संस्थानमुख्यालये इण्डोनेशियादेशतः समागतानां षण्णां विदुषां कृते कौशलवर्धिनी-नामकः कश्चन पाठ्यक्रमः आयोजितः। पाठ्यक्रमेऽस्मिन् इण्डोनेशियादेशे विभिन्नविश्वविद्यालये विविधविषयकाः षडध्यापकाः संस्कृतस्य प्राथमिकं ज्ञानं प्राप्तवन्तः। पाठ्यक्रमाङ्गतया ऐच्छिकविषयरूपेण आयुर्वेदसिद्धान्त-परिचयः, भारतीयशिक्षाप्रणाली, नीतिशास्त्रम् - इत्यादिविषयेषु अपि कक्षाः आयोजिताः।

भारतीयसंस्कृतेः प्रत्यक्षदर्शनं स्यादिति धिया तेषां कृते शैक्षणिकयात्रायाः आयोजनमपि कृतमासीत्। शैक्षणिक-यात्रायां तैः भोपाल-साञ्ची-भीमबेटका-उज्जयिनी-जयपुर-पुष्कर-कुरुक्षेत्र-हरिद्वारादिपुण्यक्षेत्राणां दर्शनं कृतम्। यात्रायाः संयोजनं डा. प्रफुल्ल-गडपालोऽकरोत्।



इण्डोनेशियाच्छात्राणां सौप्रस्थानिककार्यक्रमस्य दृश्यम्

पाठ्यक्रमस्य सम्पूर्तिसत्रे संस्थानकुलपतिः (प्र.) डा. कण्णन् सभाध्यक्ष-रूपेण इण्डोनेशियादूतावासतः समागतः शिक्षासहचारी डा. सॉन कुसवादीमुख्यातिथि-रूपेण, ज.रा.रा.सं.विश्वविद्यालय कुलपतिः प्रो. रामानुजदेवनाथमहोदयः सारस्वतिथिरूपेण च अन्वगृह्णन्। मुक्तस्वाध्यायपीठनिदेशकः प्रो. रमाकान्तपाण्डेयः, संस्थानकुलसचिवः डा. बिनोदकुमारसिंहः कार्यक्रमसंयोजकः कू.वे. मूर्तिः, अन्ये संस्थानसदस्याश्च सत्रेऽस्मिन् समुपस्थिता आसन्।



साञ्च्याः शैक्षणिकयात्रायाः चित्रमेकम्


आयुष-संस्थाने शिक्षणस्य किञ्चन दृश्यम्

## आचार्यः सर्वनारायणझाः मुख्यालये स्थानान्तरितः



राष्ट्रिय-संस्कृत-संस्थानस्य गङ्गानाथझापरिसरस्य प्राचार्यः श्रीमान् सर्वनारायणझाः मुख्यालये स्थानान्तरितः। विदुषोऽस्य शास्त्रेषु प्रशासने च समं प्रागल्भ्यं समवलोक्य संस्थानस्य आदर्शयोजना प्रकाशनयोजना शोधयोजना छात्रवृत्ति-योजनेति विविधा योजनाः अस्य निर्देशने प्रचाल्यन्ते। संस्थानमुख्यालये झामहोदयस्य स्वागतम्।

## ५२तमी अखिलभारतीयशास्त्रीयस्पर्धा समायोजिता




अखिलभारतीयशास्त्रीयस्पर्धायाः उद्घाटनसत्रस्य एकं दृश्यम्

राष्ट्रियसंस्कृतसंस्थानेन संस्कृतविद्यायाः दृढीकरणाय शास्त्रपरम्परायाः संरक्षणार्थं च प्रतिवर्षम् अखिलभारतस्तरे शास्त्रीयस्पर्धाः आयोज्यन्ते। अस्मिन्नेव क्रमे वर्षेऽस्मिन् ५२तमी अखिलभारतशास्त्रीयस्पर्धा-कार्यक्रमो मध्यप्रदेशे भोपालस्थे परिसरे २५.०२.२०१४ तः २८.०२.२०१४ पर्यन्तं समायोजितः। अस्मिन्नेव अवसरे षष्ठः अखिलभारतीय-संस्कृत-नाट्यमहोत्सवः अपि परिसरे एव आयोजितः। कार्यक्रमस्यास्य उद्घाटनसत्रं २५.०२.१४ दिनाङ्के समायोजितमासीत्, यत्र मुख्यातिथिरूपेण मध्यप्रदेशस्य राज्यपालो महामहिमशाली श्रीरामनरेश-यादवः समुपस्थितः। अवसरेऽस्मिन् विशिष्टातिथित्वेन प्रो. प्रह्लादाचार्यः, सारस्वतातिथित्वेन प्रो. राधावल्लभत्रिपाठी सम्मानितातिथित्वेन च श्री अनिल आहूजा समुपस्थिताः आसन्। कार्यक्रमस्यास्य आध्यक्ष्यं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. एन.आर. कण्णन् अकरोत्। परिसरप्राचार्यः प्रो. आजादमिश्रः अत्र स्वागतवचांसि व्याहरत्। अस्मिन्नेवावसरे परिसरे नवनिर्मितस्य दाक्षीकन्याच्छात्रावासस्य लोकर्पणमपि सञ्जातम्।



दाक्षी-छात्रावासं समुद्घाटयन् कुलपतिः

अखिलभारतशास्त्रीयस्पर्धासु एतासु राज्यस्तरीयस्तरे चिताः २० राज्येभ्यः समागताः २८१ प्रतिभागिनः सम्मिलिताः अभूवन्। अष्टसु विषयेषु भाषणस्पर्धाः, अष्टसु शास्त्रेषु शलाकापरीक्षा, तिस्रः कण्ठपाठस्पर्धाः, शास्त्रार्थविचारः, समस्यापूर्तिः अक्षरश्लोकी चेत्याहत्य २२ स्पर्धाः अत्र प्रावर्तन्त। प्रत्येकं स्पर्धासु विजयिनः प्रथम-द्वितीय-तृतीयपुरस्काररूपेण स्वर्ण-रजत-कांस्यपदकानि प्राप्तवन्तः। सर्वस्पर्धासु आहत्य सर्वाधिकाङ्कान् प्राप्य कर्णाटकस्य स्पर्धालुगणः विजयवैजयन्तीभाग् अभूत्। नाट्यमहोत्सवाङ्गतया संस्कृतनाटकानां मञ्चनमपि जातम्। भोपालपरिसरस्य नाट्यशास्त्रानुसन्धानकेन्द्रेण अवसरेऽस्मिन् 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य मञ्चनं विहितम्। परिसरच्छात्रैः 'वृषभानुजा', स्वर्णवल्लीस्थ-राजराजेश्वरीसंस्कृतपाठशालायाः आचार्येण शङ्करभट्टेन हरिकथा, उत्कलस्य श्रीगदाधरदासदलेन 'पाला', रुद्रपुरस्थ-गुरुनानक-विद्यालयबालिकाभिः गणेशवन्दना – इत्येते कार्यक्रमाः प्रस्तुताः।



अक्षरश्लोकीस्पर्धायाः दृश्यमेकम्

अस्य दिनचतुष्टयव्यापिकार्यक्रमस्य समापनसत्रं २८.०२.१४ दिनाङ्के अपराह्णे सम्पन्नम्। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन अनन्तश्रीविभूषितः स्वामिपादः वासुदेवाचार्यः 'विद्याभास्करः' दिव्यसन्देशेन छात्रानन्वगृह्णात्। तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिः प्रो. हरेकृष्णशतपथी सारस्वतातिथिरूपेण अथ च डा. श्यामशङ्करोपाध्यायः विशिष्टातिथिरूपेण समुपस्थितौ। आध्यक्ष्यं संस्थानकुलपतिना प्रो. एन.आर्. कण्णन्वर्येण विहितम्। अवसरेऽस्मिन् इण्डोनेशियादेशतः केचन विद्वांसोऽपि प्राप्ताः। निश्चप्रचमेव एतादृशस्पर्धानाम् आयोजनेन संस्कृतच्छात्राः युवविद्वांसो वा स्वीयं शास्त्रपाण्डित्यं समुज्जवलं कर्तुं सम्प्रेरिताः स्युरित्याशास्महे।

मुख्यालयवार्ता



सरस्वतीवन्दनं कुर्वन्तः अतिथिप्रमुखाः



अतिथीनां सम्माननं कुर्वन् परिसरप्राचार्यः



कार्यक्रमे समुपस्थिताः निर्णायकाः

# सोत्साहं समाचरितः संस्कृतसप्ताहोत्सवः

राष्ट्रियसंस्कृतसंस्थाने मुख्यालये ऐषमः १६-२२, अगस्त, २०१३ मिते काले प्रतिवर्षानुसारमतीव हर्षेण संस्कृतसप्ताहोत्सवः समायोजितोऽभवत्। अस्मिन् सप्ताहव्यापिनि उत्सवे संस्कृतसप्ताहाङ्गतया नैके कार्यक्रमाः आयोजिता अभवन्। संस्कृतस्य उत्थाने, प्रचारे प्रसारे विकासे च एतादृशाः कार्यक्रमाः निश्चप्रचमेव उपयोगिनो भविष्यन्ति।



कस्याञ्चित्स्पर्धायां भागं गृह्णन्तः छात्राः

१६.०८.२०१३ दिनाङ्के संस्कृतसप्ताहाङ्गतया उद्घाटनकार्यक्रमः विद्वत्सपर्या-कार्यक्रमश्च आयोजितौ अभवताम्। दीपप्रज्वालनसरस्वतीमाल्यार्पणादिभिः वैदिकमङ्गला-चरणैश्च संस्कृतसप्ताहस्य उद्घाटनं सञ्जातम्। ततो निर्वासिततिब्बतीयसर्वकारे प्रधानमन्त्रीणां, केन्द्रीयोच्चतिब्बतीयविश्वविद्यालयस्य निदेशकचराणां भोपालस्थ-साञ्चीबौद्धभारतीय-ज्ञानाध्ययनविश्वविद्यालयस्य कुलाधिपतीनां बौद्धधर्मस्य परमपावनानां धर्मगुरूणाम् आचार्याणां सामदोङ्गरिम्पोछे-महाभागानां परमसान्निध्ये तेषामेव सपर्या समायोजिता। आचार्याः सामदोङ्गरिम्पोछेमहोदयाः केन्द्रीयोच्चतिब्बतीयशिक्षासंस्थानस्य निदेशकत्वेन भोट-संस्कृत-प्राकृतादिभाषाणां ग्रन्थानां सम्पादने महतीं भूमिकामावहन्। ते तिब्बतीयबौद्धधर्मगुरुषु अत्यन्तमेव पूज्याः वर्तन्ते। तेषां पाण्डित्यं कारुण्यं च अपरिमितं वर्तते। ते परमतपस्विनः उदारहृदयाः च सन्ति। तादृशानां विशालचरितानां सपर्यायां वक्तृत्वेन - श्रीमती गगनगिलवर्या, पद्मश्रीः रामशङ्करत्रिपाठिमहोदयः, आचार्यः एन्.एच्. साम्ताणिमहाशयः, आचार्यः विजयकुमारजैनवर्यश्च समुपस्थिताः आसन्। श्रीमती गगनगिलमहोदया रिम्पोछेवर्याणां व्यक्तित्वविषये स्वाशयं प्रकटयन्ती तिब्बतदेशे यापितानां दिनानां विषये स्वीयानुभवं प्रास्तौत्। सा अकथयत् यत् रिम्पोछेवर्याणां व्यक्तित्वं निश्चप्रचमेव अद्भुतं वर्तते। ततः पद्मश्रीः रामशङ्करत्रिपाठी, आचार्यः एन.एच. साम्ताणिः विजयकुमारजैनश्च रिम्पोछेवर्याणां विषये गभीराणि व्याख्यानानि प्रास्तुवन्। कार्यक्रमेऽस्मिन् संस्थानकुलपतिचरः आचार्यः राधावल्लभत्रिपाठी समुपस्थाय रिम्पोछेवर्याणां विषये स्वानुभवं प्राकटयत्।



संस्कृतसेवाव्रतिसम्मानं प्राप्नुवन् का.ना. पणिक्करः




विद्वत्सपर्याकार्यक्रमस्य किञ्चन दृश्यम्

१७.०८.२०१३ दिनाङ्के प्रातः विद्यालयीयच्छात्राणां भाषणस्पर्धा स्तोत्रपाठस्पर्धा च आयोजिते। षष्ठकक्षायाः द्वादशकक्ष्यापर्यन्तमायोजितयोरेतयोः स्पर्धयोः भाषणस्पर्धात्वेन विषयो निर्धारितः आसीत्- 'संस्कृतं लोकभाषा भवितुमर्हति' इति। तथैव स्तोत्रपाठाय विषयो निर्धारितः आसीत्- 'जगद्धरकृता स्तुतिकुसुमाञ्जलिः।' देहलीस्थ-विविधेभ्यः विद्यालयेभ्यः समागत्य बालाः एतयोः स्पर्धयोः समुत्साहेन भागमावहन्। १७.०८.२०१३ दिनाङ्के एव अपराह्ने 'कविसपर्या'-कार्यक्रमः आयोजितः आसीत्। नैकेषां महाकाव्यानां, खण्डकाव्यानां, गीतानां गजलादीनां च रचयितॄणां सम्मान्यानां महाकवीनाम् आचार्याणां हरिरामाचार्याणां सम्माने कार्यक्रमोऽयं समायोजितः अभवत्। आचार्यैः हरिरामाचार्यैः संस्कृतकाव्यपरम्परायै नैकाः नूतनाः विधाः, मान्यता स्थापनाश्च प्रदत्ताः। एतेषाम् आचार्याणां संस्कृतसाहित्ये महदवदानं वर्तते। कविसपर्यायामस्यां चर्चयितृत्वेन-देवर्षिकलानाथशास्त्री, आचार्यः दयानन्दभार्गवः, डा. सुषमासिंघवी डा. रामकुमारशर्मा चेत्येते विद्वांसः समुपस्थिताः आसन्। एभिर्महानुभावैः आचार्याणां हरिरामाचार्याणां व्यक्तित्वविषये कर्तृत्वविषये च गभीरतया व्याख्यानानि प्रस्तुतानि।




संस्कृतदिवसावसरे भाषमाणः कुलपतिः

ततः १९.०८.२०१३ दिनाङ्के प्रातःकाले विद्यालयीयच्छात्राणां निबन्धस्पर्धा आयोजिता अभवत्। निबन्धस्पर्धायायस्यां विषयः आसीत्- 'मम प्रियः कविः' इति। अत्र अहमहमिकया विद्यालयच्छात्रा भागमवहन्। ततः ख्यातिवादविषये शास्त्रचर्चा प्रवर्तिता अभवत्। शास्त्रचर्चायामस्यां चर्चयितारः आसन्- आचार्यः मणिद्राविडः, आचार्यः देवदत्तपाटीलः, आचार्यः श्रीकृष्णसुब्रह्मण्यं शास्त्री आचार्यः नवीनहोल्लः च। ख्यातिवादविषये इमे दार्शनिकाः आचार्याः गभीरतया अत्र व्याख्यानानि प्रास्तुवन्।

२०.०८.२०१३ दिनाङ्के संस्कृतदिवससमारोहः नवदेहलीस्थे राष्ट्रियसंग्रहालयस्थे प्रेक्षागृहे सुसम्पन्नतामाप। संस्कृतदिवससमारोहेऽस्मिन् मुख्यातिथित्वेन नवदेहलीस्थ-जवाहरलालनेहरुविश्वविद्यालयस्य कुलपतिः आचार्यः एस.के. सोपोरीमहोदयः समुपस्थितः आसीत्। सारस्वतातिथिरूपेण भारतशासन-मानवसंसाधन-विकासमन्त्रालयस्य भाषिकसंयुक्त-सचिवः श्री अनन्तकुमारसिंहः सभामलंकृतवान्। अध्यक्षत्वेन राष्ट्रियसंस्कृतसंस्थानस्य प्रभारिकुलपतिः आचार्यः ए.पी. सच्चिदानन्दः आसीत्। कार्यक्रमेऽस्मिन् सर्वादौ अतिथिभिः सरस्वतीसमर्चनपुरस्सरं दीपप्रज्वालनं कृतम्। ततः स्वागतगीतानन्तरम् आचार्यः एस.के. सोपोरीवर्यः संस्कृतस्य विषये स्वीयामनुभूतिं वाचा प्राकटयत्। श्री अनन्तकुमारसिंहोऽपि स्वव्याख्याने संस्कृतस्य वैशिष्ट्यं प्रतिपादयत्। ततः आचार्येण ए.पी. सच्चिदानन्दवर्येण अत्यन्तम् उत्साहेन संस्कृतस्य अभिवृद्धये कथं प्रयासाः करणीया इति प्रतिपादितम्। नवदेहलीस्थ-श्रीमल्लालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य प्रभारिकुलपतिः आचार्यः भवेन्द्रझाः अपि स्वीयान् विचारान् अत्र प्राकटयत्। अवसरेऽस्मिन् पद्मभूषणः कावालं नारायणपणिक्करः, आचार्यः ओमप्रकाशोपाध्यायः, आचार्यः कालूरिहनुमन्तरावश्चेति इमे त्रयोऽपि विद्वांसः संस्कृतसेवाव्रतिसम्मानेन अलंकृताः। अवसरेऽस्मिन् नैके ग्रन्था अपि लोकार्पिताः अभवन्।



स्पर्धासु भागं गृह्णन्तः छात्राः

२१.०८.२०१३ दिनाङ्के संस्कृतविश्वविद्यालयानां कुलपतीनां सम्मेलनं समायोजितमभवत्। आचार्यः ए.पी. सच्चिदानन्दः कार्यक्रमस्यास्य आध्यक्ष्यमावहत्। कार्यक्रमेऽस्मिन् संस्कृतस्य विकासाय नैका कार्ययोजना निर्धारिता जाता।



विविधस्पर्धासु प्राप्तपुरस्काराणां छात्राणां समूहचित्रम्

२२.०८.२०१३ दिनाङ्के नवदेहलीस्थे लोधीमार्गस्थिते चिन्मयमिशनप्रेक्षागृहे पुरस्कारवितरणं समापनसमारोहश्च आयोजितः। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन न्यायमूर्तिः डा. मुकुन्दकामशर्मा विशिष्टातिथित्वेन आचार्यः कल्याणकुमारचक्रवर्ती च उपस्थितौ आस्ताम्। कार्यक्रमस्य आध्यक्ष्यं संस्थानकुलपतिना आचार्येण ए.पी. सच्चिदानन्दवर्येण विहितम्। उभावपि महानुभावौ संस्कृतस्य महत्त्वविषये आत्माभिप्रायं प्रास्तुवन्। अवसरेऽस्मिन् संस्कृतस्पर्धासु विजयिभ्यः छात्रेभ्यः पुरस्काराः वितरिताः। निश्चप्रचम् अयं हि संस्कृतसप्ताहकार्यक्रमः सोल्लासं सम्पन्नः।




स्थापना-दिवसोत्सवस्य दृश्यमेकम्

## स्थापनादिवसः समाचरितः

ऐषमः १५.१०.२०१३ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य चतुश्चत्वारिंशः स्थापनादिवसोत्सवः अत्यन्तम् उत्साहेन समपद्यत। अवसरेऽस्मिन् संस्थानस्य सारस्वतसभागारे स्थापनादिवसोत्सवः समायोजितो जातः। दीपप्रज्ज्वालनेन सरस्वतीसमर्चनया च कार्यक्रमोऽयं समारब्धः। कार्यक्रमे मुख्यातिथित्वेन जवाहरलालनेहरुविश्वविद्यालयविशिष्ट-संस्कृताध्ययनकेन्द्रस्य आचार्या शशिप्रभाकुमारः तथा च अध्यक्षत्वेन संस्थानकुलपतिः आचार्यः ए.पी. सच्चिदानन्दः उपस्थितौ आस्ताम्। आचार्या शशिप्रभाकुमारः संस्कृतशिक्षाक्षेत्रे राष्ट्रियसंस्कृतसंस्थानस्य स्थानविषये महत्त्व-विषये च स्वाभिप्रायं प्रास्तौत्। ततः राष्ट्रिय-संस्कृतसंस्थानस्य कुलपतिचरः आचार्यः ए.पी. सच्चिदानन्दः अकथयद् यत् 'भारतशासनेन १९७० तमे ख्रिस्टाब्दे राष्ट्रियसंस्कृतसंस्थानस्य स्थापना कृता आसीत्। तदा आरभ्य संस्थानमिदं संस्कृतस्य संवर्धनाय नैकानि कार्याणि अकरोत्। समस्तेऽपि विश्वे संस्थानेन स्वकार्यैः नैकाः ऐतिहासिक्यः उपलब्धयः समार्जिताः।'



हिन्दी-पक्षोत्सवस्य पुरस्कारं प्राप्नुवन् श्रीअनिलनौडियालः

अवसरेऽस्मिन् संस्थानस्य पूर्वाधिकारिणः श्रीकन्यालः, श्रीसन्धुः श्रीमती शुक्लामुखर्जी चापि अत्र स्वाभिप्रायं प्राकटयन्। अवसरेऽस्मिन् हिन्दीपक्षान्तर्गततया समायोजितासु स्पर्धासु विजेतारः अपि पुरस्कृताः जाताः।

# अनुवादविषयिणी राष्ट्रिया सङ्गोष्ठी



सङ्गोष्ठ्याः उद्घाटनस्य किञ्चन दृश्यम्

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये ०८.०३.१३ तः १०.०३.१३ पर्यन्तम् 'इतरभाषाभ्यः संस्कृतेऽनूदितं साहित्यम्' इति विषयमाधृत्य काचित् राष्ट्रिया सङ्गोष्ठी समायोजिता। अस्यां सङ्गोष्ठ्याम् उद्घाटनसत्रे मुख्यातिथित्वेन प्रो. राधावल्लभत्रिपाठी (कुलपतिचरः, रा.सं.सं.), सारस्वतातिथित्वेन देवर्षिः कलानाथशास्त्री (राष्ट्रपतिसम्मानितो मनीषी) विशिष्टातिथित्वेन प्रो. रामानुजदेवनाथन् (कुलपतिः, ज.रा.रा.सं.वि.वि.) चासन्। कार्यक्रमस्यास्य आध्यक्ष्यं संस्थानकुलपतिना डा. एन. आर. कण्णन् वर्येण विहितम्। कार्यक्रमोऽयं संस्थानस्य सारस्वतसभागारे सम्पन्नमासीत्। दिनत्रयव्यापि-कार्यक्रमेऽस्मिन् प्रथमसत्रे अध्यक्षत्वेन प्रो. हरिदत्तशर्मा समुपस्थितः। अत्र वक्तृत्वेन डा. सरोजकौशल, प्रो. ताराशङ्करशर्मा, श्रीकौसलेन्द्रदासः, डॉ. नारायणदाशः च आसन्। द्वितीयसत्रे अध्यक्षत्वेन डा. प्रकाशपाण्डेयः आसीत्। डा. मीराद्विवेदी, डा. पङ्कजमिश्रः, प्रो. जी.एस.आर. कृष्णमूर्तिः, डा. एस. रङ्गनाथः च अत्र विषयवक्तारः आसन्। तृतीयसत्रे अध्यक्षत्वेन प्रो. एस.पी. नारङ्गः मञ्चे विराजितः। तत्र वक्तृत्वेन प्रो. पी.सी. मुरलीमाधवन्, प्रो. के.पी. केशवन्, डा. अरुणरञ्जनमिश्रः, डा. भाग्यलतापाटसकरः च आसन्। चतुर्थसत्रे अध्यक्षः प्रो. रमाकान्तशुक्लः आसीत्। वक्तृत्वेन डा. नाहिद आबिदी, डा. मञ्जुलताशर्मा, डा. बलरामशुक्लः, डा. वाहिदनसरू, डा. हनीफखानशास्त्री च आसन्। पञ्चमसत्रे अध्यक्षत्वेन प्रो. प्रभुनाथद्विवेदी समुपस्थितः। प्रो. राजेन्द्रनानावटी, प्रो. शशिनाथझाः, प्रो. हरिदत्तशर्मा, प्रो. सदाशिवकुमारद्विवेदी, डा. करतारचन्द्रशर्मा च अत्र स्वीयानि शोधपत्राणि प्रास्तुवन्। षष्ठसत्रे अध्यक्षत्वेन प्रो. शशिनाथझाः समुपस्थितः। अत्र वक्तारः आसन्-प्रो. अर्कनाथचौधरी, प्रो. राजेश्वरमिश्रः, प्रो. प्रभुनाथद्विवेदी, डा. लालाशङ्करगयावालः, डा. कामेश्वरशुक्लः, कु.जे. साहा च। सप्तमसत्रे अध्यक्षत्वेन प्रो. सर्वनारायणझाः समुपस्थितः यत्र वक्तृत्वेन प्रो. देवीप्रसादत्रिपाठी, प्रो. मदनमोहनपाठकः, डा. श्यामदेवमिश्रः च आसन्। अष्टमसत्रे अध्यक्षत्वेन प्रो. अर्कनाथचौधरी आसीत्, अत्र वक्तृत्वेन डा. भागीरथिनन्दः, प्रो. रामकुमारशर्मा, प्रो. सच्चिदानन्दतिवारी, डा. जयप्रकाशनारायणः, डा. रत्नमोहनझाः, श्री कू.वेङ्कटेशमूर्तिः, सुनीतागुप्ता, डा. अजयकुमारमिश्रः, डा. अजयसिंहः च आसन्। नवमसत्रे अध्यक्षरूपेण प्रो. राजेन्द्रनानावटी आसीत्, यत्र खलु वक्तृत्वेन प्रो. रमाकान्तपाण्डेयः, डा. प्रफुल्लगडपालः, डा. टी.महेन्द्रः, डा. रजनीशशुक्लः, डा. ऋषनभारद्वाजः च शोधपत्राणि प्रास्तुवन्।



शोधपत्रं प्रस्तुवन् प्रो. प्रभुनाथद्विवेदी

अस्यां सङ्गोष्ठ्यां सत्रशः संयोजकाः इमे आसन्-डा. जयप्रकाशनारायणः, डा. प्रफुल्लगडपालः, डा. अजयमिश्रः, डा. सुनीतागुप्ता, प्रो. सच्चिदानन्दतिवारी, डा. टी. महेन्द्रः, डा. रजनीशशुक्लः, डा. श्यामदेवमिश्रः, डा. अजयसिंहश्च।

अस्याः सङ्गोष्ठ्याः समापनसत्रं १०.०३.१४ दिनाङ्के जातम्। अत्र मुख्यातिथिरूपेण प्रो. अभिराजराजेन्द्रमिश्रः, सारस्वतातिथिरूपेण प्रो. रमेशकुमारपाण्डेयः विशिष्टातिथिरूपेण पद्मश्रीः रमाकान्तशुक्लः च समुपस्थिताः आसन्। कार्यक्रमस्यास्य अध्यक्षता कुलपतिवर्येण डा. एन. आर. कण्णन्-महोदयेन कृता आसीत्।

अनया सङ्गोष्ठ्या इतरभारतीयभाषाभ्यः संस्कृते अनूदितसाहित्यस्य नैकानि वातायनानि समुद्घाटितानि अभूवन्। निश्चप्रचमेव संस्कृते अनुवादस्य परम्पराविषये अनया सङ्गोष्ठ्या नूतनाः सम्भावनाः समुदेस्यन्ति।






शोधपत्रप्रस्तुतिं कुर्वन्तौ विद्वांसौ



समापनसमारोहस्य चित्रमेकम्

# सोत्साहं संवृत्तो युवमहोत्सवः

संस्थानस्य प्रतिष्ठास्पदः षष्ठोऽन्तः परिसरीयो युवमहोत्सवः २५.१०.२०१३ तः २८.१०.२०१३ दिनाङ्कं यावत् लक्ष्मणपुरे (लखनऊपरिसरे) महता हर्षप्रकर्षेण समायोजितः। प्रतिवर्षमिव युवमहोत्सवेऽस्मिन्नपि साहित्य-सङ्गीत-कला-क्रीडादिप्रतियोगितासु संस्थानस्य द्वादशपरिसरेभ्यः समागताः विद्यार्थिनः सोत्साहं भागमगृह्णन्। तत्र उद्घाटनसत्रे युवमहोत्सवस्यास्य संस्कृतालोकप्रकाशनपरा भव्या शोभायात्रा मधुरवादनध्वनिभिः सह परिसरं परितः प्राव्रजत्। चित्रविचित्रवर्णविशिष्टया तत्तत्प्रान्तीयवेशभूषया समलङ्कृतां शोभायात्रामेनां दर्शं दर्शं लक्ष्मणपुरस्थाः पौराः देशस्यास्य संस्कृताश्रितां संस्कृतिं साक्षाद्रूपेण एकत्रैवावाप्य मोदमावहन्। ध्वजोत्तोलनात् परं प्रवृत्ते सत्रेऽस्मिन् संस्थानस्य कुलपतिना प्रो.ए.पी.सच्चिदानन्दमहोदयेन आध्यक्ष्यं, जगद्गुरुरामानन्दाचार्य-राजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिना प्रो. रामानुजदेवनाथमहोदयेन सारस्वतातिथित्वं निर्व्यूढम्। संस्थानस्य कुलसचिवः डॉ. बिनोदकुमारसिंहः, संस्थानस्य परीक्षानियन्त्रकः डॉ. गोपीरमणमिश्रः परिसरप्राचार्यश्च प्रो. अर्कनाथचौधरी अधिमञ्चमासन्।




युवमहोत्सवस्य उद्घाटनसत्रस्य दृश्यमेकम्

अवसरेऽस्मिन् प्राचार्येण चौधरिमहोदयेन समागतानामतिथिविशिष्टानां पुष्पसमर्पणं विधाय स्वागतवचोभिः समर्चना व्यधायि। ततः प्रख्यातवैदिकशिक्षाविदुषा प्रो. देवनाथमहोदयेन अवोचि यत् वैदिकर्षिभिः युवावस्थायामेव नैके आविष्काराः विहिताः। ऋग्वेदस्य पञ्चममण्डले समागतानां मन्त्राणां द्रष्टा 'अत्रि-ऋषिः' अष्टादशे वयसि पाषाणखण्डघर्षणादग्नेराविष्कारञ्चकार। ऋषिकुमारेण च्यवनाख्येन द्वादशे वयसि संतरणकलायाः लोकविज्ञापनमकारि। एतेषु ऋषिकुमारेषु स्वाध्यायतपश्चर्यादिना सह स्पर्धाः अपि बभूवुः। इत्येवं युवावस्था नवाविष्काराणाम् अवस्था वर्तते।



आचार्य रा.देवनाथं सम्मानयन् संस्थानकुलपतिः

तत्रैव आध्यक्ष्यं निर्वहता प्रो. सच्चिदानन्देन भणितं यत् शासनस्य द्वितीयसंस्कृताऽऽयोगस्य प्रतिष्ठापनस्य सदिच्छया प्रतिज्ञायते यद्धि शासनं संस्कृतस्य विकासाय चिन्तयंश्चिन्तयंस्तिष्ठति। कुलपतिना अवोचि यत् कार्यक्रमेऽस्मिन् मानवसंसाधन-विकासराज्यमन्त्रिणः श्रीजितिनप्रसादस्य आगमनमपि निश्चितमासीत्, किन्तु शासनकार्यवशात् प्रवासमुपलक्ष्य अनागतेन मन्त्रिमहोदयेन दूरभाषेण स्वमानसिकोपस्थितिः शुभकामनाश्च विज्ञापिताः। कुलपतिमहोदयः संस्कृतच्छात्रान् शास्त्राध्ययनेन सह सर्वाङ्गीणविकासाय क्रीडादिकार्यक्रमेष्वपि संलग्नतायै अजुहोत्। सत्रान्ते संस्थानस्य कुलसचिवः डॉ. बिनोदकुमारसिंहः सर्वेषां समुपस्थितानां विदुषां निर्णायकानाञ्च धन्यवादमज्ञापयत्। कार्यक्रमस्य सञ्चालनं मुक्तस्वाध्यायकेन्द्रस्य निदेशकेन प्रो. रमाकान्तपाण्डेयेन विहितम्।



शोभायात्रायाः दृश्यमेकम्

अतः परं दिनत्रयं यावत् बह्व्यः प्रतियोगिताः अजायन्त। तासु सञ्जातासु सांस्कृतिकस्पर्धासु एकलसङ्गीत-शास्त्रीयगायन-वादन-नृत्य-अभिनयादिस्पर्धाः अवर्तन्त। एवमेव चित्रकलास्पर्धासु आशुचित्रण-भित्तिपत्रचित्रण-व्यङ्ग्यचित्रण-रङ्गवल्लीचित्रणानाम् आयोजनं जातम्। शैक्षिकस्पर्धासु कण्ठपाठ-वादविवाद-सङ्गणकीयसंस्कृतस्पर्धा-स्फूर्तिस्पर्धादीनामपि प्रवृत्तिरजायत। डॉ. रमेशसिंहस्य मुख्यसंयोजने क्रीडाङ्गणे खो-खो, कबड्डी, हस्तकन्दुकम्, बैडमिन्टन, धावनम्, कूर्दनम्, कुन्तक्षेपणम्, गोलकक्षेपणम्, चक्रक्षेपणम्, योगासनम्, मल्लयुद्धादीनाम् उपपञ्चदशक्रीडानामायोजनमप्यभवत्।



कार्यक्रमे समुपस्थिताः अतिथिप्रमुखाः

विविधस्पर्धानां निर्णायकेषु प्रो. अभिराजराजेन्द्रमिश्रः, जी.एस.आर.कृष्णमूर्तिः, प्रो. अशोककालिया, प्रो. ब्रजेशशुक्लः, प्रो. डी. एस. यादवः, श्रीसूर्यमोहनकुलश्रेष्ठः, डॉ. धर्मजोशी, डॉ. उमारमणझाः, डॉ. मुरली, डॉ. दोर्बलप्रभाकरशर्मा, प्रो. ओमप्रकाशपाण्डेयः, प्रो. देवनारायणझाः, प्रो.प्रेमचन्दहोमबलः, डॉ. डी.पी.मोहंती, डॉ. विजयसिंहः, डॉ. भास्करसिन्हा, डॉ. कमलवशिष्ठप्रभृतिभिः विश्रुतविद्वद्भिः सह भारतीयक्रीडाप्राधिकरणस्य अधिकारिणः च प्रमुखाः आसन्।

२७.१०.२०१३ इत्यस्मिन् अहनि परिसरे कुलपतिना कुलसचिवेन च सह संस्थानस्य तत्तत्परिसराणां प्राचार्याणाम् उपवेशनमपि जातम्। उपवेशनेऽस्मिन् मानवसंसाधनविकास-

मन्त्रालयपक्षतः श्री पी.के. साहा (उपसचिव-भाषा) श्रीपवनमेहता (अवरसचिव-भाषा) च समुपस्थितौ आस्ताम्। संस्थानमुख्यालयतः डॉ. गोपीरमणमिश्रः, प्रो. रमाकान्तपाण्डेयः श्रीमती शैलजामेनन चात्र भागमवहन्।



विजयवैजयन्तीं प्राप्नुवन् शृङ्गेरीपरिसरगणः

२८.१०.२०१३ दिनाङ्के उत्तराह्नि रङ्गविरङ्गस्यास्य युवमहोत्सवस्य सम्पूर्ति-समारोहोऽनुष्ठितः। समारोहेऽस्मिन् उत्तरप्रदेशराज्यस्य लोकायुक्तः न्यायमूर्तिः श्री एन.के. मेहरोत्रा मुख्यातिथित्वेन उत्तरप्रदेशविधानपरिषदः सभापतिः श्रीगणेशशङ्करपाण्डेयश्च सारस्वतातिथित्वेन सम्प्राप्तौ। तत्रैव युवा आई.ए.एस. अधिकारी श्री किरण एस. अपि अधिमञ्चमासीत्। प्रकृतेऽवसरे मान्यमान्यैः परिसरस्यास्य प्रो. शिशिरकुमारपाण्डेयस्य मुख्यसम्पादने मुद्रितायाः शोधपत्रिकायाः 'गोमती'त्याख्यायाः प्रो.मदनमोहनपाठकस्य सम्पादने प्रकाशितस्य 'भास्करोदयः' इत्याख्यस्य ज्योतिषपञ्चाङ्गस्य च लोकार्पणं कृतम्। युवमहोत्सवस्य स्पर्धासु शृंगेरीस्थश्रीराजीवगांधीपरिसरः सर्वाधिकाङ्कानवाप्य पञ्चदशस्वर्णपदकानि प्राप्य प्रथमं स्थानं लब्ध्वा विजय-वैजयन्तीमलभत। तत्परिसरपक्षतः डॉ. चन्द्रशेखरभट्टः, डॉ.(श्रीमती) चन्द्रकलाकोण्डी, डॉ. वेङ्कटरमणभट्टः डॉ. एच.डी. रामचन्द्रश्च 'विजयवैजयन्ती'मविन्दन्त। द्वितीयस्थानं लब्धवतः जयपुरपरिसरस्य पक्षतः डॉ. गजेन्द्रशर्मा, डॉ. श्रीधरमिश्रः, डॉ. शिवकान्तझाः, डॉ. नमितामित्तल पुरस्कारं गृहीतवन्तः। तृतीयं स्थानं लब्धवतः लखनऊ-परिसरस्य डॉ. रमेशसिंहः, प्रो. लोकमान्यमिश्रः, प्रो. रामलखनपाण्डेयश्च पुरस्कारप्रतीकमलभन्त। न्यायमूर्तिः श्री एन. के. मेहरोत्रा सर्वेभ्यः विजेतृभ्यः वर्धापनं विधाय सर्वेषां विजयलिप्सूनां प्रोत्साहनमकरोत्। तदनन्तरं कुलपतिना 'सप्तमः युवमहोत्सवः शृङ्गेरीपरिसरे भविष्यती'त्यपि उद्घोषितम्। कुलसचिवः डॉ. बिनोदकुमारसिंहः अभिनन्दनवाक्यैः आयोजकपरिसराय साधुवादान् प्रदत्तवान्। परिसरप्राचार्यः प्रो. चौधरी सर्वेभ्यः प्रतिभागिछात्रेभ्यः, तत्तत्परिसरप्राचार्येभ्यः सहकारकेभ्यश्च समितिसदस्येभ्यः धन्यवादं प्रत्यज्ञापयत्। समापनसत्रस्य सञ्चालनं डॉ. रत्नमोहनझा श्री कू. वेङ्कटेशमूर्तिश्च अकुरुताम्।



सांस्कृतिककार्यक्रमस्य चित्रमेकम्

## युवमहोत्सवस्य परिणामः

(प्रथम-द्वितीय-तृतीयक्रमेण)

### संस्कृतसुभाषितकण्ठपाठः

| | |
|---|---|
| रेणूशर्मा | जयपुरपरिसरः |
| गौरवः | वेदव्यासपरिसरः |
| शिवनारायणत्रिपाठी | भोपालपरिसरः |

### वादविवादस्पर्धा (पक्षः)

| | |
|---|---|
| सुशान्तशर्मा | श्रीरणवीरपरिसरः |
| आर्. श्रेयस प्रसन्नः | गुरुवायूरपरिसरः |
| रामप्रकाशशुक्लः | लखनऊपरिसरः |

### वादविवादस्पर्धा (विपक्षः)

| | |
|---|---|
| उमा महेश्वर | राजीवगान्धीपरिसरः |
| रोहितोपाध्यायः | जयपुरपरिसरः |
| शरतमित्रन् | गुरुवायूरपरिसरः |

### स्फूर्तिस्पर्धा

| | |
|---|---|
| विवेक वि.एस.-आर. श्रेयस प्रसन्नौ | गुरुवायूरपरिसरः |
| नीतिशकुमार-अङ्कितकुमारौ | जयपुरपरिसरः |
| पङ्कजशर्मा-रूबलदासौ | भोपालपरिसरः |

### साहित्यरचनास्पर्धा

| | |
|---|---|
| अङ्कितकुमारः | जयपुरपरिसरः |
| श्रेयसप्रसन्नः | गुरुवायूरपरिसरः |
| सूर्यहेब्बार ए. | राजीवगान्धीपरिसरः |

### सङ्गणकीयसंस्कृतस्पर्धा

| | |
|---|---|
| प्रशान्तगौन्करः | राजीवगान्धीपरिसरः |
| अजयशर्मा | श्रीरणवीरपरिसरः |
| अभिषेकतिवारी | भोपालपरिसरः |

### चित्रस्पर्धा (भित्तिपत्रकम्)

| | |
|---|---|
| शृति के.बी. | गुरुवायूरपरिसरः |
| मानसरञ्जनसाहू | श्रीसदाशिवपरिसरः |
| मुरलीमाधवः डी. | राजीवगान्धीपरिसरः |

### चित्रस्पर्धा (आशुचित्रणम्)

| | |
|---|---|
| श्रुति के.बी. | गुरुवायूरपरिसरः |
| मुरलीमाधवः डी. | राजीवगान्धीपरिसरः |
| आशा छेडा | मुम्बईपरिसरः |

### चित्रस्पर्धा (व्यङ्गचित्रम्)

| | |
|---|---|
| श्रुति के.बी. | गुरुवायूरपरिसरः |
| नम्रता-ठक्कर | मुम्बईपरिसरः |
| मानसरञ्जनसाहु | श्रीसदाशिवपरिसरः |

### चित्रस्पर्धा ( रङ्गवल्लीस्पर्धा )

| | |
|---|---|
| मेखला पि. भट्टः | श्रीराजीवगान्धीपरिसरः |
| रश्मिरेखासाहू | एकलव्यपरिसरः |
| नम्रता–ठक्कर | मुम्बईपरिसरः |

### सांस्कृतिकस्पर्धा ( एकपात्राभिनयः )

| | |
|---|---|
| मञ्जुनाथभट्टः | श्रीराजीवगान्धीपरिसरः |
| पुरुषोत्तमदासः | श्रीरणवीरपरिसरः |
| अनिलः एल. | गुरुवायूरपरिसरः |

### सांस्कृतिकस्पर्धा ( एककसंस्कृतगीतस्पर्धा )

| | |
|---|---|
| प्रकाशचन्द्रः | वेदव्यासपरिसरः |
| श्रीरञ्जिनी के. | राजीवगान्धीपरिसरः |
| रेणूशर्मा | जयपुरपरिसरः |

### सांस्कृतिकस्पर्धा ( एककशास्त्रीयवादनस्पर्धा )

| | |
|---|---|
| राजेशकलौनी | लखनऊपरिसरः |
| हृषीकेशः | गुरुवायूरपरिसरः |
| पुष्पलता प्रधान | श्रीसदाशिवपरिसरः |

### सांस्कृतिकस्पर्धा ( एककशास्त्रीयगानस्पर्धा )

| | |
|---|---|
| नारायणरायकरः | राजीवगान्धीपरिसरः |
| ब्रजेशकश्यपः | लखनऊपरिसरः |
| अरुन्धतीसुकुमारण | गुरुवायूरपरिसरः |

### सांस्कृतिकस्पर्धा ( एककशास्त्रीयनृत्यस्पर्धा )

| | |
|---|---|
| मेघा एस. राजः | गुरुवायूरपरिसरः |
| कल्याणीफगरे | भोपालपरिसरः |
| शारदाभारती | श्रीसदाशिवपरिसरः |

### सांस्कृतिकस्पर्धा ( सङ्घनृत्यस्पर्धा )

मेघा एस.राज, प्रतीक्षा के.पि., शान्तिदेवी के.जे., जयलक्ष्मी एम., वीणा–राधाकृष्णन, अनू पि.एस. – गुरुवायूरपरिसरः

निशाजैन, रितिका, पूजाजैन, दीक्षाचतुर्वेदी, मैनाकुमारीशर्मा, ममताशर्मा – जयपुरपरिसरः

सुनीकाचटर्जी, कवितासिन्हा, कुनु–मिश्रा, हीरा–बाल्मीकि, सुचिस्मीतापण्डा – एकलव्यपरिसरः

## क्रीडास्पर्धा

### १०० मीटरधावनम् ( पुरुषः )

| | |
|---|---|
| जी.श्रीधरभट्टः | शृङ्गेरीपरिसरः |
| बिक्रमकिशनः | शृङ्गेरीपरिसरः |
| विकासकुमारः | लखनऊपरिसरः |

### २०० मीटरधावनम् ( पुरुषः )

| | |
|---|---|
| परमानन्दशर्मा | भोपालपरिसरः |
| धर्मेन्द्रयादव | लखनऊपरिसरः |
| अजयकुमारशर्मा | जयपुरपरिसरः |

### ४०० मीटरधावनम् ( पुरुषः )

| | |
|---|---|
| मनोजसिंहः | जयपुरपरिसरः |
| अजयकुमारशर्मा | जयपुरपरिसरः |
| भास्करकोठारी | लखनऊपरिसरः |

### ८०० मीटरधावनम् ( पुरुषः )

| | |
|---|---|
| रमेश बी.सी. | शृङ्गेरीपरिसरः |
| विशालशर्मा | जम्मूपरिसरः |
| नीलेशशर्मा | भोपालपरिसरः |

### १५०० मीटरधावनम् ( पुरुषः )

| | |
|---|---|
| रमेश बी.सी. | शृङ्गेरीपरिसरः |
| विशालशर्मा | जम्मूपरिसरः |
| सन्तोषकुमारः | लखनऊपरिसरः |

### दीर्घकूर्दनम् ( पुरुषः )

| | |
|---|---|
| बिक्रमकिशनः | शृङ्गेरीपरिसरः |
| सनाथन ओरम | शृङ्गेरीपरिसरः |
| दीपकशर्मा | लखनऊपरिसरः |

### उच्चकूर्दनम् ( पुरुषः )

| | |
|---|---|
| रणवीरचौधरी | जयपुरपरिसरः |
| ध्रुवकः | शृङ्गेरीपरिसरः |
| अगिलः ए.एस. | गुरुवायूरपरिसरः |

### गोलक्षेपणम् ( पुरुषः )

| | |
|---|---|
| हरीशकुमारः | जयपुरपरिसरः |
| विकासकुमारः | लखनऊपरिसरः |
| रविकुमारः | गरलीपरिसरः |

### चक्रक्षेपणम् ( पुरुषः )

| | |
|---|---|
| सत्यवीरसिंहः | जयपुरपरिसरः |
| विकासकुमारः | लखनऊपरिसरः |
| जगन्नाथ–आचार्यः | शृङ्गेरीपरिसरः |

### कुन्तक्षेपणम् ( पुरुषः )

| | |
|---|---|
| प्रदीपकुमारः | शृङ्गेरीपरिसरः |
| ध्रुवकः | शृङ्गेरीपरिसरः |
| सीतारामः | जयपुरपरिसरः |

### १०० मीटरधावनम् ( स्त्री )

| | |
|---|---|
| तुषार के. हेगडे | शृङ्गेरीपरिसरः |
| दिव्या पी.पी. | गुरुवायूरपरिसरः |
| स्वागतिका आचार्य | पुरीपरिसरः |

### २०० मीटरधावनम् ( स्त्री )

| | |
|---|---|
| तुषारा के. हेगडे | शृङ्गेरीपरिसरः |
| दिव्या डी. | गुरुवायूरपरिसरः |
| कुमुदिनी बाग | पुरीपरिसरः |












## ४०० मीटरधावनम् ( स्त्री )

दीपिकाचौधरी जयपुरपरिसरः
दिव्या पी. गुरुवायूरपरिसरः
रश्मि एच.पी. शृङ्गेरीपरिसरः

## दीर्घकूर्दनम् ( स्त्री )

मेघा जी. हेगडे शृङ्गेरीपरिसरः
दिव्या पी.पी. गुरुवायूरपरिसरः
रेणुका जयपुरपरिसरः

## उच्चकूर्दनम् ( स्त्री )

उषा एल. हेगडे शृङ्गेरीपरिसरः
प्रतिभा गरलीपरिसरः
पिङ्की कुमारी जम्मूपरिसरः

## गोलक्षेपणम् ( स्त्री )

विनी शुक्ला लखनऊपरिसरः
राजेश्वरी पी. भाट शृङ्गेरीपरिसरः
शिरञ्जिनी के. शृङ्गेरीपरिसरः

## कुन्तक्षेपणम् ( स्त्री )

रेणुका जयपुरपरिसरः
विनी शुक्ला लखनऊपरिसरः
श्रीरञ्जनीक शृङ्गेरीपरिसरः

## सर्वश्रेष्ठस्पर्धी ( पुरुषः )

रमेशः बी.सी. शृङ्गेरीपरिसरः

## सर्वश्रेष्ठस्पर्धिनी ( स्त्री )

तुषारा के. हेगडे शृङ्गेरीपरिसरः

## बैडमिण्टन् स्त्री ( एकल )

उमा जयपुरपरिसरः
श्रीरजनी के. शृङ्गेरीपरिसरः

## बैडमिण्टन् स्त्री ( युगल )

दीपिका चौधरी-उमा जयपुरपरिसरः
श्रीरञ्जिनी के.-भाबनी आर्. कुरन्दवाड शृङ्गेरीपरिसरः

## बैडमिण्टन् पुरुष ( एकल )

योगेन्द्रभारद्वाजः लखनऊपरिसरः
सुनीलकुमारः जयपुरपरिसरः

## बैडमिण्टन् पुरुष ( युगल )

प्रवीनकुमार-योगेन्द्रभारद्वाजौ लखनऊपरिसरः
किशोरकुमार-दिनेशकुमारौ शृङ्गेरीपरिसरः

## मल्लयुद्धम् ( ५० कि.ग्रा. )

सतीशकुमारः जयपुरपरिसरः
धर्मेन्द्रः गरलीपरिसरः
रतनसिंहः लखनऊपरिसरः
विजयकुमारः शृङ्गेरीपरिसरः

## मल्लयुद्धम् ( ५५ कि.ग्रा. )

मुकेशकुमारः जम्मूपरिसरः
पूर्णचन्द्रदाशः पुरीपरिसरः
भूपेन्द्रः लखनऊपरिसरः
योगेशकुमारः जयपुरपरिसरः



## मल्लयुद्धम् ( ६० कि.ग्रा. )

लक्ष्मीचन्दः गरलीपरिसरः
धर्मेन्द्रकुमारः शृङ्गेरीपरिसरः
अजयकुमारः जम्मूपरिसरः
प्रकाश आर्यः लखनऊपरिसरः

## मल्लयुद्धम् ( ६६ कि.ग्रा. )

सुमीतकुमारः लखनऊपरिसरः
अमरनाथः गरलीपरिसरः
सूर्यकान्तमहोपात्रः पुरीपरिसरः
सत्यनारायणः मुम्बईपरिसरः



## मल्लयुद्धम् ( ७६ कि.ग्रा. )

विकासकुमारः लखनऊपरिसरः
प्रदीपकुमारः शृङ्गेरीपरिसरः
गोपालकृष्णमिश्रा पुरीपरिसरः
हेमराजः गरलीपरिसरः

## मल्लयुद्धम् ( ८४ कि.ग्रा. )

कुलदीपः लखनऊपरिसरः
हरीशकुमारः जयपुरपरिसरः
अमितगुलेरिया गरलीपरिसरः
प्रेमशङ्करपाण्डेयः भोपालपरिसरः

## योगासनम् ( पुरुषः )

शुभम आर्य लखनऊपरिसरः
निशेषः गरलीपरिसरः
धर्मेन्द्रकुमारः शृङ्गेरीपरिसरः



## योगासनम् ( स्त्री )

विदुषी बोल्ला मुम्बईपरिसरः
प्रेरणा लखनऊपरिसरः
शर्मिष्ठा मिश्रा पुरीपरिसरः

## कबड्डीविजेता

प्रेक्षः आर्यः, विकासकुमारः, कुलदीपः, लखनऊपरिसरः
विक्रमः, रमाकान्तः आर्यः, सुमीतकुमारः,
अनुजः, परमेश्वरः, अमितशर्मा,
सुमितकुमारः, प्रवीणकुमारः

### कबड्डी

मोहनलालः, धर्मेन्द्रः, कपिलकुमारः, रणदेवः,
महेशकुमारः, कुशलः, उमेशकुमारः, उमेशकुमारः,
कपिलदेवः, लखीचन्दः, ललितशर्मा, मुकेशकुमारः

### खो-खोविजेता

विद्याबाती बी.भट्, राजेश्वरी टी.भट्, रश्मि एच.पी., शृङ्गेरीपरिसरः
निकिता जे. नैयर, प्रज्ञानरानी साहू, विद्या एम. हेगडे,
उषा हेगडे, मेघा जी. हेगडे, वसुधा के.एन.,
माहेश्वरी एस. हुल्लर, भाबानी आर. कुरानवाड, तुषारा के. हेगडे

### खो-खो

सुकन्यादेवी, प्रतिवा, पायल, काजल, गरलीपरिसरः
शिल्पाशर्मा, दीक्षा, मीना, मधुबाला, आञ्चल,
सोनिका, भारतीकपूर, उषा

### वालीवॉलविजेता

सूरजकुमारपाणिग्राही, रामचन्द्रबरालः, पुरीपरिसरः
चिन्मयजेना, प्रकाशकुमारनायकः,
जितेन्द्रत्रिपाठी, सोरेनबडा, लोकनाथसाहू,
वोजाराजमहानता, बरादाप्रसादषडङ्गी,
समीरदेवचौहानः, देवाशीषपण्डा, सौम्यरञ्जनमहापात्रा

### वालीवॉल

कामेश्वरनेगी, ललितः, धीरजमिश्रा, लखनऊपरिसरः
रविभट्टः, तेनजिनः, हेमन्तोपाध्यायः,
अनिलभट्टः, बोधचन्द्रलामा, रणधीरकुमारः

### चतुरङ्गम् ( पुरुषः )

| | |
|---|---|
| सोमेन्द्रसाहू | पुरीपरिसरः |
| धोतारेप्रदीप | गुरुवायूरपरिसरः |

### चतुरङ्गम् ( स्त्री )

| | |
|---|---|
| पूनमजेना | पुरीपरिसरः |
| विद्याभाटी बी. भट् | शृङ्गेरीपरिसरः |

## राष्ट्रियप्राकृतसङ्गोष्ठी सम्पन्ना



राष्ट्रियप्राकृतसङ्गोष्ठ्यवसरे ग्रन्थं लोकार्पयन्तः विद्वांसः

जयपुरपरिसरे प्राकृत-अध्ययनकेन्द्रेण १९.०७.२०१३ दिनाङ्कतः २१.०७.२०१३ पर्यन्तं दिनत्रयपरिव्यापिनी राष्ट्रियप्राकृतसङ्गोष्ठी अत्यन्तं यशस्विरूपेण समायोज्यत। 'भारतीयदर्शनस्य साहित्यस्य च विकासे प्राकृतवाङ्मयस्य योगदानम्' इति विषयमवलम्ब्य सम्पन्नायाम् अस्यां सङ्गोष्ठ्याम् अधिशतं प्राकृत-विद्यानुरागिणो विद्वांसः शोधच्छात्राः च दशसु सत्रेषु द्वादशाधिकैकशतलेखानां माध्यमेन प्राकृतसाहित्ये निहितानां ज्योतिष-न्याय-भूगोल-खगोल-गणित-पर्यावरण-इतिहास-धर्म-संस्कृति-राजनीति-जीवनमूल्यादीनां विविधानां विषयाणां प्रतिपादनं कृतवन्तः। परिसरप्राचार्यस्य आचार्यस्य प्रकाशपाण्डेयस्य अध्यक्षतायाम् आचार्यः रामानुजदेवनाथः (कुलपतिचरः, जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयः), डा. बिनोदकुमारसिंहः (कुलसचिवः, राष्ट्रियसंस्कृतसंस्थानम्), प्रो. कमलचन्द्रसोगाणी (निदेशकः, अपभ्रंश-साहित्याकादमी), देवर्षिकलानाथ-शास्त्री (जयपुरम्), प्रो. अभिराजराजेन्द्रमिश्रः (पूर्वकुलपतिः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः), डा. सुषमासिंघवी (अध्यक्षा, राजस्थान-संस्कृत-अकादमी), प्रो. प्रेमसुमनजैनः (उदयपुरम्), प्रो. विजयजैनः (वाराणसी) इत्यादयः लब्धप्रतिष्ठाः विद्वांसः उपस्थिताः आसन्। सङ्गोष्ठ्याः संयोजकः प्रो. श्रीयांशकुमारसिंघई उद्घाटनसत्रस्य सञ्चालनं कृतवान्। प्राकृतविकासाधिकारी डा. धर्मेन्द्रकुमारजैनः, डा. सुमनकुमारजैनः, डा. आनन्दकुमारजैनः अन्ये च परिसरस्य आचार्याः, सहाचार्याः, सहायकाचार्याः, शोधच्छात्राः च उपस्थिताः आसन्।

## हिन्दीपक्षोत्सवः आचरितः



हिन्दी-पक्षोत्सवस्य दृश्यमेकम्

राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये १४.०९.२०१३ तः ३०.०९.२०१३ पर्यन्तं हिन्दीपक्षोत्सवः आचरितः। अस्मिन् पर्याये भाषण-निबन्ध-टिप्पणप्रारूपण-सुलेखन-काव्यापाठादिविषये स्पर्धाः आयोजिताः अभवन्। एतासु स्पर्धासु संस्थानकर्मचारिभिः अहमहमिकया भागग्रहणं विहितम्। निर्णायकत्वेनात्र श्री के.सी. नौटियालः (वरिष्ठः परामर्शदाता, राजभाषाविभागः, मानवसंसाधनविकासमन्त्रालयः) श्रीसुभाषशर्मा (हिन्दी-अधिकारी, राष्ट्रिय-शैक्षिक-प्रशासनिक-विश्वविद्यालयः, नवदेहली) आर.पी.झाः (उपनिदेशकः राजभाषाविभागः, उद्योगमन्त्रालयः, उद्योगभवनं, नवदेहली) च आसन्। स्पर्धासु विजेतृभ्यः पुरस्कारवितरणं १५.१०.२०१३ दिनाङ्के संस्थानस्य स्थापनादिवसावसरे सञ्जातम्।

## भारतीयबौद्धाध्ययनसभायाः वार्षिकं सम्मेलनम्



अतिथिवर्यं सम्मानयन् आचार्यः के.बी. सुब्बरायुडुः

०९.०८.२०१३ तः ११.०८.२०१३ दिनाङ्कं यावत् भारतीयबौद्धाध्ययनसभा-जम्मूविश्वविद्यालयस्य राष्ट्रियसंस्कृतसंस्थानस्य च संयुक्तेन सहयोगेन दिवसत्रयव्यापि वार्षिकं सम्मेलनं समायोजितमभवत्। ०९.०८.२०१३ तमे दिनाङ्के अस्य सम्मेलनस्य उद्घाटनकार्यक्रमः संवृत्तः। उद्घाटनसमारोहेऽस्मिन् मुख्यातिथित्वेन त्रिपुरासर्वकारस्य उच्चशिक्षामन्त्री श्रीभानुलाल-शाहमहोदयः, सारस्वतातिथित्वेन उच्चशिक्षामन्त्रालयसचिवः श्रीकिशोरआम्बुलीमहोदयः, विशिष्टातिथित्वेन रामकृष्णमिशन-अगरतलायाः सचिवः स्वामिहितकामानन्दवर्यः, मुख्यप्रवक्ता प्रो. यज्ञेश्वरशास्त्रिवर्यः अमुमुद्घाटनसमारोहमभूषयन्। सभायाः आध्यक्षमकार्षीत् परिसरस्य प्राचार्यः प्रो. के. बी. सुब्बरायुडुवर्यः। सर्वेऽपि सदसि विराजमाना अतिथयः परिसरस्य प्रथमं समारोहं समुद्घाट्य संस्कृतवाचः तन्निगूढज्ञानस्य च रक्षणाय विस्ताराय दत्तैकावधानं राष्ट्रियसंस्कृतसंस्थानम् उद्दिश्य भूरि भूरि प्रशस्तवन्तः।



कार्यक्रमे समवेताः विद्वांसः

११.०८.२०१३ दिनाङ्के समापनसमारोहे त्रिपुराराज्यस्य महामहिमराज्यपालः श्रीदेवानन्दकंवरमहोदयः मुख्यातिथित्वेन सभां समलङ्कृतवान्, एवं त्रिपुराराज्यस्य विधानसभायाः उपाध्यक्षः श्रीपबित्रकरमहोदयः सारस्वतातिथिरूपेणाधिमञ्चं विलसन् अधिमञ्चमुपस्थितान् सभासदः स्वकीयोजोमयमहिम्ना प्रभावितवान्। सभाया आध्यक्ष्यं भारतीयबौद्धाध्ययनसभाप्रमुखेन प्रो. यज्ञेश्वरशास्त्रिमहोदयेन विहितम्। समापनसमारोहे महामहिमराज्यपालमहोदयेन पालिपाकृतभाषायोः तद्गर्भस्थबौद्धदर्शनस्य च विततिं विदधतः भारतीयबौद्धाध्ययनसभायाः राष्ट्रियसंस्कृतसंस्थानस्य च प्रयासाः बहु प्रशंसिताः। विशेषतो बौद्धदर्शनस्य प्रादुर्भावं, मध्ययुगे सम्राडशोकादिभिः तत्प्रसारोपक्रमं राज्यपालमहौजसः सभ्यान् व्यज्ञापयन्। पालि-प्राकृतभाषयोः परिरक्षणाय विस्ताराय च साम्प्रतिके युगे अपेक्षौचित्यं प्रतिपाद्य तदर्थं सर्वं विद्वत्समाजं ते प्राचोदयन्। परिसरपक्षतः अस्य कार्यक्रमस्य संयोजनं शिक्षाशास्त्रविभागाध्यक्षः डॉ. श्रीगोविन्दपाण्डेयः सुचारुरूपेण कृतवान्। अन्ते भारतीयबौद्धाध्ययनसभायाः अध्यक्षः प्रो. एस.पी.शर्ममहोदयः सर्वेषां सदसि विराज्यमानानाम् अतिथीनां धन्यवादार्पणं कृतवान्।


## गीता-वैदिकविज्ञानयोः कार्यशाले सम्पन्ने



व्याख्यानं प्रयच्छन् आचार्यः दयानन्दभार्गवः

११.०७.२०१३ तः २५.०७.२०१३ पर्यन्तं राष्ट्रियसंस्कृतसंस्थानस्य सारस्वतसभागारे श्रीमद्भागवद्गीतावैदिकविज्ञानयोर्विषये कार्यशाले समायोजितेऽभवताम्। श्रीमद्भगवद्गीतायाः वैदिकविज्ञानस्य च गभीरोऽध्येता व्याख्याता च आचार्यः दयानन्दभार्गवः उभययोः कार्यशालयोः प्रशिक्षणं प्रादात्। कार्यशालायाम् अत्यन्तं वैज्ञानिकरीत्या सुनियोजितरूपेण च आचार्यः भार्गवः विषयप्रवर्तनमकरोत्। प्रातःकालीने सत्रे प्रत्यहं वेदविज्ञानमाश्रित्य सायंकालीने सत्रे श्रीमद्भगवद्-गीतामाश्रित्य च व्याख्यानानि प्रवर्तितानि। एषु व्याख्यानेषु न केवलं संस्थानस्य शैक्षिकाः सदस्याः एव भागग्रहणम् अकुर्वन्, अपितु कार्यालयीनः कर्मचारिणोऽपि अत्र भागमावहन्। दिल्लीविश्व-विद्यालयस्य जवाहरलालनेहरुविश्वविद्यालयस्य अन्यसंस्थानां च अध्यापका छात्राश्चात्र भागं गृहित्वा उपकृता अभवन्। संस्थानस्य शैक्षणिककार्यक्रमेषु अस्याः कार्यशालायाः किञ्चन विशिष्टं स्थानं वर्तते।

## द्वितीयसंस्कृतायोगः गठितः



भारतशासनेन संस्कृतस्य समुन्नयनार्थं विकासार्थञ्च द्वितीयसंस्कृतायोगस्य सङ्गठनं विहितम्। अस्मिन् आयोगे प्रो. सत्यव्रतशास्त्री अध्यक्षः अथ च इमे सदस्याः वर्तन्ते- श्रीगौतमपटेलः, आचार्यः सुदर्शनशर्मा, श्रीदेवर्षिकलानाथशास्त्री, आचार्यः मानवेन्द्रबनर्जी, आचार्यः के. रामसुब्रह्मण्यन्, डा. पी. रामानुजन्, आचार्यः आर्.के. दूबे, आचार्यः वेम्पटिकुटुम्बशास्त्री, डा. मोहनगुप्ता, आचार्या स्वप्नादेवी, डा. योगानन्दशास्त्री, आचार्यः शशिप्रभाकुमारः, डा. एन्.आर्. कन्नन (सदस्यसचिवः) च ।

तत्र सहकारीसदस्याः इमे वर्तन्ते- डा. बिनोदकुमारसिंहः (कार्यकारीसदस्यः सचिवश्च), आचार्यः हरेकृष्णशतपथी, आचार्यः बी. सुरेन्द्रकुमारः, आचार्या रेणुबाला, आचार्या वेदकुमारीघई च।

## भव्यतया सम्पन्नः राष्ट्रपतिसम्मानपत्रप्रदानोत्सवः

भारतशासनस्य मानवसंसाधनविकासमन्त्रालयेन प्रतिवर्षं प्राच्यभारतीयभाषाणां विद्वद्भ्यः सम्मानाः उद्घोष्यन्ते। राष्ट्रियसंस्कृतसंस्थानम् अस्य उपक्रमस्य दायित्वं निर्वहति। संस्कृत-पालि/प्राकृत-अरबी-फारसी-भाषाणां संरक्षण-उन्नयन-विकास-प्रचारादिदृष्ट्या स्वयं कष्टं सोढ्वापि प्रयत्नरताः महान्तः पण्डिताः तपस्विनश्च एतत्परियोजनानन्तर्गततया सम्मानिताः भवन्ति।

अस्मिन् वर्षे १७.०१.२०१४ तमे दिनाङ्के राष्ट्रपतिभवनस्य अशोकाख्ये सभागारे महता वैभवेन सम्मान-समारोहः समायोजितोऽभवत्। कार्यक्रमेऽस्मिन् भारतवर्षस्य राष्ट्रपतयः महामहिमशालिनः श्रीमन्तः प्रणबमुखर्जी-महोदयाः २०१२-२०१३ वर्षयोः चितेभ्यः विद्वद्भ्यः सम्मानपत्रं, राङ्कवं पञ्च-लक्षात्मकं धनराशिं च प्रदत्तवन्तः। अवसरेऽस्मिन् एतत्परियोजनानन्तर्गततया प्रदीयमानं महर्षिबादरायणव्याससम्मानपत्रं प्राप्तकर्तॄणां कृतेऽपि राष्ट्रपतयः सम्मानपत्रं, राङ्कवम् एकलक्षरूप्यकाणि च अयच्छन्। अवसरेऽस्मिन् सम्मानिताः संस्कृत-पालि/प्राकृतभाषाणां विद्वांसः इमे सन्ति-

**२०१२ तमस्य वर्षस्य राष्ट्रपतिसम्मानपत्रप्राप्तकर्तारः ( संस्कृतभाषायाम् ) -**



२०१२ तमे वर्षे राष्ट्रपतिसम्मानप्राप्तकर्तॄणां विदुषां किञ्चन समूहचित्रम्

१. श्रीकृष्णयाजी, २. आचार्यः कृष्णानन्दझाः, ३. श्रीमती मनीषापाठक, ४. डा. रविन्द्रकुमारनागरः, ५. श्री अम्बाराममणिशङ्करजोशी, ६. डा. रामेश्वरदत्तशर्मा, ७. श्री हरीशचन्द्ररेणापुरकरः, ८. डा. के.चन्द्रशेखरन् नायरः, ९. डॉ. चांदे पङ्कजत्रिंबकः, १०. पं. गोविन्दचन्द्रमिश्रः, ११. स्वामिनिगमबोधतीर्थः (राधाकृष्णः), १२. डा. पुष्करदत्तशर्मा, १३. श्रीपझवेरीचक्रवर्तीशतकोपाचारियारः, १४. आचार्यः सुधांशुशेखरशास्त्री, १५. डा. जयदेव-वेदालङ्कारश्च।

**अन्ताराष्ट्रियसंस्कृतविद्वान् -** श्रीजार्जकार्डोना

**पालि/प्राकृत-भाषायाम् -** आचार्यः सुदर्शनलालजैनः

**२०१२ तमस्य वर्षस्य महर्षिबादरायणव्याससम्मानप्राप्तकर्तारः ( संस्कृतभाषायाम् ) -** १. डा. परमानन्दझाः, २. डा. के.ई. मधुसूदनन्, ३. डॉ. विष्णुकान्तपाण्डेयः, ४. डा. शत्रुघ्नत्रिपाठी च।

**पालि/प्राकृत-भाषायाम् -** डा. रजनीशशुक्लः

**२०१३ तमस्य वर्षस्य राष्ट्रपतिसम्मानपत्रप्राप्तकर्तारः ( संस्कृतभाषायाम् ) -**

१. आचार्यः सुब्बरायनपेरि, २. डा. कृष्णलालः, ३. डा. हंसाबेन एन. हिण्डोचा, ४. आचार्यः (डा.) चन्द्रकान्तशुक्लः, ५. आचार्यः मल्लिकार्जुन बी. परड्डी, ६. श्रीमोहनगुप्तः, ७. आचार्यः मिथिलाप्रसादत्रिपाठी, ८. आचार्यः अलेखचन्द्रषडङ्गी, ९. पद्मशास्त्री (पद्मदत्त ओझा शास्त्री), १०. डॉ. गणेशीलालसुथरः, ११. डॉ. प्रशस्यमित्रशास्त्री, १२. श्रीभगीरथप्रसादत्रिपाठी 'वागीशशास्त्री', १३. आचार्यः जयशङ्करलालत्रिपाठी च।



२०१३ तमे वर्षे राष्ट्रपतिसम्मानप्राप्तकर्तॄणां विदुषां किञ्चन समूहचित्रम्

**अन्ताराष्ट्रियसंस्कृतविद्वान् -** डा. राबर्ट पी. गोल्डमैनः

**पालि/प्राकृत-भाषायाम् -** आचार्यः भिक्षुसत्यपालः

**२०१३ तमस्य वर्षस्य महर्षिबादरायणव्याससम्मान-प्राप्तकर्तारः ( संस्कृतभाषायाम् ) -** १. डा. बलराम-शुक्लः, २. डा. धनञ्जयवासुदेवद्विवेदी, ३. श्री कृ. वेङ्कटेशमूर्तिः, ४. आचार्यः नीरजशर्मा ५. डा. उपेन्द्र-कुमारत्रिपाठी च।

**पालि/प्राकृत-भाषायाम् -** डा. अनेकान्तकुमारजैनः



उद्घाटनावसरस्य किञ्चन् दृश्यम्

## समायोजितः संस्कृतनाट्यमहोत्सवः

राष्ट्रियसंस्कृतसंस्थाने प्रतिवर्षम् आयोज्यमानः अन्तःपरिसरीयसंस्कृतनाट्यस्पर्धारूपः संस्कृतनाट्यमहोत्सवः ऐषमः ०१-०३ फरवरी, २०१४ मिते काले नवदेहलीस्थे हिन्दूमहाविद्यालयस्य प्रेक्षागृहे सोत्साहं समायोजितः। वर्षेऽस्मिन् समायोजितोऽयं एकादशः संस्कृतनाट्यमहोत्सवः आसीत्। प्रतिवर्षम् अभिनवैः नाट्यप्रयोगैश्च समायोज्यमानेऽस्मिन् संस्कृतनाट्यमहोत्सवे अस्मिन् पर्याये संस्कृतनाटिकानां प्रयोगः मञ्चे नीतः।

संस्कृतनाट्यमहोत्सवस्यास्य उद्घाटनसमारोहः ०१.०२.२०१४ दिनाङ्के प्रवृत्तः। अस्मिन् उद्घाटनसमारोहे सारस्वतातिथित्वेन प्रो. दीप्तित्रिपाठी मुख्यातिथित्वेन प्रो. अभिराजराजेन्द्रमिश्रः च समुपस्थितौ। कार्यक्रमस्य आध्यक्ष्यं संस्थानकुलपतिना प्रो. ए.पी. सच्चिदानन्देन निर्व्यूढम्।

अत्र सर्वपरिसरच्छात्रैः पूर्वरङ्गः प्रस्तुतः। ततः अस्मिन्नेव दिने इलाहाबादपरिसरेण प्रमद्वरा, पुरीपरिसरेण चन्द्रकला, भोपालपरिसरेण वृषभभुजा च मञ्चे अभिनयं नीताः। ततः ०२.०२.२०१४ दिनाङ्के मुम्बईपरिसरेण मृगाङ्कलेखा, जम्मूपरिसरेण मणिमञ्जरी, बलाहरपरिसरेण विद्योत्तमा, त्रिपुरापरिसरेण अनार्कली शृङ्गेरीपरिसरेण कर्पूरमञ्जरी च अभिनीताः। ततः ०३.०२.२०१४ दिनाङ्के लखनऊपरिसरेण प्रियदर्शिका, जयपुरपरिसरेण रत्नावली, गुरुवायूरपरिसरेण शृङ्गारमञ्जरी चेति नाटिकाः मञ्चिताः।

संस्कृतनाट्यमहोत्सवस्य समापनसमारोहः पुरस्कारप्रदानोत्सवश्च ०३.०२.२०१४ दिनाङ्के सायंकाले आयोजितः। अस्मिन् समापनसमारोहे सारस्वतातिथित्वेन प्रो. अभिराजराजेन्द्रमिश्रः विशिष्टातिथित्वेन प्रो. हरिराम आचार्यः च समुपस्थितौ अभवताम्। अवसरेऽस्मिन् संस्थानकुलपतिना प्रो. ए.पी. सच्चिदानन्देन आध्यक्ष्यं निर्व्यूढम्।

संस्कृतनाट्यमहोत्सवोऽयं वस्तुतः परिसरीयच्छात्राणां कृते स्वीयामभिनयकलां प्रस्तोतुं परिष्कर्तुं च कश्चन अपूर्व एव मञ्चः वर्तते। अन्तःपरिसरीयनाट्यस्पर्धात्वात् अस्य परिणामोऽपि प्रदर्श्यते। अतः देशस्य प्रख्याताः नाट्यविशारदाः प्रतिवर्षं निर्णायकरूपेण समाहूयन्ते। अस्मिन् पर्याये इमे निर्णायकत्वेन आहूताः आसन्- १. डा. कमल-वसिष्ठः, २. डा. एस.आर्. लीला, ३. आचार्यः सी.एस. आर्. कृष्णमूर्तिः, ४. आचार्यः अभिराजराजेन्द्रमिश्रः, ५. आचार्यः शिवरामशर्मा च।

अस्मिन् पर्याये इमे परिसराः नाट्योत्सवे प्रथम-द्वितीय-तृतीयक्रमेण पुरस्कारं प्राप्नुवन्-

१. श्रीराजीवगान्धीपरिसरः, शृङ्गेरी
भोपालपरिसरः, भोपालम्

२. क.जे. सौमेय्यापरिसरः, मुम्बई
गुरुवायूरुपरिसरः, त्रिश्शूर

३. एकलव्य-परिसरः, त्रिपुरा
जयपुरपरिसरः, जयपुरम्

सर्वोत्तमः अभिनेता – श्रीविनोदशर्मा (विदूषकः, विद्योत्तमा, बलाहारपरिसरः)

सर्वोत्तमा अभिनेत्री – चन्द्रेशशर्मा (राधा, वृषभानुजा, भोपालपरिसरः)

सर्वश्रेष्ठनिर्देशनम् – डॉ. राघवेन्द्रभट्टः, डॉ. सूर्यनारायणभट्टः (कर्पूरमञ्जरी, शृङ्गेरीपरिसरः)

सर्वश्रेष्ठसङ्गीतनिर्देशनम् – श्रीसंजयद्विवेदी (वृषभानुजा, भोपालपरिसरः)

सर्वश्रेष्ठप्रकाशव्यवस्थापनम् – श्रीसूर्यहेब्बारः (कर्पूरमञ्जरी, शृङ्गेरी)

सर्वश्रेष्ठमाहार्य मञ्चव्यवस्थापनञ्च – भोपालपरिसरः (वृषभानुजा, भोपालपरिसरः)

प्रतिपरिसरं प्रथम-द्वितीय-तृतीयपुरस्काराः इत्थं वर्तन्ते–

गङ्गानाथझापरिसरः, इलाहाबाद – अभिषेकपाण्डेयः, देवेन्द्रकुमारदूबे, रचनाश्रीवास्तव

श्रीसदाशिवपरिसरः, पुरी – नवनीतकृष्णन्, भवतोषत्रिपाठी, ज्ञानलिप्साप्रियदर्शिनी



पूर्वरङ्गं प्रस्तुवन्तः कुशीलवाः



निर्णायकाय कमलवसिष्ठाय पुष्पगुच्छं प्रयच्छन् कुलपतिः प्रो. ए.पी. सच्चिदानन्दः

भोपालपरिसरः, भोपालम् – आयुषदीक्षितः, कल्याणीफगरे, चन्द्रेशशर्मा
मुम्बईपरिसरः, मुम्बई – अनिलजोशी, वरुणसौरभपौखरियालः, अश्वनीकदम
श्रीरणवीरपरिसरः, जम्मू – पुरुषोत्तमदासः, गोवर्धनकुमारः, रोहितकुमारः
वेदव्यासपरिसरः, बलाहार – विनोदशर्मा, मीनाक्षीशर्मा, कञ्चनाकुमारी
एकलव्यपरिसरः, त्रिपुरा – कवितासिन्हा, प्रदीपपाण्डेय, अनिलपण्ड्या
शृङ्गेरीपरिसरः, शृङ्गेरी – मञ्जुनाथभट्टः, रविशङ्करभट्ट के.एस., सिन्धूरभट्टः
लखनऊपरिसरः, लखनऊ – शालिनी, विदुषी, अमितकुमारद्विवेदी


विजेतृ-गणस्य एकं चित्रम्

## त्रिदिवसीया नाट्यशास्त्रीया राष्ट्रिया शोधसंगोष्ठी

राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरे २७.०३.२०१४ दिनाङ्कतः २९.०३.२०१४ दिनाङ्कं यावत् 'नाट्यशास्त्रस्य लोकधर्मि-नाट्यधर्मि-परम्पराणामन्तःसम्बन्धः' इति विषयम् अधिकृत्य परिसरस्य प्राचार्यस्य प्रो.आजादमिश्रस्य आध्यक्ष्येण डॉ. धर्मेन्द्रकुमारसिंहदेवस्य समन्वयकत्वेन त्रिदिवसीया नाट्यशास्त्रीया राष्ट्रिया शोधसंगोष्ठी सम्प्रवर्तिता। अस्याः उद्घाटनसमारोहे मध्यप्रदेश-आदिवासि-लोककला-परिषदः महासचिवः प्रो.कपिलतिवारी मुख्यातिथिपदमलंमकरोत्। तेन रङ्गमञ्चस्य भारतीय-कलायाश्च जीवनदर्शनमधिकृत्य विश्वधरातले नाट्यस्य लोकधर्मिता प्रयोगधर्मिता नाट्यधर्मिता च प्रकटीकृताः। तत्र च उद्घाटन-समारोहे विशिष्टातिथिपदमलकुर्वाणः नवदेहलीस्थः राष्ट्रीयनाट्यविद्यालयस्य निदेशकः प्रो.के.एस.राजेन्द्रन् नाट्यशास्त्रस्य उत्पत्तिकालाद् अद्यावधि चलचित्रजगद्यावत् प्रयोगपरम्परां समाख्यातवान्। अध्यक्षत्वेन विराजमानः राष्ट्रपतिसम्मानिताः आचार्य-पद्मश्री-रमाकान्तशुक्ल नाट्यस्य शास्त्रीयं प्रायोगिकं च पक्षं समुद्घाटितवान्। सर्वेषां स्वागतं विधाय प्राचार्येण संगोष्ठ्याः विषयप्रवर्तनं कृतम्।

अत्र च सम्मेलने दश शोधपत्रवाचनसत्रेषु चत्वारिंशदधिकशतं (१४०) शोधपत्राणि प्रस्तुतानि। अपि च त्रिषु विशिष्टव्याख्यानसत्रेषु विषयविशेषज्ञाः शिमलास्थः प्रो.अभिराजराजेन्द्रमिश्रः, दिल्लीस्थः प्रो.के.एस.राजेन्द्रन्, दिल्लीस्थः प्रो. रमाकान्तशुक्लः, ग्वालियरस्थः प्रो. कमलवशिष्ठः, भोपालस्थः प्रो. कपिलतिवारी, प्रो. वसन्तनिगुणे, प्रो. मूलारामजोशी, प्रो. प्रभुदयालमिश्रः, प्रो. सतीशमेहता, प्रो. विजयबहादुरसिंहः, प्रो. उदयनवाजपेयीप्रमुखाः सारगर्भितं व्यापकं व्याख्यानं साङ्गोपाङ्गं कृतवन्तः।

तत्र च शोधपत्रवाचनेषु सत्रेषु हिमाचल-हरिद्वार-दिल्ली-कानपुर-वाराणसी-जयपुर-पुरी-कोलकाता-शृंगेरी-उदयपुर-इन्दौर-उज्जैन-शिवपुरीतः पञ्चविंशतिः(२५) आमन्त्रिताः विद्वांसः उपस्थिताः आसन्। विंशतिः(२०) स्थानीया भोपालस्य अपि विषयविशेषज्ञाः अत्र आमन्त्रिताः विद्वांसः समुपस्थिताः। अपि च विंशतिः(२०) परिसरीयाः प्राध्यापकाः शोधपत्रं प्रस्तुतवन्तः। किञ्च पञ्चसप्तति(७५)संख्यकाः शोधच्छात्र-शिक्षाचार्यच्छात्रा अन्ये च सहभागिनः समागत्य शोधपत्राणि पठितवन्तः।

अपि च, नाट्यस्य प्रयोगधर्मिताम् उररीकृत्य सांस्कृतिककार्यक्रमेषु संगोष्ठ्याः प्रथमे दिने संस्कृत-संगीतसन्ध्या समायोजिता। तत्र च डॉ. सञ्जयद्विवेदिना स्वीयदलेन सह प्रो. आजादमिश्रस्य, रामकरणशर्मणः, अभिराजराजेन्द्रमिश्रस्य, राधावल्लभत्रिपाठिनः, रमाकान्तशुक्लस्य च गीतानि स्वसंयोजितेन ललितस्वरेण प्रस्तुतम्। ततः परिसरीयच्छात्राभिः संस्कृतेन सङ्गनृत्यं प्रस्तुतम्। द्वितीये दिवसे महाकवेर्भासस्य मध्यमव्यायोगनाट्यस्य प्रस्तुतिः परिसरस्य नाट्यशास्त्रानुसन्धान-केन्द्रस्य कुशीलवैः कृता।

त्रिदिवसीय-राष्ट्रिय-संगोष्ठ्याः समापनसमारोहे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरः प्रो. अभिराजराजेन्द्रमिश्रः नाट्यस्य लोकधर्मि-नाट्यधर्मिपरम्पराणामन्तसम्बन्धं सुरुचिरतया समुपस्थाप्य नाट्यात् चतुर्वर्गफलप्राप्तिर्जायते इति समुद्घोषितवान्। विशिष्टातिथिरूपेण उपस्थितः राष्ट्रियसंस्कृतसंस्थानस्य परीक्षानियन्त्रकः डॉ. गोपीरमणमिश्रः नाट्यस्य लोकानुरञ्जकत्वं विश्रान्तिजनकत्वं चादिकं विषयं समुपस्थापितवान्। आध्यक्षपदमलङ्कुर्वाणः परिसरस्य प्राचार्यः प्रो. आजादमिश्रः आगन्तुकानाम् अतिथीनां सम्माननम् अध्यक्षीयं व्याख्यानं च अकरोत्। प्रतिवेदनं च संगोष्ठ्याः समन्वयकेन धर्मेन्द्रकुमारसिंहदेवेन प्रस्तुतम्।

## सम्मानितः डा. अजयकुमारमिश्रः

वाराणसीस्थ-अखिलभारतीयविद्वत्परिषदा २५.१०.१३ दिनाङ्के नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठे कार्यरतः सहायकाचार्यः डा. अजयकुमारमिश्रः काव्यशास्त्रे तस्य योगदानार्थं युवप्रतिभासम्मानेन पुरस्कृतं। नूनमेव अस्य संस्कृतवाङ्मये विशिष्टयोगदानाय सम्मानप्राप्त्यर्थं च संस्थानपरिवारः तमभिनन्दति।


अजयकुमारमिश्रं सम्मानयन्तौ विद्वांसौ

## ऐषमः पण्डितराजसम्मानः डॉ. हर्षदेवमाधवाय

साहित्य-अकादेम्या दिल्लीस्थ-देववाणी-परिषदा च संयुक्ततत्त्वावधाने आयोजिते 'पण्डितराजजगन्नाथ : कवि तथा विचारक' इति शीर्षके परिसंवादे संस्कृतस्य सरसकवेः काव्यशास्त्रस्य प्रौढचिन्तकस्य अथ च मुगलसम्राजा शाहजहाँनेन पण्डितराजोपाधिना सम्मानितस्य जगन्नाथपण्डितस्य व्यक्तित्वं कर्तृत्वञ्च विमृशद्भिः देशस्य विश्रुतविद्वद्भिः तस्य सश्रद्धं स्मरणं कृतम्। १७.१०.२०१३ तमे दिनाङ्के साहित्य-अकादेम्याः सभागारे समायोजितेऽस्मिन् सत्रद्वयात्मके सारस्वतसत्रे एकतः अभिनवकाव्यशास्त्रस्य सम्भावना आधुनिकसंस्कृत-काव्यशास्त्रं चाश्रित्यव्याख्यानानि प्रदत्तानि अपरतश्च पण्डितराजजगन्नाथस्य काव्यांशानां पाठेन वातावरणं सरसमक्रियत।

उद्घाटनसत्रे वक्तृणाम् अतिथीनां च स्वागतं कुर्वाणेन साहित्य-अकादेम्याः सचिवेन श्रीमता के. श्रीनिवासरावेण हर्षो व्यक्तः यत् पण्डितराजजगन्नाथमवलम्ब्य आयोजितेऽस्मिन् परिसंवादे विद्वद्भिः समधिका रुचिः प्रदर्शिता। तेन अकादेम्या संस्कृतसाहित्यविषये कृतानां कार्यक्रमाणां परिचयोऽपि प्रदत्तः। साहित्य-अकादेम्या संस्कृतपरामर्शमण्डलस्य संयोजकेन आचार्यराधावल्लभत्रिपाठिना स्वकीये आधारवक्तव्ये समुदीरितं यत् पण्डितराजजगन्नाथः संस्कृतकवितायाः शास्त्रपरम्परायाश्च देदीप्यमानं नक्षत्रमस्ति यस्य कर्तृत्वं विंश्यामेकविंश्यां च शताब्द्यां सततमधिकाधिकं प्रासङ्गिकं भवदस्ति। एकतः कवितायां पण्डितराजजगन्नाथः बाण-भवभूति-शङ्कराचार्याणां कवित्वस्य उच्छ्रायं स्पृयति अपरतः काव्यचिन्तने आनन्दवर्धनात् अभिनवगुप्तात् च न्यूनं महत्त्वं न धारयति। पण्डितराजजगन्नाथं विलक्षणप्रतिभासम्पन्नं प्रख्यापयता तस्य रचनानां ग्रन्थानाञ्च सम्यगभ्यासस्य समीक्षायाश्च आवश्यकतां रेखाङ्कितवान्। आचार्य त्रिपाठी हर्षं व्यानक् यत् देववाणी-परिषद् विगतेभ्यः षड्विंशतिवर्षेभ्यः प्रत्यब्दं दिल्ल्यां शरत्पूर्णिमावसरे पण्डितराज-महोत्सवमायोजयति। अहमदाबादतः समागतेन प्रख्यातसंस्कृतविदुषा आचार्यहर्षदेवमाधवेन 'नव्यकाव्यशास्त्रस्य सम्भावनाः' इति विषयमवलम्ब्य भाषमाणेन पण्डितराजजगन्नाथोत्तरं प्रणीतानाम् आचार्याभिराज-राजेन्द्रमिश्र-आचार्यशङ्करदेवशर्मावतरे-आचार्यरेवाप्रसादद्विवेदि-आचार्यराधावल्लभत्रिपाठिप्रभृतीनां काव्यशास्त्रीयग्रन्थानां स्वयं प्रणीतस्य 'वागीश्वरीकण्ठसूत्रस्य' च अवदानं चर्चितम्। संस्कृतविदुषा डॉ. हरिराममिश्रेण पण्डितराजजगन्नाथम् आधुनिकसंस्कृतकाव्यशास्त्रं चाश्रित्य विचारा व्यक्ताः।

एकदिवसीयस्यास्य परिसंवादस्योद्घाटनसत्रस्य अध्यक्षता प्रख्यातहिन्दीसमालोचकेन डॉ. नामवरसिंहेन निर्व्यूढा। तेन स्वकीये अध्यक्षीयवक्तव्ये संस्कृतकाव्यशास्त्रस्य बन्धनमुक्तिराकांक्षिता ध्वनिसिद्धान्तस्य सीमानं समवगत्य अलङ्कारेण संरचनावादिनः काव्यशास्त्रस्य निर्माणस्य सम्भावनासु प्रकाशः प्रक्षिप्तः। तेनोक्तं यत् पण्डितराजसदृशाणां विचारकाणां चिन्तनं नव्यसाहित्यस्य नूतनानि प्रतिमानानि घटयितुमपि उपादेयमस्ति।

डॉ. मुकुन्दकामशर्मणा स्वकीये अध्यक्षीयवक्तव्ये पण्डितराजजगन्नाथस्य ऐतिहासिकपृष्ठभूम्याः विस्तरशः चर्चा कृता। तेन जहाँगीर-शाहजहाँ-दाराशिकोहैः सह पण्डितराजजगन्नाथस्य सम्बन्धे विशदः प्रकाशः प्रक्षिप्तः। तेनोक्तं यत् पण्डितराजः मुगलराजसभायां स्थित्वापि तत्सीमाबद्ध एव नातिष्ठत्। तेन कामरूपे (असमराज्ये) राज्ञः प्राणनारायणस्य राजसभापि विभूषिता। पण्डितराजजगन्नाथो वस्तुतः देशस्य साम्प्रदायिकसौहादर्स्यस्य, हिन्दुमुस्लिमैक्यस्य राष्ट्रियैक्यस्य च प्रतीकोऽस्ति। अस्मिन् अवसरे दिल्लीस्थ-देववाणी-परिषदा प्रतिवर्षं दीयमानः पण्डितराजसम्मानः अस्मिन् वर्षे प्रख्यातसंस्कृतकवये काव्यशास्त्रचिन्तकाय डॉ. हर्षदेवमाधवाय अदीयत। साहित्याकादम्याः संस्कृतपरामर्शमण्डलस्य संयोजकेन, राष्ट्रियसंस्कृतसंस्थानस्य पूर्वकुलपतिना अथ च देववाणीपरिषदः पूर्वाध्यक्षेण आचार्यराधावल्लभ-त्रिपाठिना, डॉ. मुकुन्दकामशर्मणा देववाणी-परिषन्महासचिवेन डॉ. रमाकान्तशुक्लेन च एकादशसहस्रं रूप्यकाणि, ऊर्णावस्त्रं, सम्मानपत्रं श्रीफलं च सम्मानस्वरूपं डॉ. हर्षदेवमाधवाय समर्पितानि।

गुजरातराज्यस्य भावनगरजनपदे २०.१०.१९५४ तमे दिनाङ्के लब्धजन्मा डॉ. हर्षदेवमाधवः विश्रुतः संस्कृतकविः किञ्च काव्यशास्त्रकर्तास्ति।अहमदाबादनगरे असौ एच.के. आर्ट्स कालेजे संस्कृतविभागाध्यक्षोऽस्ति। अयं साहित्याकादम्या पुरस्कृतः संस्कृतकविरस्ति। अस्य अनेके ग्रन्थाः प्रकाशिताः सन्ति येषु-निष्क्रान्ताः सर्वे, रथ्यासु जम्बुवर्णानां शिराणाम्, अलकनन्दा, शब्दानां निर्मक्षिकेषु ध्वंसावशेषेषु, मृगया आसीच्च मे मनसि, मूको रामगिरिर्भूत्वा, भाति ते भारतम्, व्रणो रूढग्रन्थिः, भावस्थिराणि जननान्तरसौहृदयानि, तव स्पर्शे स्पर्शे, ऋषेः क्षुब्धे चेतसि, कण्णक्या क्षिप्तं माणिक्यनूपुरम्, मृत्युशतकम्, कल्पवल्ली, स्पर्शलज्जा कोमलास्मृतिः, पुरा यत्र स्रोतः, कालोऽस्मि, सुषुम्नायां निमग्ना नौका, सुधासिन्धोर्मध्ये, मनसो नैमिषारण्यम्, पिपिलिका विपणीं गच्छति, मृत्युरयं कस्तूरीमृगः, बृहन्नला प्रमुखाः सन्ति। अनेन काव्यसंकलनानि उपन्यासा, कथा, नाटकानि, प्रतिकाव्यानि, बालकाव्यानि, दैनन्दिनी अन्याश्च काव्यविधा प्राणीयन्त। 'वागीश्वरीकण्ठसूत्रम्' अस्य काव्यशास्त्रीयो ग्रन्थोऽस्ति। सप्ततिप्रायाः ग्रन्थानां रचयित्रा डॉ. हर्षदेवमाधवेन देशेविदेशे च विश्वसंस्कृतसम्मेलनस्य अनेकेषु अधिवेशनेषु सहभागित्वं निर्व्यूढम्। अस्य रचना अजस्रा, गैर्वाणी, भारती, भारतोदयः, स्वरमंगला, विश्वभाषा, संविद्, दूर्वा, अर्वाचीनसंस्कृतम्, देवसायुज्यम्, संस्कृतसंवादः इत्यादिषु अनेकेषु सावधिकपत्रेषु प्राकाश्यं गताः। अनेन संस्कृते गजलगीतानि, हाइकूकाव्यानि, सीजोकाव्यानि ताङ्काकाव्यानि च प्रणीय साहित्यिकानामभिनन्दनानि अर्जितानि।

# विद्यावारिधिः इत्युपाधिमधिगताः शोधच्छात्राः

राष्ट्रिय-संस्कृत-संस्थानस्य परीक्षानुभागतः (अधिसूचना संख्या-३०/२०१३ अनुसारं) जुलाई, २०१३ तः साम्प्रतं यावत् ३४ शोधच्छात्राः विद्यावारिधिः (पीएच.डी.) इति शोधोपाधिमधिगतवन्तः। एतेषां विवरणमित्थं वर्तते-

| क्रम संख्या | गवेषकः/पत्रावली | मार्ग-निदेशकः | शोधविषयः/शास्त्रम् | परिसरः | वाक्-परीक्षा-तिथिः |
|---|---|---|---|---|---|
| १. | कु. श्रद्धाञ्जलिमहापात्र (९८८) | डॉ. रञ्जितकुमार-वर्मन् | ईशादिदशोपनिषत्सु अद्वैततत्त्वविचारः | पुरी | ०३.०५.२०१३ |
| २. | श्रीमानसशरणतिवारी (१००६) | डॉ. बनमालीबिश्वाल | सौन्दर्यलहर्याः प्रकाशित-टीकानां तुलनात्मकं समीक्षात्मकञ्चाध्ययनम् | इलाहाबाद | ०६.०५.२०१३ |
| ३. | भगवानसहायशर्मा (१००३) | प्रो. अर्कनाथचौधरी | लघुशब्देन्दुशेखरस्य पञ्चसन्ध्यन्त-भागस्य चिदस्थिमालाज्योत्स्नाटीकयोस्तुलनात्मकमध्ययनम् | जयपुरम् | २६.०६.२०१३ |
| ४. | बलदेवव्यासः (१०१४) | डॉ. उमाकान्त-चतुर्वेदी | कविवरराधावल्लभत्रिपाठिविरचित-काव्यकृतीनां समीक्षात्मकमनुशीलनम् | जयपुरम् | ०५.०७.२०१३ |
| ५. | सुश्री ईशितासिन्हा (९५५) | डॉ. ललितकुमार-त्रिपाठी | निम्बार्कप्रणीतवेदान्तपारिजातसौरभस्य इतरभाष्यैः सह तुलनात्मकमध्ययनम् | नवदेहली | ११.०७.२०१३ |
| ६. | मनोजकुमारशर्मा (९९६) | डॉ. श्रीधरमिश्रः | द्वितीयाध्यायस्थशब्दकौस्तुभकाशिका-वृत्योः तुलनात्मकमध्ययनम् | जयपुरम् | ११.०७.२०१३ |
| ७. | कन्हैयालालकुलदीपः (९८६) | डॉ. श्रीधरमिश्रः | पञ्चसन्ध्यन्तलघुशब्देन्दुशेखरस्य षट्टीकानां तुलनात्मकमध्ययनम् | जयपुरम् | ११.०७.२०१३ |
| ८. | सुरेन्द्रसिंहराजावतः (९९१) | प्रो. अर्कनाथचौधरी | लघुशब्देन्दुशेखरस्य पञ्चसन्ध्यन्तस्य अभिनवचन्द्रिकाटीकायाः समीक्षात्मकमध्ययनम् | जयपुरम् | १२.०७.२०१३ |
| ९. | विनोदकुमारपाण्डेयः (१०२१) | डॉ. बनमालीबिश्वाल | गोविन्दचन्द्रपाण्डेय-प्रणीतस्य भागीरथिकाव्यस्य समीक्षात्मकमध्ययनम् | इलाहाबाद | २२.०७.२०१३ |
| १०. | श्रीविकासः (१००५) | डॉ. मदनमोहनपाठकः | यवनाचार्यस्य षोडषयोगानां प्रायोगिकमध्ययनम् | नवदेहली | २६.०७.२०१३ |
| ११. | कु. गौरी रमन् (९८५) | डॉ. श्री एस. राधा | श्रीमती मेलपुदूरनारायणभट्टतिरिणः राजसूयप्रबन्धस्य समीक्षा विमर्शश्च | मुम्बई | २६.०७.२०१३ |
| १२. | षिबु ओ. वि. (१००८) | डॉ. आर. प्रतिभा | श्रीनारायणगुरुविरचितकृतिषु भक्तिस्वरूपसमीक्षा | गुरुवायूर | ०१.०८.२०१३ |
| १३. | प्रमोदभट्टः (१०२०) | डॉ.सि.एस.एस. नरसिंहमूर्तिः | शाब्दिकचिन्तामणेः चतुर्थदिसप्त-मान्ताह्निकानां सम्पादनमध्ययनमन्व। | शृंगेरी | १६.०८.२०१३ |
| १४. | उपेन्द्रभार्गवः (१०१९) | डॉ. हंसधरझाः | ग्रहभगणानां समीक्षात्मकमध्ययनम् | भोपालम् | ३०.०८.२०१३ |
| १५. | अशोककुमारः (९६९) | प्रो. विद्यानन्दझाः | नागेशमथुरानाथशास्त्रिविरचित-टीकायोरालोके पण्डितराजजगन्नाथस्य अलंकारशास्त्रे योगदानम् | जम्मू | १३.०९.२०१३ |
| १६. | विष्णुकान्तत्रिपाठी (१००२) | डॉ. शैलकुमारी मिश्रः | पुराणप्रतिपादितदाम्पत्यसम्बन्धानां समाजशास्त्रीयाध्ययनम् | इलाहाबाद | १०.०९.२०१३ |
| १७. | परमेशकुमारशर्मा (१०१३) | डॉ. वाई.एस. रमेशः | अर्वाचीनव्याकरणशिक्षणाधिगम-प्रणाल्याः समीक्षात्मकमध्ययनम् | जयपुर | १८.०९.२०१३ |
| १८. | नीलिमा (१००१) | डॉ. विश्वम्भरनाथ-गिरिः | वैदिकसंहितासु वर्णितानां स्त्रीदेवतानां परवर्तिसाहित्ये स्वरूपभेदविमर्शः | इलाहाबाद | १८.०९.२०१३ |
| १९. | अरुणकुमारः (१०००) | डॉ. हंसधरझाः | आचार्यवराहमिहिरविरचितायां बृहत्संहितायां पर्यावरणचिन्तनम् | भोपालम् | २०.०९.२०१३ |

| | | | | | |
|---|---|---|---|---|---|
| २०. | प्रियव्रतमिश्रः (१०१६) | प्रो. रामानुजदेवनाथन् | पाणिनीयशब्दानुशासन-हेमचन्द्रशब्दानुशासनयोः तौलनिकं विमर्शात्मकञ्चाध्ययनम् | शृंगेरी | २७.०९.२०१३ |
| २१. | उदितनारायणः (१०२४) | प्रो. अर्कनाथचौधरी | भारतीयदर्शनेषु प्रमाणान्तर्भाववादस्य समीक्षात्मकमध्ययनम् | जयपुरम् | ०४.१०.२०१३ |
| २२. | सुश्रीकविताटाक (१०१२) | डॉ. रामकुमारशर्मा | काव्यप्रकाशविवरणस्य समीक्षात्मकमध्ययनम् | जयपुरम् | २१.१०.२०१३ |
| २३. | विनोदकुमारशर्मा (१०२६) | प्रो. सुदेशकुमारशर्मा | राजस्थानराज्यस्य शिक्षकप्रशिक्षणमहा-विद्यालयीयसंस्कृतशिक्षकप्रशिक्षकेषु सामाजिकमूल्यानामध्ययनम् | पुरी | २३.१०.२०१३ |
| २४. | अजयकुमारः (१०३३) | प्रो. पी.एन. शास्त्री | नवमकक्षसंस्कृतछात्राणां वाचिकाधिगमे सामाजिकमनोवैज्ञानिककारकाणां प्रभावविश्लेषणम् | भोपालम् | २४.०४.२०१४ |
| २५. | शारदा कुमारी (१०५०) | प्रो. सुदेशकुमारशर्मा | धर्मकीर्तिकृतरूपावतारस्य धातुप्रत्यय-पञ्चिकाया आर्धधातुकपरिच्छेदस्य शिक्षणविधिदृष्ट्या समीक्षणम् | जयपुरम् | २४.०४.२०१४ |
| २६. | गीता आर्य (१०१०) | डॉ. के.पी. केशवन् | स्वतन्त्रासंग्रामे संस्कृतज्ञानामवदानम् | जयपुरम् | २९.०४.२०१४ |
| २७. | कृष्णन के.वि. (१००७) | डॉ. आर. प्रतिभा | क्रियासारस्य समीक्षात्मकमध्ययनम् | गुरुवायूर | ३०.०५.२०१४ |
| २८. | अमूल्यकुमारमहापात्रः (१०५९) | डॉ. जि. गङ्गन्ना | योगवासिष्ठे निर्वाणप्रकरणेताराद्धप्रतिपादिता-ऽद्वैततत्त्वानां समीक्षणम् | पुरी | १०.०६.२०१४ |
| २९. | कान्हुचरणपण्डा (१०१५) | डॉ. उमेशशन्द्रमिश्रः | आधुनिकसन्दर्भे व्याकरणशिक्षणविधीनां समीक्षणम् | पुरी | १६.०६.२०१४ |
| ३०. | कपिलकुमारभार्गवः (१०४६) | डॉ. नीलाभतिवारी | नैतिकमूल्य-महत्वाकांक्षा-सामाजिकार्थिक-स्तराकाणां सम्बन्धे छात्राणं शैक्षिकोपलब्धेः अध्ययनम् | भोपालम् | १०.०७.२०१४ |
| ३१. | अमितमिश्रः (१०५७) | प्रो. खेगेश्वरमिश्रः | नित्याचारक्रमसूचिकायाः समीक्षात्मकं संपादनम् | पुरी | १४.०७.२०१४ |
| ३२. | मनीषकुमारपाण्डेयः (१०३७) | प्रो. लोकमान्यमिश्रः | अध्यापकानां सांवेगिकाध्यात्मिकप्रज्ञयोः विद्यार्थिनामुपलब्धिसन्दर्भेऽध्ययनम् | लखनऊ | १६.०७.२०१४ |
| ३३. | सुमितकुमारशर्मा (१०७२) | डा. बत्तीलालमीना | सर्वकारीय-तदितरमाध्यमिकविद्यालयाद्य-नामध्यापकैः प्रयुज्यमानायाः शैक्षिकप्रौद्योगित्याः विद्यालयीयवातावरणे छात्रोपलब्धौ च सम्भाव्यस्य प्रभावस्य अध्ययनम् | जयपुरम् | २४.०७.२०१४ |
| ३४. | विनोदकुमारतिवाड़ी (१०५५) | प्रो. रमाकान्तपाण्डेयः | नाट्यशास्त्रालोके महामहोपाध्यायरेवाप्रसाद-द्विवेदप्रणीतस्य नाट्यानुशासनग्रन्थस्य समीक्षणम् | जयपुरम् | ३१.०७.२०१४ |

## हरियाणासंस्कृतविद्यापीठे वनमहोत्सवः

२४.०८.२०१३ दिनाङ्के बघौलास्थ-हरियाणासंस्कृतविद्यापीठे विद्याप्रचारिणीसभा-लायन्सक्लबयोः संयुक्त-तत्त्वावधाने संस्कृतसप्ताहानन्तर्गततया वनमहोत्सवः समाचरितः। वनमहोत्सवेऽस्मिन् विद्यापीठे वृक्षारोपणकार्यक्रमः सम्पन्नः। कार्यक्रमे अतिथयः समितिसदस्याश्च समुपस्थाय वृक्षारोपणमकुर्वन्। कार्यक्रमे मुख्यभाषणे संस्कृतविद्यापीठस्यास्य प्राचार्यः डॉ. श्रेयांशद्विवेदी वृक्षाणां महत्त्वं प्रत्यपादयत्।

संस्कृतसप्ताहाङ्गतया विद्यापीठे श्लोकोच्चारणस्पर्धाऽपि समायोजिताऽभवत्। कार्यक्रमसञ्चालनं डॉ. पशुपतिनाथमिश्रोऽकरोत्।

# कुलपति-दैनन्दिनी

| | |
|---|---|
| ०९.०७.२०१३ | उज्जयिनीस्थ-महर्षिसान्दीपनिवेदविद्याप्रतिष्ठानस्य शासीपरिषदो वित्तसमितेः च उपवेशने समुपस्थितिः। |
| १६.०७.२०१३ | साहित्य-अकादेम्या समायोजिते सामवेदसम्मेलने आध्यक्ष्यम्। |
| १९.०७.२०१३ | नवदेहल्यां भारतीयविद्याभवने ग्रन्थलोकार्पणसमारोहे समुपस्थितिः। |
| २४.०७.२०१३ | नवदेहलीस्थ-होटल मेरीडियन इत्यत्र हिन्दीराजभाषासंसदीयसमित्युपवेशने समुपस्थितिः। |
| २८.०७.२०१३ | बेङ्गलूरुनगरे राष्ट्रियसंस्कृतसंस्थानस्य स्थितिविषये समायोजिते उपवेशने समुपस्थितिः। |
| ०२.०८.२०१३ | आर्थिकानुदानसमितेः उपवेशने आध्यक्ष्यम्। |
| ०३.०८.२०१३ | नवदेहल्यां टैगोरगार्डनस्थ-केन्द्रीयविद्यालयस्य विद्यालयप्रबन्धनसमितेः आध्यक्ष्यम्। |
| ०६.०८.२०१३ | श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे सङ्गोष्ठ्यां समुपस्थितिः। |
| ०९.०८.२०१३ | उत्तरप्रदेशसंस्कृतसम्मेलनविषये मानवसंसाधनविकासराज्यमन्त्रिणा जीतिनप्रसादेन सह उपवेशनम्। |
| १३.०८.२०१३ | नवदेहल्यां रवीन्द्रभवनस्थ-साहित्याकादम्या सभाभवने उत्तरक्षेत्रीयमण्डलस्य उपवेशने समुपस्थितिः। आचार्यः राधावल्लभत्रिपाठी राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिपदे कार्यकालं पर्यपूरयत्। |
| १४.०८.२०१३ | आचार्यः ए.पी. सच्चिदानन्दः राष्ट्रियसंस्कृतसंस्थानस्य प्रभारिकुलपतिपदस्य दायित्वं अध्यगृह्णत्। |
| १६.०८.२०१३ | बेङ्गलूरुनगरे संस्कृतसङ्गमे समुपस्थितिः। |
| १९.०८.२०१३ | संस्थानमुख्यालये संस्थानं केन्द्रीयविश्वविद्यालयत्वेन परिवर्तयितुम् आयोजिते सम्मेलने समुपस्थितिः। |
| २०.०८.२०१३ | राष्ट्रियसंग्रहालये संस्कृतदिवसमहोत्सवे आध्यक्ष्यम्। |
| २१.०८.२०१३ | संस्कृतविश्वविद्यालयानां कुलपतीनां सम्मेलने आध्यक्ष्यम्। |
| २२.०८.२०१३ | संस्कृतसप्ताहोत्सवस्य सम्पूर्तिसमारोहे आध्यक्ष्यम्। |
| २४-२५.०८.२०१३ | विज्ञानभवने दिल्लीसंस्कृताकादम्या आयोजिते अन्ताराष्ट्रिये संस्कृतसम्मेलने समुपस्थितिः। |
| २६.०८.२०१३ | उत्तरप्रदेशसंस्कृतसम्मेलनविषये लखनऊपरिसरप्राचार्येण अधिकारिभिश्च सह उपवेशनम्। |
| २९.०८.२०१३ | जवाहरलालनेहरुविश्वविद्यालये समायोजिते संस्कृतसम्मेलने समुपस्थितिः। |
| ३०.०८.२०१३ | शास्त्रिभवने मानवसंसाधनविकासराज्यमन्त्रिणः श्रीजीतिनप्रसादस्य आध्यक्ष्ये उत्तरप्रदेशसंस्कृतसम्मेलनविषये आयोजिते उपवेशने समुपस्थितिः। |
| ०७.०९.२०१३ | लखनऊपरिसरे उत्तरप्रदेशसंस्कृतसम्मेलनविषये समायोजिते उपवेशने आध्यक्ष्यम्। |
| १३.०९.२०१३ | लखनऊनगरे आधुनिके युगे संस्कृतस्य महत्त्वविषये समायोजिते संस्कृतसम्मेलने समुपस्थितिः। |
| १६.०९.२०१३ | शृङ्गेरीपरिसरस्य निरीक्षणम्। |
| १७-३०.०९.२०१३ | अवकाशे। |
| ०३.१०.२०१३ | संस्थानमुख्यालये युवमहोत्सवविषये गुरुवायूरु-लखनऊ-अगरतलापरिसराणां प्राचार्यैः संस्थानाधिकारिकारिभिश्च सह उपवेशने आध्यक्ष्यम्। |
| ०९.१०.२०१३ | राष्ट्रपतिभवने तमिलसम्मानसमारोहे समुपस्थितिः। |
| १५.१०.२०१३ | संस्थानस्य स्थापनादिवसकार्यक्रमे आध्यक्ष्यम्। |
| १७.१०.२०१३ | संस्थाने अविकसितवर्गाणाम् (ओ.बी.सी. वर्गाणाम्) आरक्षणविषये आयोजिते उपवेशने आध्यक्ष्यम्। |
| २५.१०.२०१३ | लखनऊपरिसरे युवमहोत्सवस्य समुद्घाटनम्। |
| २७.१०.२०१३ | प्राचार्योपवेशने आध्यक्ष्यम्। |
| २८.१०.२०१३ | युवमहोत्सवस्य सम्पूर्तिसमारोहे आध्यक्ष्यम्। |
| ३१.१०.२०१३ | राजधानीमहाविद्यालये संस्कृतसमारोहे काव्यावली-कार्यक्रमे समुपस्थितिः। |
| ०५.११.२०१३ | तिरुपतिस्थ-राष्ट्रियसंकृतविद्यापीठे उपवेशने समुपस्थितिः। |

| | |
|---|---|
| ०६.११.२०१३ | सर्वनवल्ल्यां राजराजेश्वरी संस्कृतमहाविद्यालये राज्यस्तरीयसंस्कृतोत्सवे मुख्यातिथित्वम्। |
| ०७.११.२०१३ | लखनऊनगरे कुलपतिसम्मेलने समुपस्थितिः। |
| १८.११.२०१३ | इलाहाबादपरिसरस्य स्थापनादिवससमारोहे समुपस्थितिः। |
| २८.११.२०१३ | वित्तसमितेः उपवेशनस्य आध्यक्ष्यम्। |
| २९.११.२०१३ | प्रबन्धनसमितेः उपवेशनस्य आध्यक्ष्यम्। |
| ०३.१२.२०१३ | नवदेहल्यां महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानस्य वित्तसमितेः शासीपरिषदश्च उपवेशने समुपस्थितिः। |
| ०५.१२.२०१३ | बेङ्गलूरुस्थ-आदर्शशोधसंस्थाने ग्रन्थलोकार्पणोत्सवे मुख्यातिथ्यम्। |
| ०९.१२.२०१३ | नवदेहल्यां भारतीयविद्याभवनेन समायोजिते संस्कृतसम्मेलने समुपस्थितिः। |
| १०.१२.२०१३ | अनौपचारिकसंस्कृतशिक्षणस्य उपवेशने आध्यक्ष्यम्। |
| ११.१२.२०१३ | आन्तरिकगुणवत्तसंवर्धनप्रकोष्ठस्य उपवेशने आध्यक्ष्यम्। |
| १२.१२.२०१३ | लखनऊनगरे उत्तरखण्डस्य कुलपतीनाम् उपवेशने समुपस्थितिः। |
| १७.१२.२०१३ | वाराणस्याम् अखिलभारतीयव्यासमहोत्सवे सारस्वतातिथ्यम्। |
| २३.१२.२०१३ | राष्ट्रपतिसम्मानसमारोहस्य विषये राष्ट्रपतिसचिवालये उपवेशने समुपस्थितिः। |
| २४.१२.२०१३ | भारतीयसांस्कृतिकसम्बन्धपरिषदा विदेशेषु संस्कृताचार्याणां प्रतिनियुक्तिविषये नामिका-निर्धारणसमितेः उपवेशने समुपस्थितिः। |
| २६.१२.२०१३ | तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य शैक्षणिकपरिषदः उपवेशने समुपस्थितिः। |
| २७.१२.२०१३ | अनौपचारिकसंस्कृतशिक्षणस्य उपवेशने समुपस्थितिः। |
| २८.१२.२०१३ | विश्वविद्यालयानुदानायोगस्य स्वर्णजयन्त्युत्सवे समुपस्थितिः। |
| ३१.१२.२०१३ | प्रकाशनसमितेः उपवेशनस्य आध्यक्ष्यम्। |
| ०२.०१.२०१४ | उत्तराखण्ड-राज्यीय-संस्कृतस्पर्धा-कार्यक्रमस्याद्घाटनावसरे आध्यक्ष्यम्। |
| ०६.०१.२०१४ | वसन्तोत्सवस्यायोजनविषये समाहूतस्योपवेशनस्याध्यक्ष्यम्। |
| ०७.०१.२०१४ | राष्ट्रियसंस्कृतसंस्थानस्य शोधमण्डलस्य उपवेशने आध्यक्ष्यम्। |
| १०.०१.१४ | राष्ट्रियसंस्कृतसंस्थानस्य प्रबन्धनमण्डलस्य उपवेशने आध्यक्ष्यम्। |
| ११-१२.०१.१४ | एकोनविंशतितमे 'ग्लोरी-फेस्ट-२०१४' इति कार्यक्रमे समुपस्थितिः।<br>प्रज्ञान-गौरव-सम्मानेन सम्मानितः। |
| १७.०१.२०१४ | राष्ट्रपतिभवने संस्कृत-पालि/प्राकृत-अरबी-फारसी-भाषाणां कृते समायोजिते राष्ट्रपतिसम्मानकार्यक्रमे समुपस्थितिः। |
| २६.०१.२०१४ | राष्ट्रपतिभवने अभिनन्दनकार्यक्रमे समुपस्थितिः। |
| ३०.०१.२०१४ | राष्ट्रियसंस्कृतसंस्थाने परीक्षामण्डलस्योपवेशने आध्यक्ष्यम्। |
| ३१.०१.२०१४ | राष्ट्रियसंस्कृतसंस्थाने भवननिर्माणविषये आयोजिते उपवेशने आध्यक्ष्यम्। |
| ०१.०२.२०१४ | हिन्दूमहाविद्यालये समायोजिते वसन्तोत्सवकार्यक्रमे उद्घाटनसत्रे आध्यक्ष्यम्। |
| ०२.०२.२०१४ | हिन्दूमहाविद्यालये समायोजिते वसन्तोत्सवकार्यक्रमे समुपस्थितिः। |
| ०३.०२.२०१४ | हिन्दूमहाविद्यालये समायोजिते वसन्तोत्सवकार्यक्रमे समापनसत्रे आध्यक्ष्यम्। |
| ०४.०२.२०१४ | राष्ट्रियसंस्कृतसंस्थाने सहायकाचार्याणां वरिष्ठवेतनमानविषये समाहूते उपवेशने आध्यक्ष्यम्। |
| ०६.०२.२०१४ | द्वितीयसंस्कृतायोगस्य अध्यक्षेण सह तस्य निवासे प्रारम्भिकचर्चा विहिता। |
| ११.०२.२०१४ | द्वितीयसंस्कृतायोगस्य अध्यक्षेण सह तस्य निवासे उपवेशनम्। |
| २४.०२.२०१४ | डॉ. एन.आर्. कण्णन्-महोदयः प्रभारिकुलपतिरूपेण प्रभारग्रहणमकरोत्। |
| २५.०२.२०१४ | भोपालपरिसरे अखिलभारतीयशास्त्रीयस्पर्धाकार्यक्रमे उद्घाटनसत्रे आध्यक्ष्यम्। |

| | |
|---|---|
| २८.०२.२०१४ | भोपालपरिसरे अखिलभारतीयशास्त्रीयस्पर्धाकार्यक्रमे समापनसत्रे आध्यक्ष्यम्। |
| ०३.०३.२०१४ | शृङ्गेरीपरिसरे सारस्वतातिथित्वम्। |
| ०५.०३.२०१४ | तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य दीक्षान्तसमारोहे समुपस्थितिः। |
| ०८.०३.२०१४ | देहल्यां राष्ट्रियसंस्कृतसंस्थाने संस्कृतानूदितसाहित्य-विषयिण्याः राष्ट्रियसङ्गोष्ठ्याः उद्घाटनकार्यक्रमे आध्यक्ष्यम्। |
| १०.०३.२०१४ | देहल्यां राष्ट्रियसंस्कृतसंस्थाने संस्कृतानूदितसाहित्य-विषयिण्याः राष्ट्रियसङ्गोष्ठ्याः समापनसत्रे आध्यक्ष्यम्। |
| ११.०३.२०१४ | आर्थिकानुदानसमितेः उपवेशने समुपस्थितिः। |
| १४.०३.२०१४ | लखनऊ-परिसरे वार्षिकोत्सवावसरे आध्यक्ष्यम्। |
| १८.०३.२०१४ | द्वितीय-संस्कृतायोगस्य उपसमितेः उपवेशने समुपस्थितिः। |
| १९.०३.२०१४ | जम्मूपरिसरे वार्षिकोत्सवे आध्यक्ष्यम्। |
| २०.०३.२०१४ | द्वितीय-संस्कृतायोगस्य उपवेशने समुपस्थितिः। |
| २३.०३.२०१४ | पुरीपरिसरे वार्षिकोत्सवे आध्यक्ष्यम्। |
| २५.०३.२०१४ | पुरीस्थ-श्रीजगन्नाथसंस्कृतविश्वविद्यालये समायोजितायां सङ्गोष्ठ्यां मुख्यातिथित्वम्। |
| २७.०३.२०१४ | जयपुरपरिसरे राष्ट्रियसङ्गोष्ठ्याम् उद्घाटनसत्रे आध्यक्ष्यम्। |
| ३१.०३.२०१४ | संस्थानस्य छात्रवृत्ति-समित्युपवेशने आध्यक्ष्यम्। |
| ०१.०४.२०१४ | मानवसंसाधनविकासमन्त्रालयस्य भाषिकसचिवेन सह उपवेशनम्। |
| ०२.०४.२०१४ | राष्ट्रियसंस्कृतसंस्थानस्य परिसरप्राचार्योपवेशने आध्यक्ष्यम्। |
| ०४.०४.२०१४ | राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालयस्य कर्मचारिभिः अधिकारिभिश्च सह उपवेशनम्। |
| ०९.०४.२०१४ | प्रशासनपरामर्शदातृ-पदस्य साक्षात्कारे आध्यक्ष्यम्। |
| ११.०४.२०१४ | आदर्शसंस्कृतमहाविद्यालयस्य पर्यवेक्षणसमितेः उपवेशने आध्यक्ष्यम्। |
| १२.०४.२०१४ | हरिद्वारे आदर्शसंस्कृतमहाविद्यालये वेदान्तसङ्गोष्ठ्यामाध्यक्ष्यम्। |
| २१.०४.२०१४ | अहोबिलमठ-आदर्शसंस्कृतमहाविद्यालये वेदान्तभाषणकार्यक्रमे मुख्यवक्तव्यम्। |
| २२.०४.२०१४ | अहोबिलमठ-आदर्शसंस्कृतमहाविद्यालये प्रशासन-वित्तानुभागयोः उपवेशने समुपस्थितिः। |
| ३०.०४.२०१४ | टैगोर-गार्डनस्थ-केन्द्रीयविद्यालयस्य विद्यालयप्रबन्धनसमितेः उपवेशने आध्यक्ष्यम्। |
| ०१.०५.२०१४ | राष्ट्रियसंस्कृतसंस्थाने शैक्षणिक-अशैक्षणिकपदानां स्थायीकरणस्योपवेशने आध्यक्ष्यम्। |
| ०६.०५.२०१४ | टैगोरगार्डनस्थ-केन्द्रीयविद्यालयस्य वार्षिकोत्सवे आध्यक्ष्यम्। |
| ०७.०५.२०१४ | मानवसंसाधनविकासमन्त्रालयस्य भाषिकसंयुक्तसचिवेन सह उपवेशनम्। |
| १२-१३.०५.१४ | तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठे कस्मिंश्चित् कार्यक्रमे समुपस्थितिः। |
| १६.०५.२०१४ | राष्ट्रियसंस्कृतसंस्थानस्य केन्द्रीयानुसन्धानमण्डलस्योपवेशने आध्यक्ष्यम्। |
| २१.०५.२०१४ | मन्त्रालये संयुक्तसचिवेन सह उपवेशनम्। |
| २४.०५.२०१४ | तिरुपतिस्थ-देवस्थान-संस्कृतमण्डलस्योपवेशने समुपस्थितिः। |
| २८.०५.२०१४ | राष्ट्रियसंस्कृतसंस्थाने मुक्तस्वाध्यायपीठस्य अभिकल्पसमितेः उपवेशने आध्यक्ष्यम्। |
| २९.०५.२०१४ | राष्ट्रियसंस्कृतसंस्थाने परामर्शदातृपदस्य साक्षात्कारे आध्यक्ष्यम्। |
| ३०.०५.२०१४ | आर्.के. कौशिकस्य (अनुभागाधिकारिणः) सेवानिवृत्तिकार्यक्रमे आध्यक्ष्यम्। |
| ०३.०६.२०१४ | पी.वी. चन्द्रशेखरस्य न्यायालयीयप्रकरणस्योपवेशने आध्यक्ष्यम्। |
| ०४.०६.२०१४ | राष्ट्रियसंस्कृतसंस्थानस्य शैक्षणिकपरिषदः उपवेशने आध्यक्ष्यम्। |
| १७.०६.२०१४ | संस्कृत-पालि/प्राकृतभाषाणां राष्ट्रपतिसम्मानस्य प्राथमिकसंवीक्षासमितेः उपवेशने समुपस्थितिः। |
| २६.०६.२०१४ | राष्ट्रियसंस्कृतसंस्थानस्य वित्तसमितेः उपवेशने आध्यक्ष्यम्। |
| ३०.०६.२०१४ | विद्यालयशिक्षासचिवेन सह उपवेशने समुपस्थितिः। |

## संस्थानविदुषां कार्यकलापाः

**प्रो.के.बी.सुब्बरायुडु** – अगरतलास्थ-एकलव्यपरिसरस्य प्राचार्यः सितम्बरमासस्य १३ दिनाङ्कात् १५ दिनाङ्कं यावत् लखनऊनगरे आधुनिकयुगे संस्कृतस्य महत्त्वम् इत्यस्मिन् विषये मानवसंसाधनविकासमन्त्रालयेनायोजिते राष्ट्रियसम्मेलने भागमग्रहीत्।

**प्रो. अर्कनाथचौधरी** – लखनऊपरिसरे प्राचार्यः प्रो. अर्कनाथचौधरी उत्तरप्रदेशसंस्कृतसंस्थानेन वाल्मीकिजयन्त्युत्सवम् आलक्ष्य १८.१०.२०१३ इत्यस्मिन् दिनाङ्के समायोजिते समारोहे अध्यक्षीयभाषणमकरोत्। २७.१०.२०१३ दिनाङ्के युवमहोत्सवायोजनदिवसेष्वेव समायोजितस्य प्राचार्योपवेशनस्य संयोजनमकरोत्। ततः ऑक्टोबरमासि २१-२२ इति दिनाङ्कयोः परिसरे अखिलभारतीयसंस्कृतवाक्स्पर्धायाः कृते राज्यस्तरीयचयनस्पर्धायाः आध्यक्ष्यं निर्व्यूढवान्। तदनन्तरं नोवेम्बरमासि द्वादशे दिनाङ्के 'शिक्षा और नैतिकता पर वैदिक चिन्तन' इति विषयमवलम्ब्य 'WAVES' द्वारा आयोजिते सप्तदशे 'Indian Conference' इत्यस्य उद्घाटनसमारोहे विशिष्टातिथिरूपेण व्याख्यानं प्रास्तौत्।

**प्रो. पी.एन. शास्त्री** – जम्मूपरिसरे प्राचार्यः आचार्यः पी.एन. शास्त्री १३.०९.१३ तः १५.१०.१३ पर्यन्तं लखनऊपरिसरेण समायोजितायाम् राष्ट्रियसंगोष्ठ्यां भागमग्रहीत्। २३.१०.१३ तः २७.१०.२०१३ पर्यन्तं लखनऊपरिसरे युवमहोत्सवे भागमग्रहीत्। १०.११.२०१३ दिनाङ्के जम्मूस्थ-अम्फला गोपाष्टमीमहोत्सवे गोपाष्टमीवैशिष्टविषये व्याख्यानं प्रादात्। १६.११.२०१३ दिनाङ्के जम्मूस्थ-गान्धिनगरकेन्द्रीयविद्यालये बालदिवसोत्सवे मुख्यातिथिरूपेण समुपस्थितः आसीत्। २३.११.२०१३ दिनाङ्के वेदव्यासपरिसरेण समायोजितायां राजस्तरीयस्पर्धायां मुख्यातिथिरूपेण समुपस्थितिः आसीत्। ११.१२.२०१३ मुख्यालये आन्तरकमूल्यांकनगुणवत्तासंवर्धनसमितेः उपवेशने समुपस्थितिः।

**डा. एन. आर. कण्णन्** –शृङ्गेरीपरिसरप्राचार्यः डा. एन.आर. कण्णन् १३.०९.१३ तः १५.०९.१३ पर्यन्तं लखनऊ-नगरे प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां भागमग्रहीत्। १०.१२.२०१३ तमे दिनाङ्के तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे श्री श्रीनिधिस्वामिनां शतजयन्त्युत्सवसन्दर्भं पुरस्कृत्य प्रवृत्ते सम्मेलने सत्राध्यक्षरूपेण भागमग्रहीत्।

**प्रो. रमाकान्तपाण्डेयः** – मुक्तस्वाध्यायपीठस्य निदेशकः आचार्यः रमाकान्तपाण्डेयः विभिन्नशिक्षणसंस्थासु दशाधिकव्याख्यानानि प्रादात्। तेषु काशीहिन्दूविश्वविद्यालये गोरखपुरविश्वविद्यालये साहित्याकादेम्यां जोधपुरविश्वविद्यालये दिल्लीविश्वविद्यालये च प्रदत्तानिव्याख्यानानि मुख्यानि सन्ति। सः बह्वीषु राष्ट्रियसङ्गोष्ठीषु शोधपत्राण्यपि प्रास्तौत्।

**प्रो. रामकुमारशर्मा** – जयपुरपरिसरे साहित्यविभागाध्यक्षः प्रो. रामकुमारशर्मा १७.०८.१३ दिनाङ्के कविसपर्या-कार्यक्रमे हरिरामाचार्यस्य कविताः अवलम्ब्य नवदेहलीस्थमुख्यालये वक्तव्यम् अददात्। १३.०९.१३ दिनाङ्कतः १५.०७.१३ दिनाङ्कं यावत् 'आधुनिकयुगे संस्कृतस्य महत्त्वम्' इति विषयसम्बद्धतायां राष्ट्रियसङ्गोष्ठ्यां लखनऊपरिसरे भागमगृह्णात्। २२.०७.१३ दिनाङ्के जयपुरस्थगीताबजाजबालमन्दिरसंस्थाने मोतीडूङ्गरी इति स्थाने गुरुपूर्णिमापर्वणि गुरुमहत्त्वमवलम्ब्य व्याख्यानमकरोत्। ०९.०७.१३ दिनाङ्के जयपुरस्थ-राजस्थानसंस्कृताकादमीद्वारा आयोजिते कार्यक्रमे भट्टमथुरानाथशास्त्रि-सम्माननं शिक्षामन्त्रिणा ब्रजकिशोरशर्मणः करकमलाभ्यामगृह्णात्।

**प्रो. बनमाली बिश्वालः** – २३.०८.२०१३ तः २५.०८.२०१३ यावद् दिल्ली-संस्कृत-अकादम्यामायोजिते त्रिदिवसीये अन्ताराष्ट्रिय-संस्कृत-सम्मेलने व्याकरणसत्रे 'वाक्यपदीये प्रतिपादितस्य शब्दतत्त्वस्य व्यावहारिकः पक्षः' इति विषयमधिकृत्य गङ्गानाथ-झा-परिसरस्य व्याकरणविभागाचार्यः प्रो. बनमाली बिश्वालः शोधपत्रं प्रस्तुतवान्। तत्र च तेन दर्शनविषयकस्य एकस्य सत्रस्य सञ्चालनमपि कृतम्। तत्र च तेन एकस्य सत्रस्य अध्यक्षता अपि कृता। १८.१०.२०१३ दिनाङ्कात् २०.१०.२०१३ यावत् काशी-हिन्दू-विश्वविद्यालये आयोजिते स्वातन्त्र्योत्तर-संस्कृत-वाङ्मयस्य रचनाधर्मिता इति विषयके त्रिदिवसीये राष्ट्रियसम्मेलने 'स्वातन्त्र्योत्तर संस्कृत लघुकथा - दशा और दिशा' इति विषमधिकृत्य शोधपत्रं प्रस्तुतवान्। तत्र च तेन एकस्य सत्रस्याध्यक्ष्यं निर्वोढं तथा राष्ट्रियकविसमवाये च काव्यमपि प्रस्तुतम्।

**प्रो. जनार्दनप्रसादपाण्डेयः** – १८-२०.१०.२०१३ तमेषु दिनाङ्केषु काशी-हिन्दू-विश्वविद्यालये आयोजिते स्वातन्त्र्योत्तर-संस्कृत-वाङ्मयस्य रचनाधर्मिता इति विषयके त्रिदिवसीये राष्ट्रियसम्मेलने गङ्गानाथ-झा-परिसरस्य साहित्यविभागाचार्यः प्रो. जनार्दनप्रसादपाण्डेयः शोधपत्रं प्रस्तुतवान्, एकस्य सत्रस्याध्यक्ष्यं निर्वोढवान् तथा राष्ट्रियकविसमवाये च काव्यं प्रस्तुतवान्। २५.११.२०१३ दिनाङ्कात् २९.११.२०१३ यावत् राष्ट्रिय-संस्कृत-संस्थानस्य गङ्गानाथझापरिसरे नवदिल्लिस्थ-राष्ट्रीय-शिक्षक-अनुसन्धान-परिषदा (N.C.E.R.T) आयोजितायां संस्कृतसाहित्येतिहासविषयिण्यां पञ्चदिवसीय-कार्यगोष्ठ्यां भागं गृहीत्वा आवश्यकपरामर्शं दत्तवान्।

**प्रो. कमलचन्द्रयोगी** – जयपुरपरिसरे अध्यापकः प्रो. कमलचन्द्रयोगी देहलीदेववाणीपरिषदा आयोजितस्य सङ्कल्पदिवसस्यावसरे केदारनाथत्रासदी इति विषयमवलम्ब्य स्वरचितकाव्यम् अश्रावयत्। प्रोन्नतिं प्राप्य आचार्यपदं च अलङ्कृतवान्।

**प्रो. सत्यमकुमारी** – जयपुरपरिसरे अध्यापिका प्रो. सत्यमकुमारी २३.०८.१३ तः २५.०८.१३ दिनाङ्कं यावत् देहलीस्थसंस्कृताकादम्या प्रायोजिते त्रिदिवसीयान्ताराष्ट्रियसंस्कृतसम्मेलने गीतायाम् आचारमीमांसामवलम्ब्य शोधपत्रं प्रस्तुतवती।

**प्रो. श्रीयांशकुमारसिंघई** – जयपुरपरिसरे अध्यापकः प्रो. श्रीयांशकुमारसिंघई १९ तः २१ जुलाईपर्यन्तं जयपुरपरिसरे समायोजितायाः राष्ट्रियप्राकृतसङ्गोष्ठ्याः संयोजनं कृतवान्, शोधपत्रं च प्रस्तुतवान्। दिल्लीस्थ श्रीदिगम्बरजैनसभाद्वारा २३ तः २५ अगस्तदिनाङ्केषु समायोतिजायां सङ्गोष्ठ्यां पुरुषार्थसिद्ध्युपाये सम्यक्त्वसम्यऽज्ञानयोः कार्यकारणमीमांसा इति विषयमादाय शोधपत्रं प्रस्तुतवान्।

**प्रो. कमलेशकुमारजैनः** – जयपुरपरिसरस्य अध्यापकोऽयं प्रो. कमलेशकुमारजैनः दिल्लीस्थश्रीदिगम्बरजैनसभाद्वारा २३ तः २५ अगस्तपर्यन्तमायोजितायां राष्ट्रियपुरुषार्थसिद्ध्युपायविद्वत्सङ्गोष्ठ्यां ''सम्यग्दर्शन और उसके अंग'' इति विषयमधिकृत्य शोधपत्रं प्रस्तुतवान्।

**डॉ. धर्मेन्द्रकुमारजैनः** – जयपुरपरिसरस्थः डा. धर्मेन्द्रकुमारजैनः दिल्लीस्थदिगम्बरजैनसभाद्वारा २३ तः २५ अगस्तपर्यन्तप्रचालितायां राष्ट्रियसङ्गोष्ठ्यां ''मकारत्रय एवं पंचांदुम्बरफल अभक्ष्य क्यों?'' विषयमवलम्ब्य शोधपत्रं प्रास्तौत्।

**श्रीरामेश्वरशर्मा** – श्रीरामेश्वरशर्मा देहलीसंस्कृताकादम्या आयोजिते त्रिदिवसीये (२३ तः २५ अगस्तपर्यन्तम्) अन्ताराष्ट्रिये सम्मेलने ''वैदिकवाङ्मये वास्तुशास्त्रचिन्तनम्'' विषयमवलम्ब्य शोधपत्रं प्रास्तौत्, देहलीस्थजवाहरलालनेहरुविश्वविद्यालये सितम्बरमासे २१ दिनाङ्के समायोजिते विश्वशान्तिविषयकसम्मेलने 'भारतीय संस्कृति एवं ज्योतिष का विश्व शान्ति में योगदान' विषयमवलम्ब्य शोधपत्रं प्रस्तुतवान्।

**श्रीपरमेशकुमारशर्मा** – जयपुरपरिसरस्य शिक्षाशास्त्रविभागे अतिथिशिक्षकत्वेन अध्यापयन् परमेशकुमारशर्मा प्रो. वाई. एस. रमेशस्य मार्गदर्शने "अर्वाचीनव्याकरणशिक्षाणाधिगमप्रणाल्याः समीक्षणात्मकमध्ययनम्" इति शीर्षकाधान्वितः 'विद्यावारिधि' इति उपाधिं प्राप्नोत्।

**डा. रेखापाण्डेय** – जयपुरस्थ-कनोडियामहिलामहाविद्यालये सितम्बरमासस्य १६ दिनाङ्के 'निज भाषा उन्नति अहे' विषयोपरि समायोजितायां राष्ट्रीयसङ्गोष्ठ्यां डा. रेखापाण्डेय 'भाषा और संस्कृति'' इति विषयमवलम्ब्य शोधपत्रं प्रस्तुतवती। अस्याः 'कथा' नाम्नी हिन्दीपत्रिकायां पत्रद्वयं प्रकाशितम्।

**डा. टी. महेन्द्रः** – मुक्तस्वाध्यायपीठे सहायकाचार्योऽयं २३.०८.२०१३ तः २६.०८.२०१३ पर्यन्तं दिल्ली संस्कृतअकादम्या अन्ताराष्ट्रियसम्मेलने शोधपत्रं प्रास्तौत्। २१.०९.२०१३ दिनाङ्के जवाहरलालनेहरुविश्वविद्यालयस्य विशिष्टसंस्कृताध्ययनकेन्द्रेण समायोजितायां अन्ताराष्ट्रियसङ्गोष्ठ्यां शोधपत्रं प्रास्तौत्। नवदेहल्यां राष्ट्रियसंस्कृतसंस्थाने ०८-१०.०३.२०१४ दिनाङ्केषु आयोजिते राष्ट्रियसम्मेलने शोधपत्रं समार्पयत्।

**प्रो. सुब्राय वि भट्टः** – शृङ्गेरीपरिसरेऽध्यापकोऽयं ०३.०८.१३ तः ०७.०८.१३ दिनाङ्कपर्यन्तं वेदान्तभारतीसंस्थया जपदकट्टे इत्यत्र आयोजितायां वेदान्तवाक्यार्थसभायां भागमगृहीत्। ०९.०९.१३ तः २०.०९.१३ दिनाङ्कपर्यन्तं दक्षिणाम्नाय-शृङ्गेरीश्रीशारदापीठे प्रवृत्तायां श्रीमहागणपतिवाक्यार्थसभायां भागं गृहीत्वा मीमांसाशास्त्रे वाक्यार्थं प्रादात्। २३.०९.१३ दिनाङ्के गुरुवायूरुपरिसरे प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां भागमगृहीत्। १४.१२.२०१३ तः १५.१२.२०१३ पर्यन्तं श्रीमैसूरुनगरे गणपतिसच्चिदानन्दाश्रमे प्रवृत्तायां वाक्यार्थसदसि भागं स्वीकृतवान्। १४.१२.२०१३ तः १५.१२.२०१३ पर्यन्तं चेन्नै-नगरे ब्रह्मविद्यापरिषत्पक्षतः राष्ट्रियशास्त्रार्थसदसि भागमग्रहीत्।

**प्रो. के.ई.मधुसूदनः** – शृङ्गेरीपरिसरेऽध्यापकोऽयं ०९.०९.१३ तः २०.०९.१३ दिनाङ्कपर्यन्तं दक्षिणाम्नाय- शृङ्गेरीश्रीशारदापीठे प्रवृत्तायां श्रीमहागणपतिवाक्यार्थसभायां भागं गृहीत्वा न्यायशास्त्रे हेत्वाभाससामान्यलक्षणम् इत्यस्मिन् विषये वाक्यार्थं प्रादात्। २७.०८.१३ दिनाङ्के कालट्यां श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालये प्रवृत्ते संस्कृतोत्सवसमापनकार्यक्रमे बीजभाषणम् अकरोत्। दिसम्बरमासस्य १८, १९ दिनाङ्कयोः श्री-शङ्कराचार्यसंस्कृतविश्वविद्यालयस्य तिरुवनन्तपुरस्थे अध्ययनकेन्द्रे पूर्वमीमांसाशास्त्रे प्रवृत्तायां राष्ट्रियकार्यशालायां विषयविशेषज्ञत्वेन भागमग्रहीत्।

**डा. ईश्वरभट्टः** – शृङ्गेरीपरिसरेऽध्यापकोऽयं २५.०७.१३ तः ३०.०७.१३ पर्यन्तं तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे सञ्चाल्यमानशास्त्रवारिधिवर्गे विषयविशेषज्ञत्वेन भागमगृह्णात्। ११.०९.१३ तमे दिनाङ्के गुरुवायूरुपरिसरे अतिथिप्राध्यापकानां साक्षात्कारार्थं विषयविशेषज्ञत्वेन भागमगृह्णात्। १८.०३.२०१४ तमे दिनाङ्के शृङ्गेरीपरिसरस्य ज्योतिषविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां सञ्चालको भूत्वा तत्रैव शोधपत्रमेकं प्रास्तौत्। २५.०३.२०१४ तः २७.०३.२०१४ पर्यन्तं संस्थानस्य जयपुरपरिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां शोधपत्रं प्रास्तौत्।

**डा. आर्. बालाजी** – शृङ्गेरीपरिसरे सहायकाचार्योऽयं ०४.११.२०१३ तः ०९.११.२०१३ पर्यन्तं भाग्यनगरस्थस्य जवाहरलालनेहरुतकनीकी विश्वविद्यालयस्य प्राध्यापकशिक्षणमहाविद्यालयेन "E Learning" इत्यस्मिन् विषये सञ्चालिते अल्पकालिकशिक्षावर्गे भागमग्रहीत्। १६.०३.२०१४ तः १७.०३.२०१४ पर्यन्तं विजयवाटिकायां प्रवृत्तवाक्यार्थगोष्ठ्यां भागमगृह्णात्। २३.०२.२०१४ तः २४.०२.२०१४ पर्यन्तं केरलस्थगुरुवायूरुपरिसरे प्रवृत्तायां शैक्षिकराष्ट्रियसंगोष्ठ्यां भागमगृह्णात्। २२.०३.२०१४ तमे दिनाङ्के शृङ्गेरीपरिसरस्य शिक्षाविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा प्राच्यपाश्चात्यविध्योः तुलना इति विषयमाश्रित्य शोधपत्रं प्रास्तौत्।

**डा. सि.एस्.एस्.एन्. मूर्तिः** – शृङ्गेरीपरिसरेऽध्यापकोऽयं ०९.०९.१३ दिनाङ्कतः २०.०९.१३ दिनाङ्कपर्यन्तं दक्षिणाम्नाय-शृङ्गेरी-श्रीशारदापीठे प्रवृत्तायां श्रीमहागणपतिवाक्यार्थसभायां भागं गृहीत्वा व्याकरणशास्त्रे वाक्यार्थं व्यदधात्। २३.०९.१३ तमे दिनाङ्के गुरुवायूरुपरिसरे प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां भागमगृहीत्। ५.१२.२०१३ दिनाङ्के त्रिपणत्तूररामवर्मसंस्कृतमहाविद्यालये व्याकरणनिरुक्तप्रातिशाख्यानां सन्दर्भे प्रवृत्तां राष्ट्रियसङ्गोष्ठीमुद्घाट्य कुञ्चिकाभाषणमकरोत्। १४.१२.२०१३ तः १५.१२.२०१३ पर्यन्तं मैसूरुनगरे गणपतिसच्चिदानन्दाश्रमे प्रवृत्तायां वाक्यार्थसदसि भागं स्वीकृत्य शास्त्राचार्य इति बिरुदं प्राप्नोत्।

**डा. चन्द्रकान्तः** – शृङ्गेरीपरिसरेऽध्यापकोऽयं २२.०७.१३तः ११.०८.१३ पर्यन्तं राजस्थानविश्वविद्यालये प्रवृत्ते पुनश्चेतनवर्गे भागमग्रहीत्। १३.०९.१३तः १५.०९.१३ पर्यन्तं लखनऊनगरे प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां भागमगृह्णात्। २२.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य शिक्षाविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां सत्राध्यक्षत्वेन भागं गृहीत्वा व्याख्याविधिमाश्रित्य शोधपत्रं प्रास्तौत्। ०३.०३.२०१४ तः ०५.०२.२०१४ दिनाङ्कपर्यन्तं भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीतवान्।

**डा. चन्द्रशेखरभट्टः** – शृंगेरीपरिसरेऽध्यापकोऽयं ०९.०९.१३तः २०.०९.१३ दिनाङ्कपर्यन्तं दक्षिणाम्नाय – शृङ्गेरी-श्रीशारदापीठे प्रवृत्तायां

श्रीमहागणपतिवाक्यार्थसभायां भागं गृहीत्वा व्याकरणशास्त्रे वाक्यार्थं व्यदधात्। नवम्बरमासस्य २१, २२ दिनाङ्कयोः सोमपुरस्य दत्ताश्रमे प्रवृत्तायां शास्त्रार्थसङ्गोष्ठ्यां भागमग्रहीत्। ०३.०३.२०१४ तमे दिनाङ्के भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा प्रमाणविषये पाणिनीयशास्त्रे गमकानि इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्। २५.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य व्याकरणविभागेन पाणिनीयः अतिदेशः इत्यस्मिन् विषये सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीतवन्तः। १०.०१.२०१४ तमे दिनाङ्के Idiomatic Expression in Sanskrit इत्यमु विषयमधिकृत्य बेङ्गळूरुनगरे प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां Idiomatic Expression in Ramayana इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्।

**डा. गणेश-ईश्वरभट्टः** – शृङ्गेरीपरिसरेऽध्यापकोऽयं ०९.०९.१३तः २०.०९.१३ दिनाङ्कपर्यन्तं दक्षिणाम्नाय- शृङ्गेरी-श्रीशारदापीठे प्रवृत्तायां श्रीमहागणपतिवाक्यार्थसभायां भागं गृहीत्वा वेदान्तशास्त्रे प्रादात्। २२.०७.१३ दिनाङ्के वेदसंवादः इति विषयमधिकृत्य प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा शोधपत्रं प्रास्तौत्। ०३.०८.१३ तः ०७.०८.१३ दिनाङ्कपर्यन्तं वेदान्तभारतीसंस्थया जपदकट्टे इत्यत्र आयोजितायां वेदान्तवाक्यार्थसभायां भागमग्रहीत्। ०४.११.२०१३ तः ०९.११.२०१३ पर्यन्तं श्रीस्वर्णवल्लीमठे प्रवृत्तायां स्वाराज्यसिद्धिचिन्तनगोष्ठ्यां भागं गृहीत्वा शोधपत्रं प्रास्तौत्।

**डा. नवीनहोळ्ळः** – शृङ्गेरीपरिसरेऽध्यापकोऽयं ०९.०९.१३ तः २०.०९.१३ दिनाङ्कपर्यन्तं दक्षिणाम्नाय- शृङ्गेरी-श्रीशारदापीठे प्रवृत्तायां श्रीमहागणपतिवाक्यार्थसभायां भागं गृहीत्वा न्यायशास्त्रे वाक्यार्थं प्रादात्। ०३.०३.२०१४ तमे दिनाङ्के भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीतवान्। २४.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य न्यायविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा प्राच्यनव्यन्यायसरण्योः वैलक्षण्यम् इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्।

**डा. कृष्णानन्तपद्मनाभम्** – शृङ्गेरीपरिसरेऽध्यापकोऽयं ०९.०९.१३तः २०.०९.१३ दिनाङ्कपर्यन्तं दक्षिणाम्नाय- शृङ्गेरी-श्रीशारदापीठे प्रवृत्तायां श्रीमहागणपतिवाक्यार्थसभायां भागं गृहीत्वा व्याकरणशास्त्रे वाक्यार्थं प्रादात्। जुलैमासे कर्नाटकसंस्कृतविश्वविद्यालयेन बेङ्गळूरुनगरे आयोजितायां अन्ताराष्ट्रिय-सङ्गोष्ठ्यां भागमग्रहीत्।

**डा. रामचन्द्रजोयिसः** – शृङ्गेरीपरिसरेऽध्यापकोऽयं १३.०९.१३तः १५.०९.१३ पर्यन्तं लखनऊ-नगरे प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां भागमगृह्णात्। २५.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य साहित्यविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा शोधपत्रं प्रास्तौत्। २७.०३.२०१४ तः २८.०३.२०१४ दिनाङ्कपर्यन्तं काञ्चीपुरस्थेन S.C.S.V महाविद्यालयेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां रससिद्धान्तविषये शोधपत्रं प्रास्तौत्।

**डा. वेङ्कटरमणभट्टः** – शृङ्गेरीपरिसरेऽध्यापकोऽयं २२.०७.२०१३तः ११.०८.२०१३ पर्यन्तं राजस्थानविश्वविद्यालये प्रवृत्ते पुनश्चेतनवर्गे भागमगृह्णात्।

**डा. वेङ्कटेशताताचार्यः** – शृङ्गेरीपरिसरेऽध्यापकोऽयं ०९.०९.१३तः २०.०९.१३ दिनाङ्कपर्यन्तं दक्षिणाम्नाय- शृङ्गेरी-श्रीशारदापीठे प्रवृत्तायां श्रीमहागणपतिवाक्यार्थसभायां भागं गृहीत्वा मीमांसाशास्त्रे वाक्यार्थं प्रादात्। ०३.०३.२०१४ तः ०५.०२.२०१४ दिनाङ्कपर्यन्तं भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा प्राभाकरमते प्रमाणानि इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्।

**डा. सोमनाथसाहुः** –शृङ्गेरीपरिसरेऽध्यापकोऽयं ०४.११.२०१३ तः ०९.११.२०१३ पर्यन्तं भाग्यनगरस्थस्य जवाहरलालनेहरुतकनीकी विश्वविद्यालयस्य प्राध्यापकशिक्षणमहाविद्यालयेन "E Learning" इत्यस्मिन् विषये सञ्चालिते अल्पकालिकशिक्षणवर्गे भागमग्रहीत्। दिसम्बरमासस्य २३, २४ दिनाङ्कयोः तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठेन आयोजितायां राष्ट्रियसंगोष्ठ्यां "विवेकानन्दीयशिक्षातत्त्वविमर्शः" इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्। ०३.०३.२०१४ तमे दिनाङ्के भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा अधिगमस्थिरीकरणे प्रत्यक्षप्रमाणस्य योगदानम् इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्।

**श्रीविनायकरजतभट्टः** – शृङ्गेरीपरिसरेऽध्यापकोऽयं १९.११.२०१३ दिनाङ्के गुरुवायूरुपरिसरे प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां "भगवद्गीतायां व्याकरणदर्शनविचारः" इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्। १८.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य ज्योतिषविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां ज्योतिषशास्त्रोक्तविविधयोगानां समीक्षणम् इत्यस्मिन् विषये शोधपत्रमेकं प्रास्तौत्। २५.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य व्याकरणविभागेन पाणिनीयः अतिदेशः इत्यस्मिन् विषये सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा Application of Analogy in Paninian Grammar इत्यस्मिन् विषये शोधपत्रमेकं प्रास्तौत्।

**श्री गणपति वि हेगडे** – शृङ्गेरीपरिसरेऽध्यापकोऽयं १९.११.२०१३ दिनाङ्के गुरुवायूरुपरिसरे प्रवृत्तायां राष्ट्रियसङ्गोष्ठ्यां "भगवद्गीतायां महावाक्यार्थ-विचारः" इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्।

**श्री. आर्. नवीनः** – शृंगेरीपरिसरेऽध्यापकोऽयं १७.१२.२०१३ तः २९.१२.२०१३ पर्यन्तं काञ्चीपुरस्थकाञ्चिकामकोटिपीठे वाक्यार्थसभायां भागमग्रहीत्।

**डा. राघवेन्द्रभट्टः** – ०३.०२.२०१४ संस्थानेन आयोजिते कौमुदीमहोत्सवे प्रदर्शितस्य शृङ्गेरीपरिसरीयसंस्कृतनाटकस्य निर्देशनं कृत्वा Best Director इति पुरस्कारं अवाप्नोत्। १२-१४.०३.२०१४ तमे दिनाङ्के संस्थानस्य लखनऊपरिसरेण सञ्चालितायाम् एकदिवसीयराष्ट्रियसङ्गोष्ठ्यां डा.एन्. लक्ष्मीनारायणभट्टविरचितायां कादम्बिन्यां सामाजिकचिन्तनम् इति विषयमधिकृत्य शोधपत्रं प्रास्तौत्। २८.०३.२०१४ तमे दिनाङ्के संस्थानस्य भोपालपरिसरेण सञ्चालितायाम् एकदिवसीयराष्ट्रियसङ्गोष्ठ्यां प्रयोगदृष्ट्या यक्षगानरूपकयोः अन्तःसम्बन्धः इति विषयमधिकृत्य शोधपत्रं प्रास्तौत्।

**श्रीमती कविता एस्** – शृङ्गेरीपरिसरेऽध्यापिकेयं २०.१२.२०१३ तः २२.१२.२०१३ शृङ्गेरीस्थे JCBM कलालये "हळगन्नड मत्तु नडुगन्नडद

भाषाबोधनक्रम" इति विषयमवलम्ब्य प्रवृत्तायां कार्यशालायां भागमग्रहीत्।

**डा. हरिप्रसाद के.** – २४.०१.२०१४ तमे दिनाङ्के केरलस्थगुरुवायूरुपरिसरे शिक्षाविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा वेदान्तशास्त्रदिशा व्यक्तित्वनिरूपणम् इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्। २४.०३.२०१४ तमे दिनाङ्के संस्थानस्य मुक्तस्वाध्यापीठस्य परिसरीयस्वाध्यायकेन्द्रेण सञ्चालितायां एकदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा दूरस्थशिक्षणसामग्रीनिर्माणसिद्धान्ताः इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्।

**डा. सूर्यनारायणभट्टः** – २४.०२.२०१४ तमे दिनाङ्के भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीय-राष्ट्रियसङ्गोष्ठ्यां शोधपत्रं प्रास्तौत्। २४.०३.२०१४ तमे दिनाङ्के परिसरस्य मीमांसाविभागेन सञ्चालितायाः एकदिवसीयराष्ट्रियसङ्गोष्ठ्याः संयोजकत्वेन कार्यमकरोत्। १८.०३.२०१४ तमे दिनाङ्के परिसरस्य मीमांसाविभागेन सञ्चालितायाम् एकदिवसीयराष्ट्रियसङ्गोष्ठ्यां शोधपत्रं प्रास्तौत्। २८.०३.२०१४ तमे दिनाङ्के संस्थानस्य जयपुरपरिसरेण सञ्चालितायाम् एकदिवसीयराष्ट्रियसङ्गोष्ठ्यां शोधपत्रं प्रास्तौत्।

**डा. गणेश टि पण्डितः** – ०३.०३.२०१४ तमे दिनाङ्के भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा पाश्चात्य-पौरस्त्यदर्शनेषु प्रमाणानि – साम्यं वैषम्यञ्च इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्।

**डा. वेङ्कटरमणभट्टः** – २२.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य शिक्षाविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा प्रश्नोत्तरविधिमाश्रित्य शोधपत्रं प्रास्तौत्। २४.०२.२०१४ तमे दिनाङ्के भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागग्रहणमकरोत्।

**श्री. शशिधर के.वि.** – ०३.०३.२०१४ तमे दिनाङ्के भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीतवान्। २२.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य शिक्षाविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा सङ्गणकसहकृताधिगममाश्रित्य शोधपत्रं प्रास्तौत्।

**श्री विनय एम्.एस्.** – २२.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य शिक्षाविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा Contribution of Teaching Methods in Contemporary Language Teaching" इति विषयमाश्रित्य शोधपत्रं प्रास्तौत्।

**श्रीमती कविता एस्.** – २४.०३.२०१४ तमे दिनाङ्के संस्थानस्य मुक्तस्वाध्यापीठस्य परिसरीयस्वाध्यायकेन्द्रेण सञ्चालितायां एकदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा शोधपत्रं प्रास्तौत्। ०३.०३.२०१४ तः ०५.०२.२०१४ दिनाङ्कपर्यन्तं भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीतवती।

**श्री. रवीश एन्. भट्टः** – २४.०३.२०१४ तमे दिनाङ्के संस्थानस्य मुक्तस्वाध्यापीठस्य परिसरीयस्वाध्यायकेन्द्रेण सञ्चालितायां एकदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा Concept Tools and Usage of E-Learning इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्। ०३.०३.२०१४ तः ०५.०२.२०१४ दिनाङ्कपर्यन्तं भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीतवान्।

**श्री. आर्. नवीनः** – ०३.०३.२०१४ तः ०५.०२.२०१४ दिनाङ्कपर्यन्तं भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीतवान्। २४.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य न्यायविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीतवान्।

**श्री. श्रीकर जि.एन्.** – ०३.०३.२०१४ तमे दिनाङ्के भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीतवान्। २६.०३.२०१४ तमे दिनाङ्के परिसरस्य वेदान्तविभागेन सञ्चालितायाम् एकदिवसीयराष्ट्रियसङ्गोष्ठ्यां शोधपत्रं प्रास्तौत्।

**श्री. मुरलीकृष्ण टि.** – १८.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य ज्योतिषविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा राजयोगः इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्। ०३.०३.२०१४ तः ०५.०२.२०१४ दिनाङ्कपर्यन्तं भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीतवान्।

**श्री. गणपति वि हेगडे** – २६.०३.२०१४ तमे दिनाङ्के परिसरस्य वेदान्तविभागेन सञ्चालितायाम् एकदिवसीयराष्ट्रियसङ्गोष्ठ्यां शोधपत्रं प्रास्तौत्। ०३.०३.२०१४ तमे दिनाङ्के भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीतवान्।

**डा. कोम्पेल्लि विनयकुमारः** – ०३.०३.२०१४ तमे दिनाङ्के भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा शाब्दव्यवहारस्य अनुमानात्मकत्वम् इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्। २५.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य साहित्यविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा खण्डान्वय-दण्डान्वयपद्धतिभ्यां काव्यबोधनम् इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्।

**डा. राजेशकुमारशुक्लः** – २४.०२.२०१४ तमे दिनाङ्के भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रिय-सङ्गोष्ठ्यां भागग्रहणमकरोत्। २४.०३.२०१४ तमे दिनाङ्के संस्थानस्य मुक्तस्वाध्यापीठस्य परिसरीयस्वाध्यायकेन्द्रेण सञ्चालितायां एकदिवसीय-राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा दूरस्थशिक्षण प्रक्रिया की जटिलताओं को दूर करने में पाठ्यसामग्री एवं पाठ्यक्रम का महत्त्व इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्।

**डा. कुमारभट्टः** – ०३.०३.२०१४ तमे दिनाङ्के भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां

भागं गृहीत्वा मनोविज्ञाने प्रमाणविचारः इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्। २२.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य शिक्षाविभागेन सञ्चालितायां राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा प्रयोजनविधिमाश्रित्य शोधपत्रं प्रास्तौत्। २४.०३.२०१४ तमे दिनाङ्के संस्थानस्य मुक्तस्वाध्यापीठस्य परिसरीय-स्वाध्यायकेन्द्रेण सञ्चालितायां एकदिवसीय- राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा दूरस्थशिक्षणप्रक्रियायाः विकासे पाठ्यसामग्रीणां भूमिका इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्।

**श्री. एम्.ए. प्रभाकरः** – ०३.०३.२०१४ तः ०५.०२.२०१४ दिनाङ्कपर्यन्तं भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीतवान्। २४.०३.२०१४ तमे दिनाङ्के संस्थानस्य मुक्तस्वाध्यापीठस्य परिसरीयस्वाध्यायकेन्द्रेण सञ्चालितायां एकदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा An outline of Study Materials in history of Distance Education शोधपत्रं प्रास्तौत्। १७.०३.२०१४ तः १९.०३.२०१४ पर्यन्तं चिक्कमगलूरुनगरस्थे M.E.S. महाविद्यालये अभिलेखशास्त्रविषये प्रवृत्ताया कार्यशालायां भागमग्रहीत्।

**डा. प्रमोदभट्टः** – ०३.०३.२०१४ तमे दिनाङ्के भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण सञ्चालितायां त्रिदिवसीयराष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा व्याकरणशास्त्ररीत्या प्रमाणविमर्शः इति विषयमवलम्ब्य शोधपत्रं प्रास्तौत्। २५.०३.२०१४ तमे दिनाङ्के परिसरस्यास्य व्याकरणविभागेन पाणिनीयः अतिदेशः इत्यस्मिन् विषये सञ्चालितायं राष्ट्रियसङ्गोष्ठ्यां भागं गृहीत्वा इच एकाचोऽम्प्रव्ययवच्च इति विषयमाश्रित्य शोधपत्रं प्रास्तौत्।

**डा. जयप्रकाशनारायणः** – राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये नवदेहल्याम् अध्यापकोऽयं देहलीसंस्कृताकादम्या आयोजिते त्रिदिवसीये अन्ताराष्ट्रिये शोधसम्मेलने २३-२५.०८.१३ दिनाङ्केषु 'संस्कृतवाङ्मये तकनीकीविज्ञानम्' इति विषयमाश्रित्य शोधपत्रं प्रास्तौत्। श्रीगुरुनानकदेवविश्व-विद्यालयामृतसरस्य संस्कृतविभागेन समायोजिते द्विदिवसीयराष्ट्रिये शोधसम्मेलने २७-२८ सितम्बर, २०१३ मिते काले 'हिन्दी राम-काव्य पर संस्कृत का प्रभाव' इति विषयमाधृत्य शोधपत्रं प्रास्तौत्।

**डा. प्रफुल्लगडपालः** – राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये मुक्तस्वाध्यायपीठे सहायकाचार्योऽयं २३-२५.०८.१३ इत्येतेषु दिनाङ्केषु देहलीसंस्कृताकादम्या आयोजिते त्रिदिवसीये अन्ताराष्ट्रिये शोधसम्मेलने 'आधुनिकसंस्कृतवाङ्मये बुद्धविजयकाव्यस्य स्थानं प्रासङ्गिकता च' इति विषयमाधृत्य शोधपत्रं प्रास्तौत्। इण्डोनेशियातः समागतानां षण्णां विदुषां कृते भोपाल, उज्जयिनी, साञ्ची, भीमबेटका, जयपुर, पुष्कर इत्यादीनां स्थानानां शैक्षणिकयात्रा-मायोजितवान्। अनेन डी.डी. कोसम्बीविरचितस्य 'बोधिसत्त्व' इति मराठीमूलस्य नाटकस्य संस्कृतानुवादो विहितः, अयं ग्रन्थः संस्थानेन प्रकाशितो वर्तते। अयं महाराष्ट्रस्य डा. भीमरावाम्बेडकरमराठवाडाविश्वविद्यालयतः पुनश्चर्यापाठ्यक्रमे भागग्रहणमकरोत्।

**श्रीअजयकुमारसिंहः** – राष्ट्रियसंस्कृतसंस्थानस्य पालिपरियोजनायाः कनिष्ठशोधध्येतृत्वेन कार्यरतः श्री अजयकुमारसिंहः श्रीलङ्कास्थ-कैण्डीनगरे श्रीलङ्काबुद्धशासनधार्मिकप्रकरणमन्त्रालयस्य दन्तावशेषमहाविहारस्य च संयुक्ततत्त्वावधानेन २५-२७ सित., २०१३ मिते काले समायोजिते बौद्धसंस्कृतिमहोत्सवे आध्यात्मिकसहभागिरूपेण 'बौद्धधर्मः विश्वशान्तिश्च' इत्यस्मिन् विषये वक्तव्यं 'महाराष्ट्रप्रान्तस्य बौद्धगुहाः – अजन्तागुहायाः विशेषसन्दर्भे' इत्यस्मिन् विषये शोधालेखं च प्रास्तौत्। अयं हि शोधालेखः उत्कृष्टशोधालेखत्वेन तत्र चितोऽभवत्, यस्य कृते ४५० अमेरिकी-डालर-धनराशिना सः पुरस्कृतः। अस्मिन् महोत्सवे विश्वस्य ११० देशेभ्यः प्रतिनिधयः भागमवहन्।

**श्रीगौराङ्गबाघः** – अगरतलास्थ-एकलव्यपरिसरस्य शिक्षाशास्त्रविभागस्य श्रीगौराङ्गबाघेन जयपुरनगरे आयोजिते पुनश्चर्यापाठ्यक्रमे जुलाईमासस्य २२ दिनाङ्कादारभ्य अगस्तमासस्य १० दिनाङ्कं यावत् सहभागः गृहीतः।

**श्रीअरुणकुमारः** – अगरतलापरिसरस्य ज्योतिषविभागस्य अध्यापकेन श्रीअरुणकुमारेण विद्यावारिधि इत्युपाधिः लब्धः।

**प्रो. लोकमान्यमिश्रः** – लखनऊ-परिसरे शिक्षाशास्त्रविभागाध्यक्षः प्रो. मिश्रः ऑक्टोबरमासस्य २४-२६ दिनाङ्केषु लखनऊ-नगरस्थभारतीय-शिक्षाशोधसंस्थानेन 'Changing Paradigms of Values in Education' इत्यस्मिन् विषये आयोजिते त्रिदिवसीय सम्मेलने प्रथमसत्रे आध्यक्ष्यं निर्व्यूढम्।

**प्रो. विजयकुमारजैनः** – लखनऊ-परिसरे बौद्धदर्शनविभागाध्यक्षोऽयं दिसम्बरमासि ७-८ दिनाङ्कयोः पटियालानगरे पञ्जाबविश्वविद्यालये समायोजिते राष्ट्रियसम्मेलने सत्राध्यतां विधाय 'आचार्यतुलसी का सामाजिक अवदान' इत्यस्मिन् विषये शोधपत्रं प्रस्तुतवान्।

**प्रो. अवनीश-अग्रवाल** – लखनऊ-परिसरे शिक्षाशास्त्रविभागस्यैव प्रो. अग्रवालमहोदया ऑक्टोबरमासस्य २४ इत्यहनि भारतीयशिक्षाशोधसंस्थानेन आयोजितसम्मेलने प्रथमसत्रे सहाध्यक्षारूपेण 'मूल्यशिक्षायां परिवर्तमानानि प्रतिमानानी'ति विषयमाधृत्य स्ववक्तव्यं विज्ञापितम्। नवम्बरमासि २२-२३ दिनाङ्कयोः भारतीयवरिष्ठनागरिकसमित्या लखनऊ-नगरे आयोजिते राष्ट्रियसम्मेलनेऽपि सत्राध्यक्ष्यमलङ्कृत्य शोधपत्रवाचनं कृतवती।

**डॉ. देवीप्रसादद्विवेदी** – लखनऊ-परिसरे शिक्षाशास्त्रविभागस्य सह-आचार्यः डॉ. द्विवेदी ऑक्टोबरमासस्य २४-२६ दिनाङ्केषु लखनऊ-नगरस्थेन भारतीयशिक्षाशोधसंस्थानेन आयोजिते त्रिदिवसीयसम्मेलने शिक्षायां मूल्योन्नयनमादाय स्वकीयं शोधपत्रं प्रास्तौत्। एष महोदयः नोवेम्बरमासि छात्रकल्याणसमितेः महासचिवत्वेनापि कार्यं प्रारब्धवान्।

**डॉ. एस.पी.सिंहः** – लखनऊ-परिसरे अर्थशास्त्रविषयस्य सहायकाचार्यः डॉ.सिंहः १६.१२.2013 इत्यतः ०४.०१.२०१४ इत्येतावत् दिनाङ्कपर्यन्तं लखनऊ-विश्वविद्यालये आयोजिते पुनश्चर्या-पाठ्यक्रमे भागं गृहीत्वा ८१ अङ्कान् प्राप्य 'ए' इत्यनया श्रेण्या साफल्यमलभत्।

**डॉ. (श्रीमती) चन्द्रश्रीपाण्डेयः** – लखनऊ-परिसरेऽध्यापिका इयं नवम्बरमासि २२ इत्यहनि लखनऊ-नगरे भारतीयवरिष्ठनागरिकसमित्या आयोजितराष्ट्रियसम्मेलने शोधपत्रं प्रस्तुतवती।

**श्रीकालिकाप्रसादशुक्लः** – लखनऊ-परिसराध्यापकोऽयं अक्टूबरमाससि २४-२६ दिनाङ्केषु भारतीयशिक्षाशोधसंस्थानेन आयोजिते सम्मेलने शिक्षायां परिवर्तमानानि मूल्यप्रतिमानानि इत्यस्मिन् शीर्षकान्तर्गतं स्वकीयं शोधपत्रं प्रास्तौत्।

**डा.नगेन्द्रनाथझा-डा. मनोजकुमारमिश्रौ** – जम्मूपरिसरे अध्यापकौ इमौ १३.०९.२०१३ तः १५.१०.२०१३ पर्यन्तं डा. मनोजकुमारमिश्रः वेदविभागाध्यक्षः, डा.नगेन्द्रनाथझा शिक्षाशास्त्रीप्राध्यापकौ लखनऊपरिसरेण समायोजितायां राष्ट्रियसंगोष्ठ्यां भागग्रहणं कृतवन्तौ।

**डा. हरिनारायणतिवारी** – जम्मूपरिसरे व्याकरणविभागाध्यक्षोऽयं अगस्तमासस्य २३-२५ दिनाङ्केषु देहलीसंस्कृताकादमीद्वारा आयोजितायां राष्ट्रियसंगोष्ठ्यां भागं गृहीतवान्। नवम्बरमासस्य १९-२० दिनाङ्कयोः महाराजमानसिंहपुस्तकप्रकाशनशोधसंस्थानजयनारायणव्यासविश्वविद्यालय-जोधपुरे समायोजितायां राष्ट्रियसंगोष्ठ्यां 'तवल्कार ब्राह्मण में कर्म के अनुसार ऊर्ध्वलोकों में गति का विधान' इत्यस्मिन् विषये व्याख्यानं प्रास्तौत्।

**डा. प्रभातकुमारमहापात्रः** – जम्मूपरिसरे ज्योतिषविभागाध्यक्षः डा. प्रभातकुमारमहापात्रः १६-१७.११.२०१३ दिनाङ्कयोः 1st National Vedic Astrology and Krishnamurthy Scientific Research, Jagda, Rourkela इत्यत्र समायोजितायां राष्ट्रियसंगोष्ठयां व्याख्यानं विशिष्टसम्माननं ASTRO SCIENTIST च प्राप्तवान्।

**डा.शरतचन्द्रशर्मा** – ११.१०.२०१३ दिनाङ्के जम्मूपरिसरेऽध्यापकः डा. शरतचन्द्रशर्मा आधुनिकविभागाध्यक्षः आकाशवाणीजम्मूद्वारा प्रसारिते कार्यक्रमे रामस्य भूमिकायाः पात्रं निरुढवान्।

**डा.चन्द्रमोलिरैना** – डा.चन्द्रमोलिरैना जम्मूपरिसरे ज्योतिषविभागप्राध्यापकः जम्मूस्थ विश्वस्थल्यां समायोजितायां राष्ट्रियसंगोष्ठ्यां वर्तमानसन्दर्भे ज्योतिषम् इत्यस्मिन् विषये व्याख्यानं दत्तवान्।

**डा. तेजनाथपौडेलः** – १८.१०.२०१३ तः २०.१०.२०१३ पर्यन्तं जम्मूपरिसरस्य प्राध्यापकः डा. तेजनाथपौडेलः साहित्यविभागस्य सहायकाचार्यः काशीहिन्दूविश्वविद्यालये कलासंकायान्तर्गतसंस्कृतविभागेन समायोजितायां राष्ट्रियसंगोष्ठ्यां स्वातन्त्र्योत्तरकालस्य नेपालदेशीयं संस्कृतसाहित्यम् इत्यस्मिन् विषये शोधपत्रवाचनम् अकरोत।

**डा. ज्योतिप्रकाशनन्दः** – ०२.१०.२०१३ जम्मूपरिसरस्य अध्यापकेनानेन डा. ज्योतिप्रकाशनन्देन पञ्जाबीविश्वविद्यालये भारतीयदर्शनस्य महत्त्वं इत्यस्मिन् विषये विशिष्टव्याख्यानम् प्रदत्तम्।

**डा.अरुणकुमारमिश्रः** – १०.१२.२०१३ दिनाङ्के जम्मूपरिसरे वेदविभागप्राध्यापकः सान्दीपनीवेदविद्याप्रतिष्ठानेन समायोजितायां जम्मूस्थवेदविद्यालये मुख्यपरीक्षकरूपेण उपस्थितः।

**श्रीमती निर्मलगुप्ता-डा.सच्चिदानन्दशर्मा-डा.रामदाससंगोत्रा:** – इमे जम्मूपरिसरे सहायकाचार्याः २५.११.१३ तः २३.१२.१३ पर्यन्तं अभिनवपाठ्यक्रमे भागं गृहीतवन्तः।

**प्रो. भारतभूषणमिश्रः** – भोपालपरिसरे ज्योतिषविभागाध्योऽयं अक्टूबरमासे २०१३ गोरखपुरविश्वविद्यालये द्विदिवसीयराष्ट्रियसङ्गोष्ठ्यां चतुर्थसत्रस्य मुख्यवक्ता आसीत्। भोपालपरिसरे २०१४ त्रिदिवसात्मिकायाः राष्ट्रियसङ्गोष्ठ्याः सत्रस्य अध्यक्षतामकरोत्। महर्षिसन्दीपनिवेदविद्याप्रतिष्ठान-उज्जैननगरे २०१४ आयोजिते अभिविन्यासपाठ्यक्रमे द्वे व्याख्याने दत्तवान्।

**प्रो. हंसधरझा** – भोपालपरिसरे ज्योतिषविभागे आचार्योऽयं २०१३ क्रीष्टवर्षे अक्तूबरमासे भोपालपरसरे समायोजितायाम् अधिराज्यीयप्रतियोगितायाम् सत्राध्यक्षं निर्णायकत्वं च सम्पादितवान्। २०१३ नवम्बरमासे मुम्बईपरिसरे समायोजितायाम् अधिराज्यीयप्रतियोगितायां निर्णायकः आसीत्। २०१४ वर्षस्य जनवरीमासे भोपाले समायोजितायां मध्यप्रदेशराज्यस्य राज्यस्तरीय प्रतियोगितायां निर्णायकः। २०१४ वर्षस्य जनवरीमासे इलाहाबादनगरे श्रीगङ्गानाथझापरिसरे समायोजितायाम् अखिलभारतीयज्योतिषसङ्गोष्ठ्यां सत्राध्यक्षतां तथा शोधपत्रवाचनं कृतवान्। भोपालपरिसरस्य राष्ट्रीपत्रिकायाः सम्पादनं विहितम्।

**डॉ. अशोकथपलियालः** – ज्योतिषविभागे सहायकाचार्योऽयं राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठेन आयोजितायां ज्योतिषपाठलेखनकार्यशालायां पाठलेखनं सम्पादनञ्चाकरोत्। २०१४ त्रिदिवसीयराष्ट्रीयसङ्गोष्ठ्यां शोधपत्रवाचनमकरोत्।

**डॉ. अवधेशकुमारश्रोत्रियः** – ज्योतिषविभागे अतिथिसहायकाचार्योऽयं २०१४ वर्षस्य जनवरीमासे भोपाले समायोजिताया मध्यप्रदेशराज्य-स्तरीयप्रतियोगिताया सञ्चालकदायित्वमावहत्।

**डॉ. नीलमाधवदाशः** – ज्योतिषविभागे सहायकाचार्योऽयं २०१४ वर्षस्य जनवरीमासे इलाहाबादनगरे श्रीगङ्गानाथझापरिसरे समायोजितायामखिल-भारतीयज्योतिषसङ्गोष्ठ्यां शोधपत्रवाचनं कृतवान्।

**प्रो. ओमप्रकाशभड़ाना** – भोपालपरिसरे आधुनिकविषयविभागाध्यक्षोऽयं Comparison of Motor Fitness Components Between Boxing and Wresting Player, Oct. 2013. स्वास्थ्य एवं दीर्घ जीवन के लिये योग, ब्रह्मवाणी, जम्मू जनवरी २०१३ इत्यत्र प्रकाशितम्।

**डॉ. धर्मेन्द्रकुमारसिंहदेवः** – भोपालपरिसरे साहित्यविभागे सहायकाचार्योऽयंः २०१३ अक्टूबरमासे दिल्लीसंस्कृतअकादम्यां वामनस्य कविशिक्षा इति विषयम् अधिकृत्य शोधपत्रवाचनं कृतवान्। २०१३ क्रीष्टब्दे काशीहिन्दुविश्वविद्यालये आधुनिक संस्कृतसाहित्यं प्रति कथासरित् पत्रिकायाः अवदानम् इति विषमाधृत्य शोधपत्रवाचनमकरोत्। अनेन संस्कृतवाङ्मये पर्यावरणम् इति विषयकं पुस्तकसम्पादनं विहितम्।

# जयपुरपरिसरवार्ता



कार्यशालायाः एकं दृश्यम्

**द्विदिवसीयकार्यशाला** – परिसरेऽस्मिन् २५.०७.२०१३ तः २६.०७.२०१३ पर्यन्तं 'व्यक्तित्त्वविकासाय योगप्रबन्धनम्' इति विषयमवलम्ब्य काचित् कार्यशाला शिक्षाशास्त्रविभागेनायोजिता। कार्यशालायामस्यां जैनविश्वभारतीलाडनूतः समागतौ प्रो. जे.पी.एन. मिश्रा डा. युवराजसिंहः च व्यक्तित्त्वविषये बहून् विषयान् उपस्थापितवन्तौ। ताभ्याम् अस्यां कार्यशालायां प्रायोगिकानि तन्त्राणि अपि प्रदर्शितानि। कार्यक्रमस्य निदेशकः प्रो. सुदेशकुमारशर्मा कार्यक्रमस्य प्रारम्भे अकथयत्– 'मानवमात्रस्य व्यक्तित्त्वं प्रधानं भवति। यदि व्यक्तित्त्वं सुयोग्यं तर्हि मानवः अपि सुयोग्यः भवति।' कार्यक्रमेऽस्मिन् परिसरस्य प्राध्यापकाः छात्राः च भागं गृहीतवन्तः। कार्यक्रमस्याध्यक्ष्यं परिसरप्राचार्य आचार्यः प्रकाशपाण्डेयः निर्व्यूढवान्।

**भाषाबोधनवर्गः** – परिसरेऽस्मिन् १२.०८.२०१३ तः ३१.०८.२०१३ पर्यन्तं शिक्षाशास्त्रविभागेन आयोजितः पञ्चदशपरिव्याप्तः भाषाबोधनवर्गः समभूत्। वर्गस्यारम्भे अध्यक्षत्वेन प्राचार्यः प्रकाशपाण्डेयः संस्कृतभाषायां निहितानि वैज्ञानिकतत्त्वानि स्फुटं प्रत्यपादयत्। शिक्षाशास्त्रविभागाध्यक्षः प्रो. सुदेशकुमारशर्मा अवोचत् – ''संस्कृतज्ञानं विना शिक्षाविभागीयाः इमे छात्राः संस्कृतशिक्षकाः, भवितुं नार्हन्ति। अतः अस्य वर्गस्य महत् प्रयोजनं वरीवर्ति। मञ्चसञ्चालनं श्रीपरमेशकुमारशर्मणा कृतम्।

वर्गे आचार्यः सोहनलालपाण्डेयः, आचार्यः फतेहसिंहः, आचार्यः वाई.एस. रमेशः, डा. बत्तीलालमीणा, डा. दरियावसिंहः, डा. शीशरामः, डा. श्रीमती लीनातिवारी, डा. हरिओमशर्मा, डा. विजयकुमारदाधीचः, डा. कैलाशचन्द्रसैनी परमेशः च विभिन्नकालांशेषु शिक्षाशास्त्रि-शिक्षाचार्यकक्षयोः छात्राध्यापकान् अध्यापितवन्तः। एवं च त्रिषु गणेषु पञ्चदशदिनात्मकं शिविरमपि सञ्चारितम्। तत्र श्रीमनीषजुगरानः, श्रीमीठालालः, श्रीमनीषशर्मा च भाषाभ्यासं, बिन्दुविमर्शं च कारितवन्तः।

**जयपुरपरिसरस्य वेबसाइट इत्यस्य लोकार्पणम्** – प्रगतवर्षे जयपुरपरिसरस्य अन्तर्जालपुटस्य लोकार्पणम् अभूत्। यस्य नाम – rsksjaipur.ic.in इति वर्तते। अस्मिन् वैबसाइट इत्यस्योपरि जयपुरपरिसरे जायमानानां सर्वेषां गतिविधीनां विवरणं विस्तृतरूपेण वर्तते। वेबसाइट-सङ्केत इत्थं वर्तते–

http:\\rsksjaipur.ac.in

**स्वतन्त्रतादिवसोत्सवः** – १५.०८.२०१३ परिसरप्राचार्यस्य आध्यक्ष्ये सर्वेषां समुपस्थित्यां यूनियनवित्तकोषपक्षतः शैक्षिकस्पर्धायां क्रीडास्पर्धायां च सर्वोत्तमयोः छात्रयोः सम्माननम् अभवत्। सर्वेषु परिसरेषु परीक्षायां सर्वाधिकान् ९३ प्रतिशताङ्कान् प्राप्तवती आचार्यद्वितीयवर्षस्य भुवनेश्वरी वित्तकोशेन सम्मानिता। एवं च क्रीडास्पर्धायां परिसरीयविभिन्नकार्यक्रमेषु युवमहोत्सवे, संस्कृतविश्वविद्यालयानां प्रतियोगितायां च प्रथमस्थानानि स्वर्णपदकानि च लब्धवती रेणुकाचौधरी सम्मानिता। कार्यक्रमे वित्तकोषस्य शाखाप्रबन्धिका वन्दनायादववर्या सर्वे प्राध्यापकाः छात्राः च उपस्थिताः आसन्।



संस्कृतसप्ताहमहोत्सवावसरस्य किञ्चन दृश्यम्

**संस्कृतसप्ताहमहोत्सवः** – १६.०८.१३ तः २२.०८.१३ दिनाङ्कं यावत् संस्कृतसप्ताहमहोत्सवो महतोत्साहेन समायोजितः। कार्यक्रमस्य उद्घाटनसमारोहे मुख्यातिथिपदं परिसरस्य प्राचार्यचरो महावैयाकरणः श्रीरामकिशोरशुक्लमहोदयः समलङ्करोत्। सारस्वतातिथिपदं राष्ट्रपतिसम्मानितः पाश्चात्यपौरस्त्यशिक्षाविद् देवर्षिकलानाथशास्त्रिमहोदयः समलङ्कृतवान्। सभायाः आध्यक्ष्यं परिसरप्राचार्यो विविधविद्याविद्योतितान्तःकरणः श्रीमान् प्रकाशपाण्डेय-महोदयोऽकार्षीत्।

सप्ताहात्मके कार्यक्रमेऽस्मिन् छात्राणां नैकाः संस्कृतवादविवादादिप्रतियोगिताः समायोजिताः। कार्यक्रमेषु परिसरस्य आचार्याः प्राध्यापकाः छात्राश्च यथायथं वैदुष्यं प्रदर्श्य कार्यक्रमस्य शोभामवर्धयन्। कार्यक्रमस्य समापनसमारोहे विशिष्टातिथिरूपेण परिसरस्य प्राचार्यचरः श्रीसतीशचन्द्रकीलावतः, सारस्वतातिथिरूपेण राष्ट्रपतिसम्मानितो महाकविः हरिरामाचार्यमहोदयः, सभाध्यक्षरूपेण परिसरप्राचार्यः प्रो. प्रकाशपाण्डेयश्च स्वीयेन उद्बोधनेन संस्कृतस्य महत्त्वं प्राकटयन्। कार्यक्रमस्य संयोजनं व्याकरणविभागस्य आचार्येण श्रीधरमिश्रमहोदयेन कृतम्।

**शिक्षकदिवससमारोहः** – ०५.०९.२०१३ दिनाङ्के परिसरे शिक्षकदिवससमारोहः समाचरितः। अस्मिन् कार्यक्रमे आध्यक्ष्यं ज्योतिषविभागाध्यक्षः प्रो. इन्द्रमणिदासः निर्व्यूढवान्। कार्यक्रमेऽस्मिन् शिक्षाशास्त्रविभागीयाः छात्राः सर्वेषाम् आचार्याणां मौलिबन्धनपुरस्सरं पुष्पगुच्छप्रदानं चन्दनानुलेपनं च विहितम्। सर्वे विभागाध्यक्षाः शिक्षकदिवसमहिमानम् अवर्णयन्। परिसर-प्राचार्यः अतिथित्वेन मञ्चं समुपस्थाय सर्वेषामुत्साहवर्धनम् अकरोत्। कार्यक्रमस्य संयोजकः प्रो. फतेहसिंहमहोदयः सर्वेषां स्वागतं अवोचत्। सञ्चालनं शिक्षाचार्यकक्षायाः छात्रः प्रमोदः शिक्षाशास्त्रिकक्षायाः छात्रः नितीशः च अकुरुताम्।

**हिन्दीदिवसोत्सवः** – १३.०९.२०१३ दिनाङ्के परिसरस्य हिन्दकेसरीसभागारे हिन्दीदिवसोत्सवः समाचरितः। अस्मिन् कार्यक्रमे शिक्षाशास्त्रविभागस्य सर्वेऽपि प्राध्यापकाः उपस्थिताः आसन्। कार्यक्रमः कार्यकारिप्राचार्यस्य प्रो. इन्द्रमणिदासमहोदयस्याध्यक्ष्ये सम्पन्नताम् अगात्। कार्यक्रमे स्वागतभाषणं प्रो. फतेहसिंहः, अतिथित्वेन प्रो. सोहनलालः च हिन्दीदिवसायोजनमहत्त्वं विहितवन्तौ। कार्यक्रमे सर्वेऽपि विभागीयाः प्राध्यापकाः छात्राश्च उपस्थिताः आसन्।

**अनौपचारिकवर्गद्वयस्योद्घाटनम्** – १६.०९.१३ दिनाङ्के "अनौपचारिकवर्गद्वयस्योद्घाटनम्" उद्घाटनं हिन्दकेसरीसभागारे अभूत्। उद्घाटनं परिसरस्य कार्यवाहकप्राचार्यस्य आचार्यस्य इन्द्रमणिदासस्याध्यक्षे अजायत। मुख्यवक्तृत्वेन शिक्षाशास्त्रस्य प्रो. वाई.एस.रमेशः सर्वान् केन्द्रसम्बद्धान् विषयान् प्रत्यपादयत्। सारस्वतातिथिरूपेण छात्रावासस्य सहाधीक्षकः डा. हरीशचन्द्रतिवाडी छात्रान् संस्कृतेन भाषितुं प्रेरितवान्। विशिष्टातिथिरूपेण प्रो. सुदेशकुमारशर्मा शिविरविधेः ज्ञानम् अकारयत्। अध्यक्षत्वेन ज्योतिषविभागाध्यक्षः वर्गप्रयोजनम् अवादीत्। स्वागतभाषणं परिसरीयकेन्द्रसंयोजकः श्रीपरमेशः, धन्यवादज्ञापनं छात्रावासीयकेन्द्रसंयोजकः श्रीरामेश्वरवर्यः, मञ्चसञ्चालनम् आचार्यान्तिमवर्षस्य छात्रः हार्दिकः च अकुर्वन्। केन्द्रयोः मनीषजुगरानः अभिषेकजानी च पाठयिष्यतः। उद्घाटनसत्रे प्रो. फतहसिंहः, डा. बत्तीलालमीणा, डा. शीशरामः, प्रो. सत्यमकुमारी, डा. हरिओमः, श्रीमतीनमितामित्तलः श्रीप्रवेशव्यासः अन्ये च प्राध्यापकाः उपस्थिताः आसन्।

**परिषदो नूतनसदस्यानां चयनम्** – जयपुरपरिसरस्य ज्योतिषविभागे ज्योतिषविभागाध्यक्षानां प्रो. इन्द्रमणिदासमहोदयानाम् अध्यक्षत्वे सितम्बरमासस्य द्वितीयदिनाङ्के ज्योतिषपरिषदो नूतनसदस्यानां चयनं जातम्। तत्र प्रो. वासुदेवशर्ममहोदयेन विशिष्टोद्बोधनं कृतम्। तथा व्याकरणविभागे व्याकरणविभागाध्यक्षानां प्रो. शिवकान्तझामहोदयस्य अध्यक्षत्वे सितम्बरमासस्य तृतीयदिनाङ्के व्याकरणपरिषदो नूतनसदस्यानां चयनं जातम्। प्रो. श्रीधरमिश्रेण विशिष्टोद्बोधनं, प्रो. कमलचन्द्रयोगिना धन्यवादज्ञापनं, डा. विष्णुकान्तपाण्डेयमहोदयेन, कार्यक्रमस्य संयोजनं च कृतम्। प्रतिवर्षम् इव परिषत्सु प्रतिमासं श्लोककण्ठपाठः, सूत्रकण्ठपाठः, आशुभाषणम्, प्रश्नमञ्चः, इत्यादिस्पर्धानाम् आयोजनं प्रचलति।

**वाग्वर्धिनीपरिषदः उद्घाटनम्** – जयपुरपरिसरस्य छात्रैः विनिर्मितायाः "अभ्युत्थानम्" नाम्नी परिषदः उद्घाटनं ११.०९.२०१३ दिनाङ्के प्रो. रामकुमारशर्ममहोदयानां, प्रो. वाई.एस.रमेशमहोदयानां च सान्निध्ये सञ्जातम्। सञ्चालनं परिसरस्य प्रबुद्धच्छात्रेण हार्दिकराजगुरुणा कृतम्। ज्योतिषविभागस्य सहायकाचार्येण प्रवेशव्यासमहोदयेन परिषदः उद्देश्यानि, कार्यक्रमाणि, प्रतिनिधीनां चयनप्रक्रिया, संस्कृतस्य उत्थानाय करणीयाः प्रयासाश्च प्रतिपादिताः। परिसरे परिषत्पक्षतः प्रतिदिवसं चतुर्वादनतः पञ्चवादनपर्यन्तं विविधविषयेषु परिचर्चा भवति। उत्साहेन छात्राः भागं गृह्णन्ति।

**व्याकरणसङ्गोष्ठी** – प्रो. शिवाकान्तझामहोदयस्य आध्यक्षे २७.०९.२०१३ दिनांके विभागस्य सर्वेषां प्राध्यापकानाम् उपस्थितौ व्याकरणसंगोष्ठी आयोजिता, यस्यां व्याकरणविभागस्य विविधकक्षाणां छात्राः सम्भाषणं कृतवन्तः।

**आचार्यहीरालालजैनस्मृतिव्याख्यानमालान्तर्गतं विशेषव्याख्यानम्** – २२.१०.२०१३ दिनाङ्के परिसरे जैनदर्शनविभागेन आचार्यहीरालालजैनस्मृतिव्याख्यानमालान्तर्गतं विशेषव्याख्यानम् आयोजितम्। कार्यक्रमेऽस्मिन् मुख्यवक्तृत्वेन लाडनूस्थ-जैनविश्वभारती-संस्थानस्य कुलपतिमहोदया सुश्रीसमणीचरित्रप्रज्ञा आसीत्। अत्र मुख्यातिथिरूपेण राष्ट्रपतिसम्मानितो विद्वान् प्रो. दयानन्दभार्गवः, विशिष्टातिथित्वेन जैनविश्वभारतीसंस्थानस्य भूतपूर्वकुलपतिः प्रो. महावीरराजगेलडा तथा अध्यक्षः परिसरप्राचार्यः डॉ.प्रकाशपाण्डेयः आसीत्।



व्याख्यानमालायां मञ्चस्थविदुषां एक चित्रम्

**विश्वविद्यालयानुदानायोगस्य निरीक्षणम्** – विश्वविद्यालयानुदानायोगस्य निरीक्षकदलेन नवम्बरमासस्य नवमे दशमे च दिनाङ्कयोः परिसरस्य निरीक्षणं कृतम्। निरीक्षकदले प्रो. नीलकान्तपतिः, प्रो.देबचरणसरकारः, प्रो. पुरुषोत्तमशर्मा तथा च डॉ. अर्चनाठाकुरमहोदयाः प्रमुखरूपेण आसन्।

**म.म.मधूसूदनओझास्मृतिव्याख्यानमालान्तर्गतं विशेषव्याख्यानम्** – २१.११.२०१३ दिनाङ्के महामहोपाध्यायमधूसूदनओझास्मृतिव्याख्यानमालान्तर्गतं राष्ट्रपतिसम्मानितस्य प्रो. दयानन्दभार्गवस्य व्याख्यानमभवत्। अत्र मुख्यातिथिरूपेण जयपुरस्थस्य जगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. आर. देवनाथन् प्रो. नरेन्द्रोऽवस्थी च समुपस्थितौ आस्ताम्।

**राज्यस्तरीया शलाकास्पर्धा शास्त्रसम्भाषणस्पर्धा च** – नवम्बरमासस्य अष्टाविंशतिः एकोनविंशतिः च दिनाङ्के परिसरे राज्यस्तरीया शलाकास्पर्धा तथा शास्त्रसंभाषणस्पर्धा समायोजिता। यस्यां राष्ट्रपतिसम्मानितः प्रो.हरीरामआचार्यः, देवर्षि पं.कलानाथशास्त्री, डॉ.विनोदशर्मा, डॉ. उमेशनेपालः, डॉ.प्रमोदकुमारशर्मा च निर्णायकरूपेण समुपस्थिताः आसन्।



व्याख्यानमालायां मञ्चस्थाः विद्वांसः

**डॉ. उमाकान्तचतुर्वेदिनः सौप्रस्थानिककार्यक्रमः** – हर्षस्य विषयोऽयं यत् जयपुरपरिसरस्य साहित्यविभागस्य विदुषो डॉ. उमाकान्तचतुर्वेदिनः चयनं बनारसहिन्दूविश्वविद्यालये वरिष्ठव्याख्यातृपदे जातम्। ०६.१२.२०१३ दिनाङ्के परिसरसभागारे तस्य सौपस्थानिककार्यक्रमः आयोजितः।

**वेदविभागः उद्घाटितः** – जयपुरपरिसरे अस्मिन् वर्षे वेदविभागः उद्घाटितः। अतिथिसहायकाचार्यरूपेण बनारसहिन्दू-विश्वविद्यालये अधीतस्य डॉ. धर्मेन्द्रकुमारपाठकस्य अत्र चयनं जातम्। १७.१०.२०१३ दिनाङ्के सः अत्र कार्यभारं स्वीकृतवान्।

**सोत्साहं समायोजितः वार्षिकोत्सवः** – २८.०३.२०१४ दिनाङ्के त्रिवेणीनगरस्थराष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे आयोजिते वार्षिकोत्सवे विभिन्नाः संस्कृतच्छात्राः पुरस्कारान् समलभन्त। कार्यक्रमे मुख्यातिथित्वेन जोधपुरस्थस्य जयनारायणव्यासविश्वविद्यालयस्य संस्कृतविभागस्य पूर्वविभागाध्यक्षाः प्रो.श्रीकृष्णशर्ममहोदयाः आसन्। कार्यक्रमे आध्यक्षं परिसरप्राचार्यः डॉ.प्रकाशपाण्डेयमहोदयः निर्व्यूढवान्। अतिथयः प्रतिभाशालिभ्यः छात्रेभ्यः पुरस्कारान् प्रदत्तवन्तः। वार्षिकप्रतिवेदनमपि कार्यक्रमेऽस्मिन् पठितम्। क्रीडास्पर्धासु संस्थानस्य छात्रवर्गे रणवीरचौधरी छात्रावर्गे दीपिकाचौधरी च प्रथमं स्थानं लब्धवन्तौ।

शैक्षणिकपुरस्कारेषु शास्त्रि-शिक्षाशास्त्री-शिक्षाचार्यकक्षासु क्रमशः आराधना बुनकरः, बृजमोहनकुमावतः, राधिकापाराशरः, मनीषजुगरानः च लब्धवन्तः। आचार्यकक्षायां व्याकरण साहित्य धर्म शास्त्र जैन दर्शन ज्योतिष सर्व दर्शन इत्यादिषु क्रमशः श्वेता मङ्गलः, दिव्या शर्मा, अङ्कितदाधीचः, प्रियङ्का जिनः, नरेन्द्र कुमार शर्मा, सत्यनारायण गुप्ता च सर्वाधिकाङ्कान् प्राप्तवन्तः। अस्मिन् अवसरे परिसरस्य पूर्वप्राचार्यः डॉ. सतीशकीलावतः, सर्वे विभागाध्यक्षाः, आचार्याः प्राध्यापकाः च उपस्थिताः आसन्। सञ्चालनं प्रो.श्रीधरमिश्रः अकरोत्।

**सुसम्पन्ना राष्ट्रियसंगोष्ठी** – जयपुरपरिसरे त्रिदिवसीयाराष्ट्रियसंगोष्ठी समायोजिता। प्रत्येकं दिने सत्रद्वयं समायोज्यते स्म। प्रातःकालीनसत्रे विभिन्नेभ्यः प्रान्तेभ्यः समागताः विभिन्नविषयानुगुणम् आध्यक्ष्यम् अकुर्वन्। तत्र सम्बद्धविषयानवलम्ब्य प्रतिभागिनः शोधपत्रवाचनं विहितवन्तः। सत्रस्य सञ्चालनं भिन्नभिन्नकक्षेषु जातम्। येषु आध्यक्ष्यं दर्शनशास्त्रविभागस्य प्रो.वैद्यनाथझा, धर्मशास्त्रविभागस्य प्रो. भगवतीसुदेशः, साहित्यस्य प्रो.रमाकान्तपाण्डेयः, व्याकरणस्य प्रो.शिवाकान्तझा, शिक्षामनोविज्ञानस्य प्रो.लोकमान्यमिश्रः, ज्योतिषविभागस्य प्रो. इन्द्रमणिदासः च कृतवन्तः। अस्यां संगोष्ठ्यां प्रायेण द्विशतं प्रतिभागिनः शोधपत्राणि पठितवन्तः। समापनकार्यक्रमे संस्थानस्य कुलपतयः प्रो.एन. आर.कन्ननमहोदयाः, परिसरप्राचार्यः, प्रो.शास्त्री च उपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनं प्रो.वासुदेवशर्मा कृतवान्। संगोष्ठ्याः संयोजकः शिक्षाशास्त्रविभागस्य विभागाध्यक्षाः प्रो.सुदेशकुमारशर्मा आसीत्।

**अखिलभारतीयसंस्कृतच्छाणां प्रतिभाप्रतियोगितायां भागग्रहणम्** – तिरुपतिस्थराष्ट्रीयसंस्कृतविद्यापीठे दिनाङ्क २२ तः २५ जनवरी, २०१४ पर्यन्तं प्रायोजितायाम् अखिलभारतीयसंस्कृतच्छाणां प्रतिभाप्रतियोगितायां जयपुरपरिसरस्य प्रतिभागिनः राष्ट्रीयसंस्कृतसंस्थानस्य गौरवं परिवर्धितवन्तः। इमे प्रतिभागिनः विविधप्रतियोगितासु पुरस्कारान् लब्धवन्तः –

१. हार्दिकराजगुरुः – स्वर्णपदकम् (साहित्यभाषणस्पर्धा)

२. अभिषेकजानी – स्वर्णपदकम् (मीमांसाभाषणस्पर्धा)

३. रेणुशर्मा, कोमलअग्रवाल, पूजाजैन – स्वर्णपदकम् (संघनृत्यस्पर्धा)

**छात्रगतिविधयः** – युवसमारोहे भागं जिघृक्षूणां छात्राणां चयनार्थं विविधक्रीडास्पर्धाः ०२.०९.१३ दिनाङ्कतः ११.०९.१३ दिनाङ्कं यावद् सायं द्विवादनतः षड्वादनं यावदायोजिताः। शैक्षिकसांस्कृतिकार्यक्रमेषु भागं ग्रहीतॄणां छात्राणां चयनार्थं च हिन्दकेसरीसभागारे ०४.०९.१३ तः १०.०९.१३ दिनाङ्कं यावद् प्रातः ११ वादनतः द्विवादनं यावद् विविधाः प्रतियोगिताः समायोजिताः। कार्यक्रमस्यस्य संचालनं भिन्न-भिन्नदिवसेषु भिन्नेन प्राध्यापकेन कृतम्। परिसरस्य आचार्यैः प्रतिविषये योग्यतमाश्छात्राः चिताः। सर्वासु प्रतियोगितासु छात्रैरहमहमिकया भागो गृहीतः। परिसरप्राचार्याः प्रो. प्रकाशपाण्डेयमहोदयाः सर्वे विविभागाध्यक्षाः प्राध्यापकाश्च छात्राणां प्रस्तुत्या भृशमतूतुषन्। कार्यक्रमस्य संयोजनं प्रो. श्रीधरमिश्रमहोदयेन कृतम्।

**युवमहोत्सवे प्रतिभागिता गौरवं च** – लखनऊपरिसरे समायोजिते युवामहोत्सवे परिसरस्य षष्टिप्रतिभागिनः (४३ बालकाः, १७ बालिकाः) भागं गृहीतवन्तः। एकादशस्वर्णपदकानि, षड्-रजतपदकानि, षट् कांस्यपदकानि सम्प्राप्य परिसरः द्वितीयस्थानं प्राप्तवान्।

**सेवाकार्यम्** – २६/०९/२०१३ राष्ट्रीयसेवायोजनान्तर्गतं जयपुरपरिसरछात्रैः छात्रावासेषु स्वच्छताकार्यं कृतम्।

**छात्रप्रातिभम्** – ज्योतिषविभागस्य सतीशशर्माशोधच्छात्रस्य चयनं चेन्नईनगरे राजभाषाधिकारिरूपेण ''इण्डियनऑवरसीजबैंक'' इति वित्तकोषे अभवत्।

**'अभ्युत्थानम्' वाग्वर्धिनीपरिषत्** – जनवरीमासे परिसरस्य 'अभ्युत्थानम्' वाग्वर्धिनीपरिषत् तथा ज्योतिषविभागस्य संयोगेन दूरदर्शी यन्त्रद्वारा ग्रहवेधस्य कार्यक्रमः आयोजितः। कार्यक्रमे छात्रैः महत् उत्साहेन भागः गृहीतः। प्रथमवारं सिद्धान्तज्योतिषशास्त्रस्य क्लिष्टविषयाणाम् अध्यापनं त्रिविमीयतकनीक द्वारा आरब्धः विभागीय अध्यापकैः अत्यन्तक्लिष्टविषयाणां सरलीकरणाय त्रिविमीयचित्राणि विनिर्मितानि।

## लखनऊ-परिसरोदन्तः

**स्वतन्त्रतादिवसस्यायोजनम्** - अगस्तमासि पञ्चदशे दिनाङ्के परिसरे स्वतन्त्रतादिवसस्यायोजनं जातम्। अवसरेऽस्मिन् छात्राणां सांस्कृतिककार्यक्रमाणां प्रस्तुतिः जाता। परिसरप्राचार्येण प्रो.चौधरिमहोदयेन कर्तव्याकर्तव्यविषये समसामयिकघटनाः उद्धृत्य संस्कृतद्वारा राष्ट्रनिर्माणाय प्रेरणा अदायि। कार्यक्रमस्य सञ्चालनं डा.यदुवीरस्वरूपब्रह्मचारी अकरोत्।

**संस्कृतसप्ताहस्यायोजनम्** - अगस्तमासस्य २० दिनाङ्कतः २३ दिनाङ्कपर्यन्तं संस्कृतसप्ताहस्यायोजनं जातम्। अवसरेऽस्मिन् प्रो. अभिराजराजेन्द्रमिश्रमहोदयः मुख्यवक्तृत्वेन सम्प्राप्तः। कार्यक्रमे मिथिलाप्रदेशतः समागतः प्रो.सतीशचन्द्रझामहोदयः अपि विशिष्टातिथित्वेन आसीत्। परिसरप्राचार्यः प्रो.चौधरी समागतानां विदुषां स्वागतसपर्या व्यवहरन् संस्कृतस्य विज्ञानपक्षमुपस्थापितवान्। कार्यक्रमेऽस्मिन् छात्राणां भाषण-अन्त्याक्षरी-स्फूर्ति-शलाका-वादविवादप्रतियोगितेत्यादीनामायोजनमपि जातम्। परिसरस्य पूर्वप्राचार्यौ प्रो.उमारमणझा-प्रो.सुरेन्द्रझा-महोदयावपि सम्बोधनं कृतवन्तौ। कार्यक्रमस्य संयोजकः प्रो.भारतभूषणत्रिपाठीः आसीत्।

**यू.जी.सी.दलस्य पर्यवेक्षणम्** - सितम्बरमासस्य ७-८ दिनाङ्कयोः परिसरे यू.जी.सी.दलस्य पर्यवेक्षणमनुष्ठितम्। दलेऽस्मिन् प्रो. नीलकण्ठपतिः, प्रो.रवीन्द्रमूले, प्रो.देवार्चना सरकार, प्रो.रमेशचन्द्रपण्डा, डा.अर्चनाठाकुरप्रभृतयः विद्वांसः अवर्तन्त। परिसरप्राचार्यः प्रो. अर्कनाथचौधरी दलस्यास्य स्वागतमकरोत्। परिसरस्य पर्यवेक्षणार्थं प्रो.लोकमान्यमिश्रः संयोजकत्वेन प्रो.अवनीश अग्रवालः च सहसंयोजकत्वेन आस्ताम्। अवसरेऽस्मिन् पुस्तकप्रदर्शिन्याः अपि आयोजनं जातम्। छात्राणां योगासनप्रदर्शनमपि जातम्। दलेनानेन छात्रैः, शिक्षकैः कर्मचारिभिश्च सह उपवेशनं कृत्वा परिसरविकाससम्भावनानां चर्चा विहिता। परिसरगतिविधीन् समालोच्य महान् सन्तोषोऽपि समाचरितः।

**विशिष्टव्याख्यानम्** - सितम्बरमासि एव शिक्षाशास्त्रविभागस्य विशिष्टव्याख्यानं दिल्ली विश्वविद्यालयस्य प्रो.चाँदकिरण-सलूजामहोदयेन 'संस्कृतशिक्षणे गुणवत्तावर्धनमि'ति विषयमादाय विहितम्। अवसरेऽस्मिन् विभागाध्यक्षः प्रो.लोकमान्यमिश्रः सलूजामहोदयस्य स्वागतमकरोत्।

**हिन्दीपक्षस्यायोजनम्** - सितम्बरमासि चतुर्दशदिनाङ्कतः हिन्दीपक्षस्यायोजनं जातम्। अवसरेऽस्मिन् व्याकरणविभागाध्यक्षः हिन्दीभाषायाः वैशिष्ट्यमादाय प्रो. सुरेन्द्रनाठकः अभाषत। अवसरेऽस्मिन् केन्द्रीयविद्यालयस्य हिन्दीशिक्षिका डॉ. सुनीतासिंहमहोदया मुख्यातिथिरूपेण समाहूता। पक्षेऽस्मिन् कर्मचारिणां हिन्दीदक्षतायाः प्रतियोगिता अपि आयोजिता। हिन्दीटङ्कणे व्याख्याने च कार्यालयस्य श्रीकाशीनाथद्विवेदी प्रथमो जातः। छात्राणामपि प्रतियोगितानामायोजनं जातम्। कार्यक्रमे परिसरप्राचार्यः कार्यालयीयकार्येषु हिन्दीभाषायाः प्रयोगार्थं कर्मचारिणामाह्वानं कृतवान्। कार्यक्रमस्य सञ्चालनं प्रो. भारतभूषणत्रिपाठिना विहितम्।

**बालचरप्रशिक्षणस्यायोजनम्** - सितम्बरमासि पञ्चविंशदिनाङ्कादारभ्य शिक्षाशास्त्रविभागीयच्छात्राणां कृते बालचरप्रशिक्षणस्य कार्यक्रमः समारब्धः। अस्य कार्यक्रमस्य संयोजकः विभागाध्यक्षः प्रो.लोकमान्यमिश्रः सहसंयोजिका च प्रो.अवनीश-अग्रवाल आस्ताम्। प्रशिक्षकदले श्रीनजीरमुकबिल, श्री अलोपीशङ्करमिश्रः, श्री सुमनचन्द्रतिवारीत्यादयः आसन्।

**ज्योतिषपरिचयपाठ्यक्रमस्य शुभारम्भः** - सितम्बरमासस्य तृतीयदिनाङ्के ज्योतिषपरिचयपाठ्यक्रमस्य अष्टमचक्रस्य समारम्भो जातः। अवसरेऽस्मिन् परिसरप्राचार्यः प्रो. अर्कनाथचौधरी, प्रो. मदनमोहनपाठकः, प्रो. रामलखनपाण्डेयः, प्रो. शिशिरकुमारपाण्डेयः, डा. धनीन्द्रकुमारझा डा. कुलदीपशर्मा च मञ्चासीनाः आसन्। प्रो. पाठकः प्रतिभागिनां स्वागतं विधाय पाठ्यक्रमस्य प्रतिपाद्यं प्रास्तौत्। पाठ्यक्रमेऽस्मिन् प्रतिभागिषु प्रशासनिकाधिकारिणः, अभिवक्तारः, भवनाभियन्तारः, चिकित्सकाः, अध्यापकादयः बहवः सन्ति। कार्यक्रमस्य सञ्चालनं डा. अमितकुमारशुक्लेन विहितम्। अवसरेऽस्मिन् ज्यौतिषविभागस्य डा. उमेशकुमारपाण्डेयः, डा. ज्योतिप्रसाददाशः, डा. (श्रीमती) चन्द्रश्रीः अन्ये च उपमञ्चमासन्।

**वाल्मीकिजयन्ती अनुष्ठिता** - १८.१०.२०१३ इत्यहनि परिसरप्राङ्गणे वाल्मीकिजयन्त्युत्सवः समायोजितः। तत्र जगद्गुरुरामानन्दाचार्य-राजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिचरः प्रो. सत्यदेवमिश्रः मुख्यातिथित्वेन सम्प्राप्य वाल्मीकिकाव्येषु प्रकाशपातमकरोत्। समारोहेऽस्मिन् राष्ट्रपतिसम्मानितः प्रो. उमारमणझामहोदयस्यापि एतस्मिन्नेव प्रक्रमे विशिष्टव्याख्यानमजायत। परिसरप्राचार्येण प्रो. चौधरिमहोदयेन समागतानामतिथिवर्याणां स्वागतमकारि। सत्रसञ्चालनं प्रो. भारतभूषणत्रिपाठिवर्येण विहितम्।

**कालिदासजयन्ती** - २६.११.२०१३ इत्यहनि कालिदासजयन्त्युत्सवे परिसरे समायोजिते कार्यक्रमे प्रख्यातो ज्योतिर्विद् प्रो. सच्चिदानन्दमिश्रः, आचार्यः, संस्कृतविद्याधर्मविज्ञानसङ्कायः, काशीहिन्दुविश्वविद्यालयः 'कालिदासकाव्येषु ज्यौतिषतत्त्वम्' इत्यस्मिन् विषये विशिष्टं व्याख्यानं प्रास्तौत्। परिसरप्राचार्यः प्रो. अर्कनाथचौधरिमहोदयः आध्यक्ष्यं निर्व्यूढवान्। अवसरेऽस्मिन् प्रो. मदनमोहनपाठकः, प्रो. शिशिरकुमारपाण्डेयः, प्रो.लोकमान्यमिश्रः, प्रो. विजयकुमारजैनः प्रो. रामलखनपाण्डेयश्च अधिमञ्चमासन्।



**शुभम् आर्यस्य अन्ताराष्ट्रियोपलब्धिः** - २२.०९.२०१३ तः ०६.१०.२०१३ दिनाङ्कपर्यन्तं मलेशिया इति देशे क्वालालम्पुर इति राजनगरे समायोजितायां एशियामहाद्वीपीय-योगप्रतियोगितायां परिसरस्यास्य शास्त्रिद्वितीयवर्षस्य छात्रः शुभम् आर्यः भारतस्य प्रतिनिधित्वं कुर्वन् द्वे स्वर्णपदके द्वे रजतपदके चाविन्ददिति महानामोदविषयः। अवसरेऽस्मिन् संस्थानस्य कुलपतिवर्येण कुलसचिववर्येण परिसरप्राचार्येण च छात्रोपलब्धौ वर्धापनानि प्रदाय हर्षप्रकर्षः प्रकटितः।

## बलाहरस्थ-वेदव्यासपरिसरस्य वार्ता:

**स्वतन्त्रादिवस: -** वेदव्यासपरिसरे १५.८.२०१३ दिनाङ्के स्वतन्त्रादिवस: सर्वै: छात्रै: अध्यापकै: कर्मचारिभिश्च सोत्साहं पालित:। प्रात: ध्वजाहोरणस्य पश्चात् परिसरप्राचार्येण प्रो. लक्ष्मीनिवासपाण्डेयेन भारतस्य स्वतन्त्रतासंग्रामे आत्मन: बलिदानं कृतवतां वीराणामनुस्मरणपूर्वकं वर्तमानभारतस्य रक्षणाय स्वस्वकर्त्तव्यविषये छात्रा उद्बोधिता:। तत: छात्रछात्राभि: सांस्कृतिककार्यक्रमा: प्रस्तुता:।

परिसरे १९.८.२०१३ त: २३.८.२०१३ पर्यन्तं संस्कृतसप्ताह: महता आनन्देन परिपालित:। अवसरेऽस्मिन् संस्कृतसुभाषितकण्ठपाठ-प्रश्नमञ्चभाषणादिस्पर्धा: छात्रेषु समायोजिता:। एतदभिलक्ष्य एका संस्कृतशोभायात्राऽपि प्रागपुरग्रामे समनुष्ठिता यत्र सर्वे छात्रा:, अध्यापका:, कर्मचारिणश्च भागग्रहणमकार्षु:। एतत्सन्दर्भे हिमाचलप्रदेशस्य उपशिक्षानिदेशकचरा: श्रीहरीशगुलेरी देहरोपमण्डलाधिकारी (S.D.M.) श्रीविनयकुमार:, आरक्षकोपाधीक्षका: (D.S.P.) श्री ब्रह्मदासभाटिया नलेटीकेन्द्रीयविद्यालयस्य प्राचार्या श्रीमती उषा भाटिया उद्घाटनसमापनसमारोहेषु अतिथिरूपेणोपस्थाय सवाशीर्वचनै: छात्रान् उद्बोधयन्।

**महिलाध्ययनकेन्द्रस्य सत्रोद्घाटनम् -** ०४.९.२०१३ दिनाङ्के महिलाध्ययनकेन्द्रस्य सत्रोद्घाटनं समभूत्। सन्दर्भेस्मिन् आधुनिककाले महिलानाम् अपेक्षा इति विषये चर्चा सम्पन्न। २७.९.२०१३ दिनाङ्के लखनऊत: समागतानां डॉ. ज्योत्स्नापाण्डेयस्य उद्बोधनेन नूतनतया प्रविष्टाभि: छात्राभि: अन्त:क्रियात्मक: कार्यक्रम: अपि समनुष्ठित: अभवत्।

**शिक्षकदिवस: समायोजित: -** ०५.०९.२०१३ दिनाङ्के परिसरे शिक्षकदिवस: समायोजित: यत्र परिसरस्य पूर्वप्राचार्य: प्रो. सुरेन्द्रझा मुख्यातिथिरूपेण छात्रान् उदबोधयत्।

**स्थापनादिवस: संकल्पदिवसरूपेण पालित: -** १६.९.२०१३ दिनाङ्के स्थापनादिवस: संकल्पदिवसरूपेण पालित: यत्र छात्रा: परिसरविकासोपायान् संसूच्य परिसरविकासे स्वसंकल्पं दृढीकृतवन्त:।



स्थापनादिवससमारोहावसरे भाषमाण: प्राचार्य: लक्ष्मीनिवासपाण्डेय:

**हिन्दीपखवाडा समायोजिता -** परिसरे १३.९.०१३ त: २७.९.२०१३ दिनाङ्कपर्यन्तं हिन्दीपखवाडा समायोजिता येषु दिनेषु छात्रेषु भाषण-निबन्धलेखन-काव्यपाठ-प्रश्नमञ्चादि-प्रतियोगिता:, कर्मचारिषु हिन्दी-भाषणप्रतियोगिता तथा अध्यापकेषु विभिन्नराज्येषु हिन्दीभाषाया: दशाविषये चर्चासङ्गोष्ठी अपि आयोजिता। अवसरेऽस्मिन् प्रागपुरस्थसेन्ट्रलबैंक इत्यस्य प्रबन्धका: श्रीअजयसिंगला महोदय: तथा संस्थानस्य आधुनिकसङ्कायाध्यक्ष: लखनऊपरिसरस्य हिन्दीविभागस्य आचार्य: प्रो. शिशिरकुमारपाण्डेय: अतिथिरूपेण समुपस्थाय परिसरगौरवमभि-वर्धयामासु:।

**परिसरच्छात्राणां गतिविधय: -** छात्राणां वैयक्तिक-बौद्धिकादि-क्षमताविकासाय मासस्य प्रथमतृतीयबुधवासरयो: विभागीयस्तरेषु तथा द्वितीयचतुर्थबुधवासरयो: सामूहिकी वाग्वर्धिनीपरिषद् आयोज्यते। एवमेव प्रतिगुरुवासरशुक्रवासरम् अपराह्ने ३.३० वादने स्वास्थ्यक्लब-संस्कृतप्रचारमञ्चकलारञ्जनी-पर्यावरणक्लब-मीडियाक्लब-छात्रपरामर्शकेन्द्रशोधपरिषदादय: आयोज्यन्ते, येषु छात्रा: स्वरुच्यनुसारं भागं गृह्णन्ति, विविधस्तरीयदक्षतां च वर्धयन्ति।

२५ त: २८ अक्तूबरमध्ये लखनऊपरिसरे समायोजिते युवमहोत्सवे परिसरीयच्छात्रा: स्वस्वप्रतिभाया: उत्तमं प्रदर्शनं कृत्वा विविधस्पर्धासु पदकानि अर्जितवन्त:। परिसरेण आहत्य द्वादशसु स्पर्धासु पदकानि समर्जितानि येषु श्रीप्रकाशचन्देन संस्कृतगीत-स्पर्धायां स्वर्णपदकं, श्रीलक्ष्मीचन्देन मल्लयुद्धे प्रथमं स्थानं (स्वर्णपदकम्) समर्जितम्।



संस्कृतसप्ताहोत्सवावसरे सांस्कृतिककार्यक्रमं प्रस्तुवन्त: छात्रा:

२९.०९.२०१३ दिनाङ्के संस्कृतअकादमीचण्डीगढ़द्वारा समायोजितायां अर्न्तविश्वविद्यालयीयभाषणस्पर्धायां भागं गृहीत्वा परिसरीय-साहित्यविभागीयच्छात्रेण श्रीबलवीरसिंहेन तृतीयं स्थानमधिगतम्।

१५.११.२०१३ दिनाङ्के कालिदासजयन्तिसन्दर्भे अभिराजराजेन्द्रमिश्रस्य काव्य-कण्ठपाठ: समायोजित:।

नवम्बरमासस्य २३-२४ दिनाङ्कयो: परिसरे राज्यस्तरीयवाक्स्पर्धा समायोजिता।

परिसरे सञ्चालिते मुक्तस्वाध्यायपीठस्वाध्यायकेन्द्रे चलितवर्षे ४५ छात्रा: अधीयाना: सन्ति।

परिसरे अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्य प्रथमदीक्षाया: कार्यक्रम: ऐषम: सितम्बरत: नवम्बरमासमध्ये समायोजित:।

# शृङ्गेरीपरिसरीयकार्यक्रमाः

**वाग्वर्धिनीस्पर्धिष्णुवाक्यार्थपरिषदः शारदाविशिष्टव्याख्यानमाला** –२९.०७.२०१३ तमे दिनाङ्के अपराह्णे त्रिवादने वाग्वर्धिनीस्पर्धिष्णुवाक्यार्थपरिषदां शारदाविशिष्टव्याख्यान-मालायाश्च उद्घाटनसमारोहः सम्पन्नः, यत्र तिरुपतिस्थ-राष्ट्रियसंस्कृत-विश्वविद्यालयस्य कुलपतिः आचार्यः हरेकृष्णशतपथी अभ्यागतत्वेन समागत्य कार्यक्रमम् उदजीघटत्।

**अभिनन्दनकार्यक्रमः** – ०८.०८.२०१३ तमे दिनाङ्के अपराह्णे त्रिवादने परिसरस्य अध्यापककल्याणपरिषत्पक्षतः गतमासे निवृत्तायाः परिसरस्य पूर्वतनप्राचार्यायाः आचार्यायाः राधावर्यायाः अभिनन्दकार्यक्रमः परिसरप्राचार्यस्य डा. एन. आर. कण्णन्वर्यस्य आध्यक्ष्येऽनुष्ठितः।

**अध्यापकवाक्यार्थपरिषदः प्रथमाधिवेशनं प्रवृत्तम्** – ०७.०८.२०१३ तमे दिनाङ्के पूर्वाह्णे १०.३० वादने अध्यापकवाक्यार्थपरिषदः प्रथमाधिवेशनं प्रवृत्तम्, यत्र प्राचार्यः डा. एन. आर. कण्णन्, डॉ. हरिप्रसादः, डॉ. सोमनाथसाहु, डॉ. सूर्यनारायणभट्टश्च स्वस्ववाक्यार्थं व्यदधुः।

**स्वातन्त्र्योत्सवः** – १५.०८.२०१३ तमे दिनाङ्के पूर्वाह्णे ०८.३० परिसरे स्वातन्त्र्योत्सवोऽचर्यत। परिसरप्राचार्यद्वारेण ध्वजोत्तोलनात्परं विषयमेनमाधृत्य भाषणं सम्पन्नम्, ततो विविधाः सांस्कृतिककार्यक्रमाः प्रावर्तन्त।

**शारदाविशिष्टव्याख्यानमालायाः व्याख्यानानि** – २३.०८.२०१३ तमे दिनाङ्के पूर्वाह्णे १०.३० वादने शारदाविशिष्टव्याख्यानमालायाः द्वितीयव्याख्यानं पुरीस्थ-जगन्नाथसंस्कृतविश्वविद्यालयस्य न्यायप्राध्यापकेन आचार्येण एन. आर. शठकोपतताचार्येण नव्यन्याये विहितम्। २५.०९.२०१३ तमे दिनाङ्के पूर्वाह्णे १०.३० वादने शारदाविशिष्ठव्याख्यानमालायाः तृतीयव्याख्यानं वाराणसेयसम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य ज्योतिषप्राध्यापकेन आचार्येण रामचन्द्रपाण्डेवर्येण ज्योतिषशास्त्रे विहितम्। ०५.१२.२०१३ दिनाङ्के परिसरे शारदाविशिष्टव्याख्यानमालायाः चतुर्थं व्याख्यानम् वेदान्तशास्त्रे आचार्यः रामचन्द्रभट्टः व्यदधात्। २७.०१.२०१४ तमे दिनाङ्के शृंगेरीपरिसरे शारदाविशिष्टव्याख्यानमालायाः पञ्चमं व्याख्यानं मीमांसाशास्त्रे आचार्यः सूर्यनारायण-नागेन्द्रभट्टः व्यदधात्। ३०.०१.२०१४ तमे दिनाङ्के शारदाविशिष्ट-व्याख्यानमालायाः षष्ठं व्याख्यानम् व्याकरणशास्त्रे आचार्याः एस्.एल्.पि.आञ्जनेयशर्मा व्यदधात्। २०.०३.२०१४ तमे दिनाङ्के शारदाविशिष्टव्याख्यानमालायाः सप्तमम् अतिन्तमं व्याख्यानम् शिक्षाशास्त्रे आचार्यः चान्दकिरणसलूजा व्यदधात्।



व्याख्यानमालायाः चित्रम्

**संस्कृतोत्सवस्य उद्घाटनम्** – २२.०८.२०१३ तमे दिनाङ्के पूर्वाह्णे ०८.३० वादने संस्कृतोत्सवस्य उद्घाटनं शृङ्गेरीश्रीमठस्य गुरुभवने जगद्गुरुभिः अनन्तश्रीविभूषितैः भारतीतीर्थमहास्वामिभिः दीपप्रज्वालनपुरःसरं विहितम्। सन्दर्भेऽस्मिन् वाक्यार्थभारत्याः उपनिषच्छिक्षायाश्च लोकार्पणं कृत्वा अनुग्रहभाषणमकार्षुः। अपराह्णे त्रिवादने प्रो. राधावर्या समापनसमरोहस्य मुख्यातिथित्वेन समागतासीत्। सन्दर्भेऽस्मिन् संस्कृतोत्सवमुपलक्ष्य पूर्वम् आयोजितासु विविधासु स्पर्धासुविजयं प्राप्तवद्भ्यः छात्रेभ्यः पुरस्काराः वितीर्णाः।

**शिक्षकदिनोत्सवः आचरितः** – ०५.०९.२०१३ तमे दिनाङ्के प्रातः सार्धदशवादने शिक्षकदिनोत्सवः आचरितः। परिसरस्य परम्परानुगुणं सन्दर्भेऽस्मिन् पेर्डूरुस्थायाः पेर्डूरुप्रौढशालायाः प्रधानाध्यापकः श्रीमान् हेच् एस् गणेशभट्ट वर्यः, शृङ्गगिरिस्थ-सर्वकारीय-प्रौढशालायाः उपप्रांशुपालः श्रीमान् विजयकुमारवर्यश्च शिक्षकप्रवर इत्युपाधिप्रदानपुरस्सरं सम्मानितौ।

**तृतीयदीक्षायाः उद्घाटनकार्यक्रमः** – २७.०९.२०१३ तमे दिनाङ्के सायाह्ने पञ्चवादने परिसरस्य अनौपचारिकसंस्कृतशिक्षणकेन्द्रेण सञ्चाल्यमानायाः तृतीयदीक्षायाः उद्घाटनकार्यक्रमः प्राचार्यस्य डा. एन्. आर्. कण्णन् वर्यस्याध्यक्ष्ये प्रवृत्तः, यत्र मुख्यातिथित्वेन शृङ्गेरीस्थ-श्रीमदभिनवविद्यातीर्थबालिकाप्रौढशालायाः प्रधानाध्यापकः द. राजवण्णवर्यः समाहूत आसीत्।

**हिन्दीदिवससमारोहः** – ३०.०९.२०१३ तमे दिनाङ्के अपराह्णे ०२.३० वादने हिन्दीदिवससमारोहः आचरितः। अभ्यागतरूपेण इन्दौरविश्वविद्यालयस्य निवृत्तहिन्दी- विभागाध्यक्षा प्रो. ललिताम्बा आमन्त्रिता आसीत्। सन्दर्भेऽस्मिन् हिन्दीदिवसमुपलक्ष्य पूर्वम् आयोजितासु विविधासु स्पर्धासु विजयं प्राप्तवद्भ्यः छात्रेभ्यः पुरस्काराः वितीर्णाः।

**नवनियुक्तिः** – शृंगेरीस्थ-जीवगान्धीपरिसरे व्याकरणशिक्षाशास्त्रसाहित्यविभागेषु क्रमशः डा.प्रमोदभट्टः, डा.कुमारः डा.एम्.श्रीनिवासमूर्तिः च अतिथिप्राध्यापकत्वेन २१.११.२०१३ तमे दिनाङ्के नियुक्ताः।

**कन्नडराज्योत्सवः** – २३.११.२०१३ तमे दिनाङ्के प्राचार्यस्याध्यक्ष्ये अपराह्णे २.३० वादने परिसरस्य सुदुघायां कन्नडराज्योत्सवः समाचरितः, यत्र अभ्यागतत्वेन



कन्नडराज्योत्सवस्य किञ्चन दृश्यम्

किन्निगोळिस्थपदविपूर्व-महाविद्यालयस्य निवृत्तप्राध्यापकः श्री डि.एस्.श्रीधरः समागतः आसीत्।

**स्वामिविवेकानन्दजयन्त्युत्सवः** - २६.११.२०१३ तमे दिनाङ्के स्वामिविवेकानन्दजयन्त्युत्सवः परिसरे समाचरितः, यत्र शिवमोग्गनगरस्थसह्याद्रिमहाविद्यालयस्य अर्थशास्त्रप्राध्यापकः श्रीनिधिमहोदयः अभ्यागतत्वेन समागतः आसीत्।



स्वामिविवेकानन्दजयन्त्युत्सवे भाषमाणः श्रीनिधिवर्यः

**अध्यापकवाक्यार्थपरिषदः अधिवेशने** - २७.११.२०१३ दिनाङ्के अध्यापकवाक्यार्थपरिषदः पञ्चमाधिवेशनं परिसरे प्रवृत्तम्, यत्र आचार्यः मधुसूदनः, सहाचार्यः प्रतिभा, सहायकाचार्यः श्रीकरः, सहायकाचार्यः रामकृष्णपेजत्तायश्च स्वस्वशास्त्रे वाक्यार्थं व्यदधुः। २९.०१.२०१४ तमे दिनाङ्के अध्यापकवक्यार्थपरिषदः षष्ठाधिवेशनं परिसरे प्रवृत्तम्, यत्र डा. चन्द्रकान्तः "शिक्षायां मूल्याङ्कनम्" इत्यस्मिन् विषये, डा. चन्द्रशेखरभट्टः "उपपदमतिङ्" इत्यस्मिन् विषये, श्री.आर्. नवीनः "प्रमालक्षणम्" इत्यस्मिन् विषये, डा. के.विनयः "क्रिया एव प्रवृत्तिनिमित्तम्" इत्यस्मिन् विषये च वाक्यार्थं व्यदधुः।




वाक्यार्थपरिषदः एकं चित्रम्

**त्रिदिवसीयराष्ट्रियसङ्गोष्ठी** - ०३.०३.२०१४ तः ०५.०३.२०१४ दिनाङ्कपर्यन्तं भारतीयदर्शनेषु प्रमाणविचारः इति विषयमधिकृत्य परिसरेण त्रिदिवसीयराष्ट्रियसङ्गोष्ठी सञ्चालिता यत्र डा. वेङ्कटेशताताचार्यः संयोजकः आसीत्। देशस्य विविधेभ्यः कोणेभ्यः अगतवद्भिः विद्वद्भिः समलङ्कृतायाः अस्याः संगोष्ठ्याः उद्घाटनं संस्थानकुलपतिचरेण डा.एन्.आर्.कण्णन् महाभागेन व्यधायि।



सङ्गोष्ठ्याः किञ्चन दृश्यम्

**राष्ट्रियसंस्कृतसङ्गोष्ठ्यः** - प्राचार्यस्य मार्गदर्शने हायनेऽस्मिन् अस्य मासस्य अष्टादशदिनांकतः आरभ्य मुक्तस्वाध्यायकेन्द्रमप्यविहाय विद्यमानेषु सर्वेषु विभागेषु राष्ट्रियसङ्गोष्ठ्यः तत्तद्विभागे आयोजिताः सन्ति। यत्र देशस्य विविधेभ्यः कोणेभ्यः विद्वांसः आगत्य स्वस्वशोधपत्रं प्रस्तुतीकृतवन्तः सन्ति।

**अनौपचारिकसंस्कृतशिक्षणम्** - प्रतिभागिनामाग्रहकारणात् द्वितीयचक्रे पुनः तृतीयदीक्षा एव जनवरीमासस्य त्रिंशत्तमे दिनाङ्के आरब्धा। कक्ष्याः यद्यपि काले आरब्धाः परन्तु औपचारिकरूपेण उद्घाटनकार्यक्रमः १४.०३.२०१४ तमे दिनाङ्के डा.सि.एस्.एस्.एन्.मूर्तिवर्यस्याध्यक्ष्ये प्रवृत्तम् यत्र श्रीमती ज्योतिकाकत्करवर्या मुख्याभ्यागतत्वेन आहूता आसीत्।

**विशिष्टव्याख्यानम्** - २०.०२.२०१४ दिनाङ्के शिक्षाशास्त्रविभागे तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य शिक्षाशास्त्रविभागीयानाम् आचार्यास्य नागमुनिरेड्डिवर्यास्य विशिष्टव्याख्यानकार्यक्रमः समायोजितः।

**अनुसन्धातृसङ्गोष्ठी** - जनवरीमासादारभ्य शोधच्छात्राणां कृते अनुसन्धान-विधिविज्ञानकक्ष्याः आयोज्यमानाः सन्ति याश्च कक्ष्याः मैमासान्तं यावत् प्रवर्तिष्यन्ते। एतदतिरिच्य ०९.०१.२०१४ तमे दिनाङ्के १३.०२.२०१४ तमे दिनाङ्के च सङ्गोष्ठीद्वयं प्रवृत्तम् यत्र षट् शोधच्छात्राः स्वस्वशोधविषयेषु शोधपत्राणि उपास्थापयन्। सङ्गोष्ठीद्वयं वर्षशेषे आयोजयिष्यते।




निरीक्षणस्य एकं दृश्यम्

**मुक्तस्वाध्यायपीठम्** - सम्पर्ककक्ष्याः तृतीयचरणे १९.०३.२०१३ तः प्रवर्तमानाः सन्ति। ११.११.२०१४ तमे दिनाङ्के च समाप्तिमेष्यति। २४.०३.२०१४ तमे दिनाङ्के संस्थानस्य मुक्तस्वाध्यापीठस्य परिसरीयस्वाध्यायकेन्द्रेण एकदिवसीयराष्ट्रिय-सङ्गोष्ठी सञ्चालिता।

**यु.जि.सि. समितेः निरीक्षणम्** - १३.०२.२०१४ तः १४.०२.२०१४ पर्यन्तं विश्वविद्यालानुदानायोगस्य निरीक्षणसमितिः परिसरमागत्य सर्वात्मना निरीक्षणं विधाय निरगच्छत्।

**वार्षिकोत्सवः** - ऐषमः वार्षिकोत्सवः २१.०३.२०१४ तमे दिनाङ्के संवृत्तः, यत्र मुख्याभ्यागतत्वेन सद्विद्यासञ्जीविनीसंस्कृत-महापाठशालायाः अध्यक्षः श्रीनागराजभट्टः प्रो. चान्दकिरणसलूजा च समागतौ आस्ताम्।

**छात्राणामुपलब्धिः**

०१.०९.२०१३ तमे दिनाङ्के शिवमोग्गस्थ-तरुणोदय-संस्कृत-सेवा-संस्थया आयोजितायां राज्यस्तरीयसंस्कृतभाषण-प्रतियोगितायां शृंगेरीपरिसरीयौ शास्त्रितृतीयवर्षीयः सूर्यहेब्बारः प्रथमस्थानं, आचार्यप्रथमवर्षीयः उमामहेश्वरः द्वितीयस्थानञ्च अवाप्नुताम्।

२७.०९.२०१३ तमे दिनाङ्के देहलीस्थ-लालबहादूर-संस्कृतविद्यापीठे प्रवृत्तायां भाषणप्रतियोगितायां आचार्यद्वितीयवर्षीयः सुब्रह्मण्यशास्त्री प्रथमस्थानं, अन्त्याक्षरी- प्रतियोगितायाञ्च आचार्यद्वितीयवर्षीयः हेच्. एम्. इन्दुशेखरः द्वितीयस्थानमवाप्य विजयवैजयन्तीं समासादयताम्।

२९.०९.२०१३ तमे दिनाङ्के शास्त्रीतृतीयवर्षीयच्छात्रा सीता भागवत् इत्याख्या दक्षिणाम्नाय शृङ्गेरी-श्रीशारदापीठे सम्पूर्णभगवद्गीतायाः कण्ठस्थीकरणं कृत्वा एकविंशतिसहस्रस्य रूप्यकाणां धनराशिं अवाप्नोत्।

१३.०९.२०१३ तमे दिनाङ्के लखनऊ-परिसरे प्रवृत्तायां राष्ट्रियसंगोष्ठ्यां सन्दीपकानेत्कर्, राजेश एम्.डि., नरेन्द्र बि.एस्. इत्याख्याः शोधच्छात्राः भागमगृह्णन्।

२७.०९.२०१३ तमे दिनाङ्के शृङ्गेरिस्थयुवविप्रवेदिकेपक्षतः सञ्चालितायां आशुभाषणप्रतियोतिगतायां शास्त्रितृतीयवर्षीयः सुदर्शनभट्टः द्वितीयस्थानं, शास्त्रिप्रथमवर्षीयः सुब्रायभट्टः तृतीयस्थानञ्च अवाप्नुताम्।

ओक्टोबरमासे लखनऊपरिसरे प्रवृत्ते युवमहोत्सवे शृङ्गेरीपरिसरीयाच्छात्राः सर्वाधिकान् पुरस्कारानवाप्य विजयवैजयन्तीं समपीपदन्।

**अन्तर्वेदपाठशालास्पर्धाः** (Inter Vedic Pathashala Compitation)

२५.०१.२०१४ तमे दिनाङ्के चेन्नै नगरस्थ ओम् चारिटेबल् ट्रस्ट् इत्याख्ययासम्स्थया आयोजितयाम् शास्त्रभाषणस्पर्धायां मीमांसाभाषणे शास्त्री तृतीयवर्षीयः गोविन्दगोपालकृष्णहेगडे द्वितीयस्थानं प्राप्तवान्।

**मुम्बईपरिसरे सङ्गोष्ठ्यां भागग्रहणम्**

६, ७, ८ मार्च २०१४ तमे दिनाङ्के मुम्बईपरिसरे व्याकरणशास्त्रभाषाविज्ञानयोः अन्तस्सम्बन्धः इति विषये प्रवृत्ता राष्ट्रियसङ्गोष्ठी। तत्र श्रङ्गेरीपरिसरस्य शोधच्छात्राः स्वशोधपत्रं प्रास्तुवन्। तेषां नामानि - अर्चना कारन्त्, भारती एस्, राघवेन्द्र पि आरोळ्ळि, मुखेशकुमारः।

**०५-०६.११.२०१३ दिनाङ्कयोः श्रीसोन्दास्वर्णवल्लिमठे राज्यस्तरीयसंस्कृतभाषणस्पर्धायां पुरस्कृताः छात्राः**

| क्र. | छात्रस्य/छात्रायाः नाम | स्पर्धायाः नाम | पुरस्कारः |
|---|---|---|---|
| १. | सूर्य हेब्बार S III | साहित्यभाषणम् | प्रथमः |
| | | समस्यापूर्तिः | द्वितीयः |
| | | श्लोकान्यक्षरी | तृतीयः |
| २. | निरञ्जनभट्टः S III | वेदान्तभाषणम् | प्रथमः |
| | | सांख्यभाषणम् | द्वितीयः |
| ३. | नागपति हेगडे S III | ज्योतिषभाषणम् | प्रथमः |
| ४. | प्रशान्त गाव्करः A I | मीमांसाभाषणम् | प्रथमः |
| ५. | शशाङ्कभट्टः A II | व्याकरणभाषणम् | प्रथमः |
| ६. | गोविन्द हेगडे S III | मीमांसाभाषणम् | द्वितीयः |
| ७. | कृष्णमूर्ति हेगडे S III | वेदान्तभाषणम् | द्वितीयः |
| ८. | प्रज्वल जैनः A II | सांख्यभाषणम् | प्रथमः |
| ९. | दयानन्दः A II | ज्योतिषभाषणम् | तृतीयः |
| १०. | रमेश्चन्द्रः A II | साहित्यभाषणम् | तृतीयः |

**२३-२५.०१.२०१४ दिनाङ्केषु तिरुपतिस्थराष्ट्रियसंस्कृत-विद्यापीठे स्पर्धासु विजेतारः छात्राः**

| नामानि | कक्षा | स्पर्धा | स्थानम् |
|---|---|---|---|
| सूर्य हेब्बारः | शा ३ | साहित्य भाषणम् | २ |
| | | समस्यापूर्तिः | २ |
| | | रसप्रश्नः | ३ |
| प्रशान्त गाँवकरः | आ १ | धर्मशास्त्रभाषणम् | १ |
| | | मीमांसाभाषणम् | २ |
| मञ्जुनाथ भट्टः | आ १ | एकपात्राभिनयः | ३ |
| निरञ्जन भट्टः | शा ३ | वेदान्तभाषणम् | १ |
| अरुण शर्मा | आ २ | ज्योतिष्यभाषणम् | ३ |
| भवानी | शा १ | सं. गीतगायनम् | २ |
| नवीन भट्टः | आ २ | रसप्रश्नः | ३ |
| | | व्यकरणभषणम् | |
| समाधानकरः | | | |
| सुमेधा के. के. | आ १ | न्यायभाषणम् | |
| भागग्रहणम् | | | |

## श्रीरणवीरपरिसरस्य वार्ताः

**संस्कृतसप्ताहोत्सवस्यायोजनम्** – राष्ट्रियसंस्कृतसंस्थानस्य जम्मूपरिसरेण संस्कृतसप्ताहोत्सवस्यायोजनप्रसङ्गे विविधाः स्पर्धाः समायोजिताः। तासां पुरस्कारवितरणम् २२.०८.२०१३ तारिकायां सुसम्पन्नम्। अस्मिन्नवसरे डा. वी.राघवन् स्मृतिव्याख्यानमालायाम् अर्वाचीनसंस्कृतत्रैमासिकशोधपत्रिकायाः प्रधानसम्पादकेन पद्मश्री डा. रमाकान्तशुक्लेन संस्कृतपत्रिकायाः डा. वी.राघवनसाहित्यसन्दर्भे संस्कृतसाहित्यं प्रति योगदानम् इति रेखाङ्कितं कृतम्। सारस्वतातिथिरूपेण संप्राप्ता आचार्या रीटा जितेन्द्रमहाभागा सञ्चारमाध्यमेषु नूतनं समसामयिकं च विषयमधिकृत्य लघुनाटिकाप्रसारणाय लेखितुम् युवसमाजस्य आह्वानं कृतवती। श्रीरणवीरपरिसरस्य प्राचार्येण डा. पी.एन. शास्त्रिणा विदुषमभिनन्दनं विहितम्। कार्यक्रमस्यामुष्य सञ्चालनम् आचार्येण साहित्यरत्नेन डा. सतीशकपूरेण विहितम्। वेदविभागाध्यक्षेणाचार्य डा. मनोजमिश्रेण सर्वेषां धन्यवादं प्रदत्तम्। डा. मदनकुमारझावर्य्येण पुरस्कारवितरणकार्यक्रमस्य सञ्चालनं कृतम्।

**विश्वविद्यालयनुदानायोगपुनरीक्षणसमितेः निरीक्षणम्** – अगस्तमासस्य २४, २५ दिनाङ्कयोः विश्वविद्यालयनुदाना-योगपुनरीक्षणसमितेः निरीक्षणं संस्थानकुलसचिवस्य तथा च परिसरप्राचार्यस्य मार्गदर्शने सञ्जातम्। तत्र अधोलिखिताः सदस्याः समागताः –

१. प्रो. नीलकण्ठपतिः, (अध्यक्षः), २. प्रो. रमेशचन्द्रपण्डा, (सदस्यः) ३. प्रो. पुरुषोत्तमशर्मा, (सदस्यः) ४. श्रीमती अर्चनाठाकुर, सदस्या (यू.जी.सी.)

**अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्योद्घाटनम्** – ११.०९.२०१३ दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य जम्मूपरिसरे प्रथमद्वतीयदीक्षयोः अनौपचारिकसंस्कृतशिक्षणेकेन्द्रस्योद्घाटनम् अनौपचारिकसंस्कृतशिक्षणस्य प्रान्तीयसंयोजकानां राष्ट्रपतिपुरस्कारेण सम्मानितस्य प्रो. विश्वमूर्तिशास्त्रिवर्यस्य तथा च परिसरप्राचार्यस्य प्रो. पी.एन. शास्त्रिमहोदयस्य करकमलैः सञ्जातम्। कार्यक्रमे समागतानां विदुषां स्वागतं केन्द्राध्यक्षेण डा. मदनकुमारझामहोदयेन विहितम्। कार्यक्रमस्यामुष्य सञ्चालनं प्रथमदीक्षाध्यापकेन सुशान्तेन कृतम्। धन्यवादार्पणं द्वितीयदीक्षाध्यापकेन अमितकुमारेण कृतम्। शान्तिपाठेन कार्यक्रमस्यास्य समापनं सञ्जातम्।

**समायोजितः शिक्षकदिवसोत्सवः** – १४.०९.२०१३ दिनाङ्के १२ वादने अस्मिन् परिसरे शिक्षकदिवसोत्सवः सुसम्पन्नः। अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण ए.वी.एन. रावः (उपायुक्तः केन्द्रीयविद्यालयसंगठनम्) महोदयः समागतः आसीत्। परिसरप्राचार्यः प्रो. पी.एन. शास्त्रिवर्यः कार्यक्रमस्य अध्यक्षः आसीत्। समागतानां स्वागतं शिक्षाविभागाध्यक्षेण डा. जगदीशराजशर्मणा विहितम्।

**समायोजितः राष्ट्रियशिक्षादिवसोत्सवः** – ११.११.२०१३ दिनाङ्के सोमवासरे अपराह्ने २.३० वादने अस्मिन् परिसरे राष्ट्रियशिक्षादिवसोत्सवः सुसम्पन्नः। अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण श्रीविजयसिंहसम्बयालः (डी.आई.जी.) समागत आसीत्। विशिष्टातिथिरूपेण च प्रो. सतपालश्रीवत्सः आसीत्। परिसरप्राचार्यः प्रो.पी.एन. शास्त्री कार्यक्रमस्य अध्यक्षः आसीत्। समागतानां स्वागतं शिक्षाविभागाध्यक्षेण डा.जगदीशराजशर्मणा विहितम्। धन्यवादार्पणम् आधुनिकविभागाध्यक्षेण श्रीशरत्चन्द्रमहोदयेन विहितम्। शिक्षाविभागाध्यापकेन डा. मदनकुमारझामहोदयेन कार्यक्रमस्य सञ्चालनं कृतम्।



राष्ट्रियशिक्षादिवससमारोहे प्रो. सत्यपालश्रीवत्सं सम्मानयन् प्राचार्यः पी.एन. शास्त्री अन्ये च

**समायोजिता हिन्दीपखवाडा** – राष्ट्रियसंस्कृतसंस्थानस्य जम्मूपरिसरेण हिन्दीपखवाडा इत्यस्यायोजनप्रसङ्गे विविधाः प्रतियोगिताः समायोजिताः। तासां पुरस्कारवितरणं २०.०९.२०१३ तारिकायां २.३० वादने सुसम्पन्नम्। तत्र मुख्यातिथिरूपेण श्रीरमेशमेहता (पूर्वसचिवः, कला, संस्कृति व भाषा अकादमी, जम्मू) समागतः। सम्मानितातिथिरूपेण डा. निर्मलविनोदः, परिसरप्राचार्यः प्रो. पी.एन. शास्त्री कार्यक्रमस्य अध्यक्षः आसीत्। समागतानां स्वागतं आधुनिकविभागाध्यक्षेण श्री.शरतशर्मणा विहितम्। डा. निर्मलविनोदमहोदयस्य प्रशस्तिवाचनं शिक्षाविभागाध्यापकेन डा.मदनकुमारझामहोदयेन कृतम्। परिसरे प्रतिवर्षमिव अस्मिन् वर्षे अपि हिन्दीमित्रसम्माननेन श्रीप्रेमचन्दशर्मा परिसरीय सहायककर्मचारी सम्मानितः। अवसरेऽस्मिन् हिन्दीकवितापाठः परिसरीयप्राध्यापकेन डा.ऋषिराजः, डा. मदनकुमारझा, डा. हरिशंकरपाण्डेयः, डा. सञ्जयकुमारमिश्रः प्रभृतयः, तथा च सुरेन्द्रकुमारः, मञ्जुबाला छात्राध्यापकौ कवितापाठः कृतवन्तौ। परिसरप्राचार्येण प्रो.पी.एन.शास्त्रिणा विदुषामभिनन्दनं विहितम्। वेदविभागाध्यक्षेण प्रो.मनोजकुमारमिश्रेण समागतानां धन्यवादार्पणं विहितम्। कार्यक्रमस्यास्य सञ्चालनं हिन्दीविभागाप्रध्यापकेन आशुकविना डा. सञ्जयकुमारमिश्रेण विहितम्।



कार्यक्रमे डा. विनोदगुप्तं सम्मानयन् प्राचार्यः पी.एन. शास्त्री डा. रमेशमेहता च

**समायोजितः गीताजयन्तीसमारोहः** – ऐषमः १३.१२.२०१३ दिनाङ्के गान्धीनगरकेन्द्रीयविद्यालयजम्मूसभागारे श्रीरणवीरपरिसरेण गीताजयन्तीसमारोहः अन्तःकेन्द्रीयविद्यालयीय- श्रीमद्भगवद्गीताकण्ठपाठ- प्रतियोगिता च समायोजिता। यस्मिन् प्राथमिक-माध्यमिककक्षायाः जम्मूस्थ- षड् केन्द्रीयविद्यालयीय ४०० छात्राः भागम् अवहन्। तथा च श्रीरणवीरपरिसरस्य तद् तद् विभागीयाः विभागाध्यक्षाः प्राध्यापकाश्च अन्तः केन्द्रीयविद्यालयीयश्रीमद्भगवद्गीताकण्ठपाठप्रतियोगितायाः निर्णायकत्वेन समागताः आसन्। अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण प्राचार्या श्रीमती रोमी अमृत्त गान्धीनगरकेन्द्रीयविद्यालयजम्मूमहोदया समागता आसीत्। परिसरप्राचार्यः प्रो.पी.एन.शास्त्री कार्यक्रमस्य अध्यक्षः आसीत्। शिक्षाविभागाध्यक्षः डा.जगदीशराजशर्मा अस्य कार्यक्रमस्य संयोजक आसीत्। समागतानां स्वागतं परिसरप्राचार्येण प्रो.पी.एन.शास्त्रीवर्येण विहितम्। धन्यवादार्पणम् शिक्षाविभागाध्यक्षेण डा.जगदीशराजशर्मणा विहितम्। शिक्षाविभागाध्यापकेन कार्यक्रमस्य सह संयोजकेन डा. मदनकुमारझा महोदयेन कार्यक्रमस्य सम्यक्तया सञ्चालनम् कृतम्।

**समाचरितः व्यासदिवसोत्सवः** – २२.०७.२०१३ ऐषमः परिसरे शिक्षाविभागे परिसरप्राचार्याणाम् प्रो.पी.एन.शास्त्रीवर्याणां आध्यक्षे शिक्षाविभागाध्यक्षाणां डा.जगदीशराजशर्मणः समुपस्थितो व्यासदिवसोत्सवः समाचरितः। विभागीयप्राध्यापकाः छात्राश्च कार्यक्रमे समुपस्थिताः आसन्।

**शिक्षाविभागे सम्भाषणशिबिराणि** – शिक्षाविभागे ऐषमः परिसरप्राचार्णां प्रो.पी.एन.शास्त्रीवर्याणां, तथाच शिक्षाविभागाध्यक्षाणां डा.जगदीशराजशर्मणः समुपस्थितौ उद्घाटितम्। शिबिरत्रयम् समायोजितम्। शिक्षाशास्त्रीयच्छात्राध्यापाकानां कृते वर्गद्वये शिक्षाचार्यच्छात्राणाम् एकम् तत्र निम्नलिखिताः अध्यापकाः नियुक्ताः –

१. श्रीप्रमोदकुमारः (शिक्षाचार्यच्छात्रः), २. श्रीकेहरसिंहः (व्याकरणाचार्यप्रथमवर्षीयच्छात्रः), ३. श्रीसुशान्तशर्मा (साहित्याचार्यप्रथमवर्षीयच्छात्रः), ४. श्रीसत्यदेवः (शोधच्छात्रः)

**समायोजितः सूक्ष्मशिक्षणवर्गः** – शिक्षाविभागे एकसप्ताहत्मकः सूक्ष्मशिक्षणवर्गः चालितः। यत्र विभागीयप्राध्यापकाः सर्वे निरीक्षकरूपेण योजिताः।

**समायोजिता राज्यस्तरीयप्रतियोगिता** – ऐषमः परिसरप्राचार्याणां प्रो.पी.एन.शास्त्रीवर्याणां समुपस्थितो नवम्बर मासस्य ०६ दिनाङ्के ५२तमी राजस्तरीयप्रतियोगितायाः आयोजनं कृतम्। यत्र मुख्यातिथिरुपेण वेदव्यासपरिसरस्य प्राचार्याः डा.लक्ष्मीनिवासपाण्डेयमहोदयाः समागताः। ततः केचन् विषयविशेषज्ञाः अपि समागताः यथा- व्याकरणशास्त्राध्यक्षाः डा.के.सोमयाजीलू महोदयाः, ज्योतिषविभागाध्यक्षाः डा. के.वी.सुब्रह्मण्यम् महोदयाः।

**विशिष्टव्याख्यानमाला वाणीविलासपरिषद् उद्घाटनञ्च** – दिसम्बरमासस्य ०९ दिनाङ्के सोमवासरे ११.३० वादने अस्मिन् परिसरे विशिष्टव्याख्यानमाला वाणीविलासपरिषद् उद्घाटनञ्च सुसम्पन्नः। कार्यक्रमस्य शुभारम्भः वैदिकमङ्गलाचरणेन अभूत। अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण राष्ट्रियसंस्कृतविद्यापीठतिरुपतिः इत्यस्य कुलपतयः प्रो.हरेकृष्णशतपथीमहोदयाः समागता आसन्। परिसरप्राचार्याः प्रो. पी.एन.शास्त्रीवर्याः कार्यक्रमस्य अध्यक्षाः आसन्। अतिथीनां स्वागतं परिसरप्राचार्येण प्रो.पी.एन.शास्त्रिवर्येण विहितम्। वेदविभागाध्यक्षेण प्रो. मनोजकुमारमिश्रेण समागतानां धन्यवादार्पणं विहितम्। शिक्षाविभागाध्यापकेन वाणीविलास-सहसंयोजकेन डा. मदनकुमारझा महोदयेन कार्यक्रमस्य सम्यकतया सञ्चालनम् कृतम्। कार्यक्रमस्य समापनं शान्तिपाठेन सञ्जातम्।

**महिलाभोजनशालायाः उद्घाटनम्** – ऐषमो महिलाभोजनशालायाः उद्घाटनं मासस्य १०.१०.२०१३ दिनाङ्के परिसरे अस्मिन् परिसरप्राचार्यैण छात्रवत्सलेन प्रो.पी.एन.शास्त्रीवर्याणां करकमलैः सञ्जातम्।

**द्वितीयदीक्षायाः केन्द्रस्य समुद्घाटनम्** – ०३.०१.२०१४ दिनाङ्के परिसरे अनौपचारिकसंस्कृतशिक्षाकेन्द्रस्य उद्घाटनं परिसरस्य प्राचार्यचरः प्रो. विश्वमूर्तिशास्त्री अकरोत्।

**राष्ट्रियसङ्गोष्ठी** – जम्मूपरिसरेऽस्मिन् 'शैवदर्शन-साहित्यशास्त्रपरम्परयोः कश्मीराणां योगदानम्' इत्यस्मिन् विषये १९-२१ मार्च, २०१४ दिनाङ्केषु त्रिदिवसीया राष्ट्रिया सङ्गोष्ठी सुसम्पन्ना। अस्याः राष्ट्रियसङ्गोष्ठ्याः समुद्घाटनं जम्मू-कश्मीरप्रान्तस्य महामहिमानो राज्यपालाः माननीयाः श्री एन. एन. वोहरा अकुर्वन्। उद्घाटनसत्रे सारस्वतातिथित्वेन पद्मश्रीः प्रो. वेदकुमारीघई महोदया (जम्मूविश्वविद्यालयस्य संस्कृतविभागे विभागाध्यक्षचरा) विशिष्टातिथित्वेन च राष्ट्रपतिसम्मानेन अलङ्कृतो विद्वान् प्रो. विश्वमूर्तिशास्त्री (जम्मूपरिसरस्य प्राचार्यचरः) समुपस्थितौ आस्ताम्। अस्य कार्यक्रमस्य अध्यक्षता



सङ्गोष्ठ्याः उद्घाटनसत्रे कुलपतये
स्मृतिचिह्नं समर्पयन् प्राचार्यः पी.एन. शास्त्री

राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. एन.आर. कण्णन् अकरोत्।

सङ्गोष्ठ्याः समापनसत्रे मुख्यातिथित्वेन प्रो. रमेशकुमारपाण्डेयः (कुलपतिः श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली), सारस्वतातिथित्वेन प्रो. श्रीधरवसिष्ठः (कुलपतिचरः श्रीलालबहादुरशास्त्रिराष्ट्रिय- संस्कृतविद्यापीठम्, नवदेहली) विशिष्टातिथिश्च प्रो. नालिनीकोहली (निदेशकचरा, उच्चशिक्षामहाविद्यालयः, जम्मू-कश्मीरम्) च समुपस्थिताः आसन्। समापनसत्रस्याध्यक्ष्यं प्रो. पी.एन. शास्त्रिणा विहितम्।

त्रिदिवसीयसङ्गोष्ठ्याः अन्तर्गतं प्रायः ६० शोधपत्राणि वाचितानि अभवन्। सङ्गोष्ठयाः संयोजनं वेदविभागाध्यक्षः प्रो. मनोजकुमारमिश्रः साहित्यविभागाध्यक्षः सतीशकपूरश्च अकुरुताम्।




सङ्गोष्ठ्याम् अथितये स्मृतिचिह्नं समर्पयन्तौ कुलपतिः प्राचार्यश्च

**जम्मूपरिसरीयछात्राणां क्रियाकलापाः उपलब्धयश्च–**

श्रीसुशान्तः (साहित्याचार्य प्रथमवर्षीयच्छात्रः) चण्डीगढ-अकादमीद्वारा आयोजितायां वादविवादस्पर्धायां स्वर्णपदकं तथा च प्रथमपुस्काररूपेण ५००० रुप्यकाणि प्राप्तवान्। अनेन युवमहोत्सवे वादविवादस्पर्धायां स्वर्णपदकं प्रमाणपत्रञ्च प्राप्तवान्।

श्रीगौरवः चण्डीगढअकादमीद्वारा आयोजितायां वादविवादप्रतियोगितायां रजतपदकं तथा च द्वितीयपुरस्काररुपेण ३००० रुप्यकाणि प्राप्तवान्।

श्रीगौरवः आकाशवाणीजम्मूद्वारा प्रसारिते व्यासदिवसे गुरुमहत्त्वविषये व्याख्यानं दत्तवान्।

## भोपालपरिसरस्य शैक्षणिकगतिविधयः

**गणतन्त्रदिवसः –** भारतसङ्घस्य संविधानाङ्गीकरणदिवसस्मृतौ भौपालपरिसरे २६.१०.२०१४ इत्यस्मिन्नहनि समाचरितो गणतन्त्रदिवसः। प्राचार्येण प्रो. आजादमिश्रमहोदयेन ध्वजारोहणं विहितम्। तत्र राष्ट्रस्य वर्तमानस्थितिं संलक्ष्य कर्त्तव्याकर्त्तव्यबोधः शिक्षकेभ्यः कर्मचारिभ्यः छात्रेभ्यश्च दत्तः।




गणतन्त्रदिवसा वसरस्य एकं चित्रम्

**त्रिदिवसीया राष्ट्रियसङ्गोष्ठी–** राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरे २७.०१.२०१४ दिनाङ्कात् २९.०१.२०१४ दिनाङ्कं यावत् त्रिदिवसात्मिका राष्ट्रियसङ्गोष्ठी आयोजिता। अस्यां सङ्गोष्ठ्यां मुख्यातिथिरूपेण वरिष्ठसाहित्यकारः शिक्षाविद् च डॉ. प्रेमभारतीमहोदयः, सारस्वतातिथिरूपेण अटलबिहारीहिन्दीविश्वविद्यालयस्य कुलपतिः प्रो. मोहनलालछीपामहोदयः, कार्यक्रमस्याध्याक्षः परिसरप्राचार्यः प्रो. आजादमिश्रमहोदयः, शिक्षाशास्त्रविभागस्याध्यक्षा प्रो. सन्तोषमित्तलमहोदया च आसन्। तत्र विभिन्नसत्रेषु मनोविज्ञानस्य विभिन्नायामाः इत्यस्मिन् विषये शोधपत्रवाचनानि अभवन्।



उद्घाटनसमारोहस्य किञ्चन चित्रम्

**भारतीयज्योतिषपरिचयपाठ्यक्रम-वास्तुपरिचयपाठ्यक्रमयोः उद्घाटनसमारोहः–**राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरस्य ज्योतिषविभागेन समायोजितयोः भारतीयज्योतिषपरिचयपाठ्यक्रमवास्तुपरिचयपाठ्यक्रमयोः उद्घाटनसमारोहः ०५.०२.२०१४ दिनाङ्के अभवत्। अस्मिन् कार्यक्रमे अध्यक्षीयभाषणे प्रो.सुबोधकुमारशर्ममहोदयेन ज्योतिषशास्त्रस्य वर्तमानसमये उपयोगिता प्रतिपादिता। वास्तुशास्त्रपरिचयपाठ्यक्रमस्य समन्वयकः प्रो. हंसधरझामहाभागः ज्योतिषशास्त्र-वास्तुशास्त्रयोः उद्भवविकासयोः विषये कथितवान्। कार्यक्रमस्य सञ्चालनं ज्योतिष-शास्त्रपरिचयपाठ्यक्रमस्य समन्वयकेन डॉ. अशोकथपलियालेन कृतम्। कार्यक्रमे विभागस्य आचार्याः डॉ. अवधेशकुमारश्रोत्रियः, डॉ. नीलमाधवदाशः, श्री रोहितपचौरी इत्यादयः अपि समुपस्थिताः आसन्।

## क.जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बईपरिसरः




शोभायात्रायाः किञ्चन दृश्यम्

**संस्कृतमहोत्सवः** – ऐषमः संस्कृतसप्ताहोत्सवः मुम्बईपरिसरे दिनाङ्कः १९.०८.२०१३ तः २१.०८.२०१३ पर्यन्तं समायोजितः। त्रिदिवसीयसंस्कृतसप्ताहोत्सवेऽस्मिन् शोभायात्रा, उद्घाटनोत्सवः, शिविरसमापनम्, श्रावणी-उपाकर्म, संस्कृतकविगोष्ठी, शैक्षिकस्पर्धाः, समारोपकार्यक्रमः इत्येवं नैके कार्यक्रमाः समायोजिता समभवन्। तेषां विवरणमत्र क्रमशः प्रदीयते –

**शोभायात्रा** – संस्कृतसप्ताहोत्सवस्य आरम्भः १९.०८.२०१३ दिनाङ्के प्रातः १०.०० वादने शोभायात्राद्वारा घटितः। शोभायात्रायां विद्यापीठीयसमस्तपरिवारगणः छात्राश्च भागमवहन्। यात्रेयं सोमैयाविद्याविहारपरिसरे अभवत्। सर्वे छात्राः अध्यापकाः कर्मचारिणश्च संस्कृतमहत्त्वं प्रतिपादयन्ति स्फोरकपत्राणि सम्प्रदर्शयन्तः, सोद्घोषणं, विद्यापीठीयगतिविधीनां प्रदर्शकानि करपत्राणि वितरन्तः सोत्साहं भागमवहन्।




स्पर्धाकार्यक्रमस्य एकं चित्रम्

**संस्कृतसप्ताहोत्सवः** – संस्कृतसप्ताहोत्सवस्य उद्घाटनं १९.०८.२०१३ दिनाङ्के प्रातः ११.३० वादने पुण्यपत्तनस्थस्य अखिलभारतीयप्राच्यविद्यासम्मेलनस्य महासचिवस्य प्रो. सरोजाभाटेमहाभागायाः आध्यक्ष्ये मध्याह्ने समभूत्। तदा सा संस्कृतभाषायाः प्राचीनवैभवं प्रतिपादयन्तीः संस्कृतभाषायाः आधुनिकोपयोगितां प्रत्यपादयत्। सभायां विदुषां परिसरीयशास्त्रचूडामणेः प्रो. एन्.एन्. जोशीमहोदयस्य विद्वत्समाननं प्राचार्येण व्यधायि। तदा जोशीमहोदयाः संस्कृतस्य सांस्कृतिकं महत्त्वं न्यरूपयन्। उद्घाटनकार्यक्रमे स्वागतभाषणं प्रो. एम्. चन्द्रशेखरमहोदयेन, धन्यवादसमर्पणं प्रो. प्रकाशचन्द्रमहोदयेन च विहितम्। कार्यक्रमस्य सञ्चालनं डा. देवदत्तसरोदेमहोदयेन व्यधायि। उद्घाटनमुपलक्ष्य परिसरीयच्छात्राणां सांस्कृतिककार्यक्रमाः अपि समभवन्।

संस्कृतसप्ताहसमापनसमारोहः २१.०८.२०१३ दिनाङ्के मध्याह्ने २.३० वादने प्राचार्यस्यामाध्यक्ष्ये समनुष्ठितः। कार्यक्रमे मुख्यातिथिरूपेण मुम्बईकेन्द्रीयविद्यालयसङ्घटनस्य उपायुक्तः श्रीमती लक्ष्मीचारी समागत्य वर्तमानकाले भौतिकवादस्य भागवादस्य च कारणेनैव अनेकाः समस्याः जायन्ते, तासां समस्यानां समाधानं संस्कृतमेव भवितुमर्हतीति प्रावोचत्। कार्यक्रमस्यान्ते संस्कृतस्पर्धासु पुरस्कारभाग्भः छात्रेभ्यः पुरस्काराः प्रादीयन्त। कार्यक्रमे स्वागतभाषणं व्याकरणविभागाध्यक्षेण प्रकाशचन्द्रेण, धन्यवादसमर्पणं डा. भास्कररेड्डीद्वारा च विहितम्। सभासञ्चालनं डा. आर्. गायत्रीमुरलीकृष्णः समकरोत्।




कार्यक्रमे भाषमाणः प्रो. प्रकाशचन्द्रः

**संस्कृतसम्भाषणशिबिरस्य समापनोत्सवः** – संस्कृतसप्ताहान्तर्गतस्य समायोजितस्य दशदिवसीयसंस्कृतसम्भाषणशिबिरस्य समापनोत्सवः १९.०८.२०१३ दिनाङ्के २.३० वादने परिसरे अभवत्। तत्र शिक्षणरूपेण श्रीमान् गोपालकुमारमिश्रः पूर्वशिक्षा-शास्त्रच्छात्रः समागतः। शिविरे शिक्षाशास्त्रविभागीयाः परिसरीयच्छात्राः भागमवहन्।

**श्रावणी-उपाकर्म** – संस्कृतसप्ताहान्तर्गते द्वितीयदिने २०.०८.२०१३ दिनाङ्के प्रातः ११.०० वादने सर्वैः विद्यापीठपरिवारगणैः श्रावणी-उपाकर्मरूपेण पूजा यज्ञञ्च समनुष्ठितम्।

**संस्कृतकविगोष्ठी** – संस्कृतसप्ताहोत्सवे २०.०८.२०१३ दिनाङ्के मध्याह्ने २.३०वादनतः परिसरे संस्कृतकविगोष्ठी समायोजिता। कविगोष्ठ्यां महाराष्ट्रे सुप्रसिद्धकवयः श्रीमन्तः समायोजिता। तदर्थं मुम्बईमध्ये विद्यमानेभ्यः विविधविद्यालयेभ्यः, महाविद्यालयेभ्यः च छात्राः समागत्य स्पर्धासु भागमगृह्णन्। स्पर्धासु न्यायनिर्णेतृरूपेण प्रो. एन्.एन्. जोशी, प्रो. बोधकुमारझाः, श्रीमती प्राचीमहोदया च आसन्।

**हिन्दीपखवाडाकार्यक्रमः** – १३.०९.२०१३ दिनाङ्के मुम्बईपरिसरे हिन्दीपखवाडायाः उद्घाटनकार्यक्रमे मुम्बईनगरराजभाषासहायकनिदेशकः डा. अनंत श्रीमालीमहोदयः मुख्यातिथित्वेन, रामनिरञ्जन झुनझुनवाला महाविद्यालयहिन्दीविभागाध्यक्षः डा. मिथिलेशशर्मामहोदयः सारस्वतातिथित्वेन च समागताः। परिसरीयव्याकरणविभागाध्यक्षः प्रो. प्रकाशचन्द्रमहोदयः सभायाः आध्यक्ष्यं स्वीचकार। अत्र उद्घाटनकार्यक्रमे सर्वे हिन्दीभाषायाः महत्त्वेन साकं संस्कृतभाषायाः अनिवार्यतायाः विषये चर्चां कृतवन्तः।

२५.०९.२०१३ दिनाङ्के परिसरे निबन्धलेखनम्, आशुभाषणम्, स्फूर्तिस्पर्धा इति अन्तर्महाविद्यालयीयहिन्दीप्रतियोगिताः समायोजिताः। प्रतियोगितासु अहमहमिकया बहवः छात्राः मुम्बईस्थ-विविधमहाविद्यालयेभ्यः समागत्य भागमवहन्। तदा तेषां भाषण-तार्किकशक्तीः प्राकटयन्। अन्ते स्पर्धासु पुरस्कारार्हान् छात्रान् अतिथयः पुरस्कृतवन्तः। स्पर्धासु निर्णेतृरूपेण मुम्बईविश्वविद्यालयहिन्दीविभागाध्यक्षचरः डा.



पुरस्कारवितरणस्य किञ्चन दृश्यम्

माधवपण्डितः, शिक्षाविद् श्रीचन्द्रवीरयादवमहोदयः, डा. त्रिभुवनपाठकमहोदयश्च भागमवहत्।

२५.०९.२०१३ दिनाङ्के परिसरे अपराह्ने त्रिवादने हिन्दीपखवाडायाः समापनं मासीत्। प्राचार्यस्यामाध्यक्ष्ये, दैनिकजगरणपत्रिकायाः चीफब्यूरो श्री ओंप्रकाशतिवारीमहोदयस्य मुख्यातिथित्वे, मुम्बईविश्वविद्यालयीयहिन्दीविभागाध्यक्षस्य डा. करुणाशङ्करउपाध्यायमहोदयस्य सारस्वतातिथ्ये च समापनकार्यक्रमोऽयं सम्बभूव। कार्यक्रमेऽस्मिन् हिन्दीभाषायाः महत्वप्रतिपादनेन साकं विश्वभाषासु हिन्दीभाषायाः स्थानविषये आङ्ग्लपदानां समावेशनेन जायमानदोषाणां विषये च चर्चा समजनि। इत्थं परिसरीयहिन्दीप्राध्यापिकायाः डा. गीतादूबेवर्यायाः संयोजकत्वे डा. रंजयकुमारसिंहसाहाय्येन अन्येषां सर्वेषामपि अध्यापकानां सहयोगेन च हिन्दीपखवाडाकार्यक्रमः सम्पन्नः।

**अन्तःपरिसरीययुवमहोत्सवे प्रतिभागिता** – मुम्बईपरिसरे २६-२५.१०.२०१३ दिनाङ्कयोः अन्तःपरिसरीययुवमहोत्सवः लखनऊपरिसरे समायोजितः। तस्मिन् महोत्सवे ४७ छात्र/छात्राः परिसरतः भागमगृह्णन्। तेषु पञ्च छात्राः पुरस्कारान् अलभन्। तद्यथा–विदुषी बोल्ला–योगाभ्यासे, (सुवर्णपदकम्), कु. नम्रता ठक्कर–व्यंग्यचित्रे (रजतपदकम्) एवं रंगवल्यां (कांस्यपदकम्), कु. आशा छेडा–आशुचित्रे (कांस्यपदकम्), सत्यनारायणः मल्लयुद्धे (कांस्यपदकम्)।

**गोवा–महाराष्ट्र–राज्यस्तरीय–संस्कृत–वाक्यप्रतिस्पर्धा** – २२.११.२०१३ दिनाङ्के गोवा–महाराष्ट्र–राज्यस्तरीय–संस्कृत–वाक्यप्रतिस्पर्धा समजनि। तत्र पुणे, नांदेड, मुम्बादेवी आदर्शमहाविद्यालयः मुम्बई, क. जे. सोमैया संस्कृतविद्यापीठपरिसरतः छात्राः भागमगृह्णन्। तत्र चिताः छात्राः अखिलभारतीयशास्त्रीयस्पर्धायां भागग्रहीतारः भवन्ति। अभ्यागतानां विदुषः सम्माननं परिसरप्राचार्याः प्रो. एम्. चन्द्रशेखरः अकार्षीत्।

**यू.जी.सी.समित्या निरीक्षणम्** – ७-८.१२.२०१३ दिनाङ्कयोः मुम्बईपरिसरे यू.जी.सी. समित्या निरीक्षणं विहितम्। आचार्यस्य श्रीनीलकण्ठपतिमहोदयस्य आध्यक्ष्ये निरीक्षणसमितिः पर्यवेक्षणम् अकरोत्। अस्यां समितौ आचार्यः रमेशपण्डा,, बनारसहिन्दुविश्वविद्यालयस्य व्याकरणविभागाध्यक्षा श्रीमती. अर्चना ठाकुर, यू.जी.सी. सदस्यः प्रो. पुरूषोत्तमशर्मा, जम्मूविश्वविद्यालयस्य संस्कृतविभागाध्यक्षयचरा डा. देबरचनासरकार, कोलकत्ताविश्वविद्यालयतः आचार्यः रवीन्द्रमूले पुण्यपत्तनतः आसन्।

**ग्लोरिफेस्ट (Glory Fest)** – जगन्नाथपुर्यां जनवरीमासे ८ तः ११ यावत् प्रचालिते राज्यस्तरीयान्तःशास्त्रीय- विकासोत्सवे अतिथिप्राध्यापकश्रीभरतगर्ग–महोदयस्य मार्गदर्शकत्वे विद्यापीठीयाः ६ छात्राः भागमगृह्णन्।

**प्राथमिकोपचारप्रशिक्षणम्** – शिक्षाशास्त्रिच्छात्राध्यापकानां प्राथमिकोपचारप्रशिक्षणं जनवरीमासे सम्पन्नम्।

**अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहः (तिरुपतिः)** – तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठेन सञ्चाल्यमाने अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहे जनवरीमासे २२ तः २५ यावत्, डॉ. ई.आर्. नारायणस्य मार्गदर्शकत्वे विद्यापीठीयाः ५ छात्राः विभिन्नस्पर्धासु भागमगृह्णन्।

**बालचरसङ्घप्रशिक्षणम्** – शिक्षाशास्त्रिच्छात्राध्यापकानां बालचरसंघप्रशिक्षणं फरवरीमासस्य २४.०२.२०१४ तः ०२.०३.२०१४ पर्यन्तं चेम्बूरनगरे समभवत्।

**त्रैयह्निकीव्याकरणशास्त्रीयराष्ट्रियसंगोष्ठी** – ०४.०३.२०१४ तः ०६.०३.२०१४ यावत् विद्यापीठेन अस्मिन्नवर्षे दिवसत्रयव्यापिनी व्याकरणशास्त्रीयराष्ट्रियसंगोष्ठी व्याकरणभाषाविज्ञानयोः अन्तःसंबन्धः इति विषयमाधारीकृत्य समायोजिता। तत्र भारतस्य विभिन्नकोणेभ्यः विख्याताः व्याकरण–भाषाविज्ञानक्षेत्रयोः कृतभूरिपरिश्रमाः नैके विद्वांसः समेत्य गोष्ठ्याः शोभां संवर्धितवन्तः। तत्र उद्घाटने जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिचरः प्रो. रामानुजदेवनाथन् मुख्यातिथिरूपेण, सोमैयान्यासस्य सचिवः डॉ. रङ्गनाथन् विशिष्टातिथिरूपेण, पं. रामरूपमिश्रः सारस्वतातिथिरूपेण च समागताः आसन्। समापनसत्रे कविकुलगुरुकालिदास–संस्कृत–विश्वविद्यालयस्य कुलपतिः प्रो. उमावैद्या मुख्यातिथिरूपेण, भारतीयसंस्कृतिपीठस्य निदेशिका डा. कला आचार्या सारस्वतातिथिरूपेण च समागते। संगोष्ठ्यामस्यां विद्वद्भिः, शोधच्छात्रैः आहत्य गवेषणपूर्णानि ३२ शोधपत्राणि प्रस्तुतानि। अस्याः संगोष्ठ्याः संयोजकः व्याकरणविभागाध्यक्षः प्रो. प्रकाशचन्द्रः, सहसंयोजकः प्रो.बोधकुमारझाः च आस्ताम्।

**विशिष्टव्याख्यानमाला (ज्यौतिष–साहित्य–शिक्षाशास्त्रेषु)** – ज्यौतिष–साहित्य–शिक्षाशास्त्रेषु आन्तरिकमूल्याङ्कनप्रत्यायन–परिषदा अस्मिन् वर्षे एकदिवसीयासङ्गोष्ठी १५.०३.२०१४ दिनाङ्के समायोजिता। अस्यां संगोष्ठ्यां प्रो. सच्चिदानन्दमिश्रः, प्रो. देवीप्रसादत्रिपाठी, डा.एन्.डी. जोशी, डा. मोहनाप्टे, डा.एन्.एन्. जोशी, अन्ये विद्यापीठीयाप्राध्यापकाः स्थानीयाध्यापकाश्च स्वकीयशोधपत्रवाचनेन गोष्ठीमिमां सफलामकुर्वन्।

प रि स र वा र्ताः

## गङ्गानाथझापरिसरवार्ता:



कार्यक्रमे भाषमाण: प्रो. गिरिः

**त्रिदिवसीयः संस्कृतदिवससमारोहः आयोजितः** - राष्ट्रियसंस्कृतसंस्थानस्य (मानितविश्वविद्यालयस्य) प्रयागस्थे गङ्गानाथझापरिसरे त्रिदिवसीयः (२२-२४.०८.२०१३) संस्कृतदिवससमारोहः आयोजितः। तत्र च प्रथमे दिवसे २२.०८.२०१३तमे दिनाङ्के गुरुवासरे परिसरस्य गङ्गासभागारे समारोहस्यास्य शुभोद्घाटनं सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्य पूर्वकुलपतिना प्रसिद्धसाहित्यकारेण प्रो. राजेन्द्रमिश्रेण कृतम्। स्वकीयाभिभाषणे प्रो. मिश्र-महोदयेनोक्तं यत् राष्ट्रस्य कृते एका एव भाषा अपेक्ष्यते तथा भारतस्य प्रसङ्गे सा भाषा संस्कृतं भवितुमर्हति। तेनोक्तं यत् संस्कृतं विना भारतस्य न वा अतीतमासीत् न वा भविष्यं भविष्यति। यावत् सारस्वतप्रज्ञायाः प्रतिष्ठा न भविष्यति तावत् - राष्ट्रस्योत्थानं न सम्भविष्यति। स्वकीयाध्यक्षीये भाषणे हर्षचरितमुदाहरता प्रसिद्धेन रचनाकारेण प्रो. जगन्नाथ-पाठक-महोदयेनोक्तं यत् प्राचीनकाले स्वयंवरप्रसङ्गेषु राजानः परस्परविचारविनिमयार्थमेकामेव संस्कृतभाषां समाश्रितवन्तः। कार्यक्रमस्यारम्भे स्वकीये स्वागतभाषणे परिसरस्य प्राचार्येण प्रो. सर्वनारायणझामहोदयेन प्रत्यपादि यत् संस्कृतं विश्वभाषा वर्तते। प्राचीनकाले इयं सम्पर्कभाषा आसीत्। एतदवसरे नैके विद्वांसः परिसरसदस्याश्च समुपस्थिताः आसन्।

एतस्मिन् त्रिदिवसीय-संस्कृतदिवस-समारोहे परिसरे श्रीमद्भगवद्गीतापाठस्पर्धा, वादविवादप्रतियोगिता चेत्यादयः (भाषण)-बहुविधाः प्रतियोगिताः आयोजिताः यासु नगरस्य परिसर छात्रैः सहविविध-विद्यालयेभ्यः तथा इलाहाबाद-विश्वविद्यालयाच्च छात्र-छात्राः भागं गृहीतवन्तः। २४.०८.२०१३ तमे दिनाङ्के प्रो. शिवज्युपाध्यायस्याध्यक्षे समायोजिते समापनोत्सवे पूर्वोक्तासु प्रतियोगितासु ये प्रतिभागिनः विजेतारः आसन् ते पुरस्कृताः अभवन्। संस्कृतदिवससमारोहस्य उद्यापननसत्रे पुरस्कारवितरणम्।

**हिन्दीपक्षावसरे स्पर्धा आयोजिता** - प्रयागस्थे गङ्गानाथझा-परिसरे हिन्दीपक्षः (हिन्दीपखवाडा) मानितः। तदभिलक्ष्य २३.०९.२०१३ तमे दिनाङ्के परिसरस्य गङ्गासभागारे 'रामचरितमानस में जनमानस के लिए सन्देश' इति विषयमधिकृत्य हिन्दीलेखन-प्रतियोगिता आयोजिता यत्र परिसरस्य शोधछात्राः भागं गृहीतवन्तः। कार्यालयीय-पुरस्तकालयीयपाण्डुलिपिविभागीय-कर्मचारिणां कृते अति एतदवसरे प्रतियोगिता आयोजिता। योग्याः प्रतिभागिनः परिसरस्य प्राचार्येण पुरस्कृताः।

**गङ्गानाथ-झापरिसरे आयुर्वेद-विषयकं विशिष्टव्याख्यानम्** - ०९.०७.२०१३ तमे दिनांके गङ्गानाथ-झापरिसरे 'वर्तमानपरिप्रेक्ष्य में आयुर्वेद की अनिवार्यता' इति आयुर्वेद-विषयकं विशिष्ट-व्याख्यानं समायोजितम्। मुख्यवक्तृणा हण्डियास्थ-आयुर्वेदिक-राजकीय-स्नातकोत्तरमहाविद्यालयस्य प्राचार्येण आयुर्वेदिकचिकित्साप्रणाल्याः मूलभूतसिद्धान्तानां वैशिष्ट्यं प्रतिपादितम्। कायचिकित्सासन्दर्भे तेन मधुमेहादि-रोगाणां प्राकृतिकोपचारः निर्देशितः। परिसरस्य प्राचार्येण विसिष्टज्योतिर्विदा प्रो. सर्वनारायण-झा-महोदयेन अस्य कार्यक्रमस्याध्यक्षता कृता। कार्यक्रमस्य सञ्चालनं प्रो. जनार्दनपाण्डेयेन तथा धन्यवादज्ञापनञ्च डा. अपराजितामिश्रया विहितम्।

**आचार्य-गङ्गाधरपण्ड-महोदयस्य व्याख्यानमभिनन्दनञ्च** - १०.०९.२०१३ तमे दिनांके पूर्वाह्ने ११.३० वादने प्रयागस्थे गङ्गानाथ-झा-परिसरे श्रीजगन्नाथसंस्कृत-विश्वविद्यालयस्य नवनियुक्त-कुलपतेः प्रो. गङ्गाधरपण्डामहोदयस्य भोजप्रबन्ध-समीक्षा- विषयकं व्याख्यानम् आयोजितम्। वेल्लासेनविरचिते भोजप्रबन्धे तत्कालिकी समाजिकी स्थितिः तथा तदानीन्तनाः विसङ्गतयश्च तेन विविधोदाहरणमाध्यमेन प्रतिपादितः। प्रसङ्गतस्तेन प्राचीनकविकृतं दारिद्र्य-दशावर्णनमपि प्रस्तुतम्। स्वागतभाषणानन्तरं परिसर-प्राचार्येण प्रो. सर्वनारायणझा-महोदयेन नूतनतया कुलपति-पदभार-ग्रहणार्थमयं पण्डामहोदयः परिसरपक्षतः अभिनन्दितः सम्मानितश्च। एतस्य कार्यक्रमस्याध्यक्षता प्रयागस्थप्रसिद्ध-कविना प्रो. जगन्नाथपाठकेन कृतम्। एतदवसरे प्रो. रहसविहारीद्विवेदि-प्रो.आनन्दकुमारश्रीवास्तव-प्रो. चिरञ्जीविशर्मा तथा विविध-विद्यालय-इलाहाबाद-विश्वविद्यालयछात्रैः सह परिसरस्य शोधछात्राः अपि उपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनं प्रो. रामकृष्णपाण्डेयेन तथा धन्यवादज्ञापनञ्च डा. शैलजापाण्डेयया कृतम्।


कार्यक्रमे भाषमाणः प्रो. गङ्गाधरपण्डा

**पाञ्चरात्रागम-विषयकं विशिष्ट-व्याख्यानम् आयोजितम्** - प्रयागस्थे राष्ट्रिय-संस्कृत-संस्थानस्य गङ्गानाथ-झा-परिसरे ११.११.२०१३ तमे दिनाङ्के पाञ्चरात्रागम-विषयकं विशिष्ट-व्याख्यानमायोजितं यत्र राष्ट्रिय-संस्कृत-संस्थानस्य पूर्वप्राचार्येण मूर्धन्यसंस्कृतकविना डा. जगन्नाथपाठकेन अध्यक्ष्यं विहितम्। सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य पूर्वकुलपतिना प्रो. अशोककुमारकालिया-महोदयेन पाञ्चरात्रागम-विषयकं विशिष्ट-व्याख्यानं प्रस्तुतम्। कार्यक्रमस्य प्रारम्भे परिसरस्य प्राचार्येण प्रो. सर्वनारायणझामहोदयेन

समेषामतिथिवक्तृणां स्वागतं विहितम्। कार्यक्रमस्य सञ्चालनं प्रो. जनार्दनपाण्डेयेन तथा धन्यवादज्ञापनञ्च प्रो. विश्वम्भरनाथगिरिणा च कृतम्।

**रससिद्धान्तविषयकं विशिष्टव्याक्यानम् –** राष्ट्रिय-संस्कृत-संस्थानस्य प्रयागस्थे गङ्गानाथ-झा-परिसरे ०१.१०.२०१३ तमे दिनांके अपराह्ने त्रिवादने रससिद्धान्तविषयकं विशिष्टव्याख्यानं समायोजितम्। तत्र चादौ परिसर-प्राचार्येण प्रो. सर्वनारायणझामहोदयेन स्वागतभाषणं प्रस्तुतम्। ततश्च मुख्यवक्तृरूपेण इलाहाबादविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेन प्रो. हरिदत्तशर्म-महोदयेन रसालङ्कारछन्दसामान्तः-सम्बन्धविषकं स्वकीयं व्याख्यानं प्रस्तुतम्। तेन प्रतिपादितं यत् रसालङ्कारछन्दसां समन्वयः विशिष्य भक्तिकाव्येषु स्तोत्रकाव्येषु च द्रष्टुं शक्यते। तेन एतदपि प्रतिपादितं यत् रससिद्धान्तः संस्कृतकाव्यशास्त्रस्य विशिष्टा उपलब्धिः वर्तते। अस्य कार्यक्रमस्याध्यक्षं जबलपुरस्थ-रानीदुर्गावतीविश्वविद्यालयस्य संस्कृतविभागाध्यक्षचरेण प्रो. राहसबिहारीद्विवेदिना निर्वोढम्। कार्यक्रमस्य सञ्चालनं प्रो. विश्वम्भरनाथगिरिणा तथा धन्यवादज्ञापनञ्च अपराजिता मिश्रया कृतम्।

**विशिष्टव्याख्यानद्वयी सम्पन्ना –** राष्ट्रिय-संस्कृत-संस्थानस्य प्रयागस्थे गङ्गानाथ-झा-परिसरे २९.११.२०१३ तमे दिनांके पूर्वाह्ने सार्ध-एकादशवादने विशिष्टव्याख्यानद्वयी सम्पन्ना। तत्र च इलाहाबादविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेन प्रो. हरिदत्तशर्म-महोदयेन उभयोः व्याख्यानयोः अध्यक्षता विहिता। मुख्यवक्तृरूपेण पटना-विश्वविद्यालयस्य पूर्वसंस्कृतविभागाध्यक्षेन प्रो. उमाशङ्करशर्मणा संस्कृतसाहित्येतिहासस्य समस्याः इति विषकं स्वकीयं व्याख्यानं प्रस्तुतम्। महात्मागान्धी काशीविद्यापीठस्य पूर्वसंस्कृत-विभागाध्यक्षेन प्रो. प्रभुनाथद्विवेदिना विशिष्टवक्तृरूपेण पाण्डुलिपयः तासां सम्पादनञ्च इति विषयमधिकृत्य व्याख्यानं प्रस्तुतम्। कार्यक्रमस्य सञ्चालनं प्रो. जनार्दनपाण्डेयेन तथा धन्यवादज्ञापनञ्च अपराजिता मिश्रया कृतम्।



व्याख्यानकार्यक्रमस्य किञ्चन दृश्यम्

**दिनद्वयात्मकः स्थापनादिवस-समारोहः सोल्लासं सम्पन्नः –** प्रयागस्थे राष्ट्रिय-संस्कृत-संस्थानस्य गङ्गानाथ-झा-परिसरे १७.११.२०१३ तमे दिनाङ्के तथा १८.११.२०१३ तमे दिनाङ्के च पुण्यात्मनः प्रातःस्मरणीयस्य सर् गङ्गानाथझामहोदयस्य पावनस्मृतौ-प्रतिष्ठितस्य गङ्गानाथ-झापरिसरस्य एकसप्ततितमः स्थापनादिवस-समारोहः महता समुल्लासेन समायोजितः। तत्र च प्रथमे दिवसे (१७.११.२०१३ तमे दिनाङ्के) त्रिवादने समायोजिते उद्घाटनसत्रे कामेश्वरसिंह-दरभंगा-संस्कृत-विश्वविद्यालयस्य पूर्वधर्मशास्त्रविभागाध्यक्षः (सम्पूर्णानन्दसंस्कृतविद्यालयस्य प्रोफेसर इमेरिटस) वाचस्पतिशर्मत्रिपाठी मुख्यवक्तृरूपेण स्वकीयं धर्मशास्त्रविषयकं व्याख्यानं प्रस्तुतवान्। व्यवहारनिर्णये स्मृतनिरूपितानि प्रमाणानि इति विषयमधिकृत्य तेन साङ्गोपाङ्गं विवेचनं प्रस्तुतम्। व्याख्यानात् पूर्वं परिसरप्राचार्येण प्रो. सर्वनारायणझा-महोदयेन सर्वेषामतिथीनां वाचिकं स्वागतं विहितम्। तदनन्तरं मुख्यातिथिः राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः डा. विनोदकुमारसिंहः विशिष्टमुद्बोधनं प्रस्तुतवान्। तदनु विश्वविद्यालयानुदानायोगस्य निरीक्षणसमितेः माननीयसदस्यरूपेणोपस्थितेषु विशिष्टविद्वत्सु पुणेविश्वविद्यालयात् समागतः प्रो. रवीन्द्र अम्बादासमुलेः, काशी-हिन्दू-विश्वविद्यालयात् समुपस्थितः प्रो. रमेशचन्द्रपण्डा तथा जगन्नाथसंस्कृतविश्वविद्यालयात् समागतः प्रो. नीलकण्ठपतिश्च स्वाशीर्वचनैः कार्यक्रमं सफलीकृतवन्तः। इलाहाबाद उच्चन्यायालयस्य न्यायमूर्तिः श्रीधरणीधरझा अध्यक्षीयमुद्बोधनं प्रस्तुतवान्। कार्यक्रमस्य सञ्चालनं प्रो. बनमाली बिश्वालनेन कृतं तथा धन्यवादज्ञापनञ्च प्रो. विश्वम्भरनाथ गिरि महोदयेन प्रस्तुतम्।

१८.११.२०१३ तमे दिनांके ११.३० वादने समायोजिते स्थापनादिवस-समारोहस्य उद्यापनसत्रे मुख्यवक्तृरूपेण बनारस-हिन्दू-विश्वविद्यालयस्य संस्कृत-विद्याधर्म-विज्ञान-संकायस्य आचार्यः प्रो. कमलेशझा महोदयः कास्मीरशैवदर्शनविषयकं व्याख्यानं प्रस्तुतवान्। परिसरप्राचार्यस्य प्रो. सर्वनारायणझामहोदयस्य वाचिक-स्वागतानन्तरं सः शिवाद्येकादेशतत्त्वावधारणौचत्यमिति विषयमधिकृत्य अत्यन्तं विद्वत्त्वापूर्णं व्याख्यानं प्रस्तुतवान्। तदनु इलाहाबाद-विश्वविद्यालयस्य संस्कृत-विभागाध्यक्षः प्रो. रामकिशोरशास्त्री विशिष्टातिथि-रूपेणोद्बोधितवान्। राष्ट्रिय-संस्कृत-संस्थानस्य कुलपतिः प्रो. ए. पी. सच्चिदानन्दः मुख्यातिथिरूपेणोद्बोधितवान्। इलाहाबाद-उच्च-न्यायालयस्य भूतपूर्व-न्यायमूर्तिः श्रीगिरिधरमालवीयः अध्यक्षीयमुद्बोधनं प्रस्तुतवान्। अस्य सत्रस्य सञ्चालनं प्रो. जनार्दनप्रसादपाण्डेयेन तथा धन्यवादज्ञापनञ्च प्रो. शैलकुमारी मिश्रया विहितम्।

**विश्वविद्यालयानुदानायोगीयमूल्याङ्कनसमितेः निरीक्षणम्-**

१७.११.२०१३ तमे दिनाङ्के तथा १८.११.२०१३ तमे दिनाङ्के च राष्ट्रिय-संस्कृतसंस्थानस्य प्रयागस्थे गङ्गानाथ-झा-परिसरे विश्वविद्यालयानुदानायोगीयमूल्याङ्कनसमितेः निरिक्षणं सञ्जातम्। एतदवसरे विश्वविद्यालयानुदानायोगीयमूल्याङ्कनसमितेः माननीयसदस्याः प्रो. नीलकण्ठपति-महोदयः, प्रो. रमेशचन्द्रपण्डा-महोदयः प्रो. रवीन्द्रअम्बादासमुले महोदयः, तथा अन्ये च परिसरस्य पुस्तकालय-पाण्डुलिपि-विभागसमेतान् सर्वान् विभागान् गतिविधींश्च परिशीलितवन्तः।

परिसरवार्ताः

## एकलव्यपरिसरवार्ता:

**स्वतन्त्रतादिवससमारोह: शिक्षाशास्त्रविभागस्योद्घाटनसमारोहश्च** – अगस्तमासस्य पञ्चदशे दिनाङ्के एकलव्यपरिसरेण स्वकीय: प्रथम: स्वतन्त्रतादिवस: प्रगाढोल्लासेनाभिनवोत्साहेन च समायोज्यत। तस्मिन्नेव महामहिमदिने शिक्षाशास्त्रविभागोऽपि परिसरे समुदघाट्यत। एकस्मिन्नस्मिन् द्विविधहर्षास्पदे कार्यक्रमे मुख्यातिथय: ICFAI विश्वविद्यालयस्य शिक्षाशास्त्रविभागस्य प्रमुख: रङ्गनाथमहोदय: शिक्षाशास्त्रविभागोद्घाटनावसरं सार्थकीकुर्वन् परिसरमुपाकरोत्। कार्यक्रमस्यादौ शिक्षाशास्त्रविभागाध्यक्ष: डॉ. श्रीगोविन्दपाण्डेय: शिक्षाशास्त्रविभागस्य प्रतिवेदनम् अभिसभमुपातिष्ठिपत्। सभाया आध्यक्ष्यं परिसरप्रमुखेन प्रो. के.बी.सुब्बरायुडुमहोदयेन व्यधायि। कार्यक्रमस्यान्ते छात्रै: राष्ट्रभक्तिं विकिरन्ति गीतकानि नृत्यानि चोपस्थाप्य मध्येसभमुपविष्टानां हृदयानि निरायासमपाह्रियन्त।

**संस्कृतसप्ताहकार्यक्रम:** – अगरतलास्थित-राष्ट्रियसंस्कृतसंस्थानस्य एकलव्यपरिसरे ऐषम: संस्कृतसप्ताहोत्सव: अगस्तमासस्य षोडशदिनाङ्काद् (१६.०८.२०१३) आरभ्य: द्वाविंशतिदिनाङ्कं (२२.०८.२०१३) यावद् अत्यन्तवैभवेनाचरित:। अगस्तमासस्य द्वाविंशतिदिनाङ्के (२२.०८.२०१३) एकलव्यपरिसरस्य सम्मेलनकक्षे संस्कृत-सप्ताहोत्सवस्यास्य उद्घाटनकार्यक्रम: समजायत। उद्घाटनकार्यक्रमे मुख्यातिथय: स्वामिविवेकानन्दमहाविद्यालयस्य प्राचार्या: डॉ.निर्मलभद्रमहोदया आसन्। कार्यक्रमस्याध्यक्ष्यं परिसरप्राचार्येण प्रो. के. बी. सुब्बरायुडुमहोदयेन निरूढम्। अस्मिन्नवसरे यत्र मुख्यातिथिना उत्साहवर्धकै: सारगर्भितैश्च शब्दै: पसिरस्य छात्राणां मार्गदर्शनं विहितं, तत्रैव सभाध्यक्षमहोदयेन साम्प्रतिके युगे संस्कृतस्य वैशिष्ट्यं, संस्कृतसाहित्ये सन्निहित-ऐक्यभावश्चेत्यादिविषयानधिकृत्य स्वकीया: छात्रोपकारका: भावा: प्राकाश्यन्त।



संस्कृतसप्ताहस्योद्घाटनसत्रे भाषमाण: डा. पवनकुमार:

कार्यक्रमेऽस्मिन् बहुविधसंस्कृतप्रतियोगिता: छात्राणां मञ्चमानेतुं परिसरे आयोजिता:। तत्र उत्कृष्टं प्रदर्शनं कृतवन्त: छात्रा: पुरस्कारै: अतिथिभि: सभाजिता:। सर्वासु प्रतियोगितासु पुरस्कारभाजानां छात्राणां नामानि एवं सन्ति–

(१) श्लोकोच्चारणप्रतियोगिता – रजनीकान्त:, प्रवीणपाण्डेय:, सङ्कर्षणओझा च।
(२) संस्कृतगीतप्रतियोगिता – राहुल दे, भास्करबैनर्जी, प्रसूनभौमिकश्च।
(३) नृत्यप्रतियोगिता – हीरावाल्मीकि, कवितासिह्ना च।
(४) गीताकण्ठपाठप्रतियोगिता – प्रसूभौमिक:, रजनीकान्त:, शिवशङ्करश्चेति।
(५) निबन्धलेखनप्रतियोगिता – निरञ्जनसाहु:, सस्मिताप्रधान, सोनियाखातून।


निरीक्षणस्य किञ्चन दृश्यम्

**एन.सी.टी.ई. सदस्य निरीक्षणम्**– एन.सी.टी.ई. निरीक्षणदलेन एकलव्यपरिसरस्यान्तर्गत-शिक्षाशास्त्रविभागस्य निरीक्षणम् अस्मिन् वर्षे सितम्बरमास्य सप्तमे, अष्टमे च दिनाङ्के विहितम्। अस्मिन् दले द्वौ सदस्यौ शिक्षाविदौ डॉ. यू. एन. सिंहमहोदय:, डॉ. पूर्वीवैश्यमहोदया च आस्ताम्। परिसरस्य प्राचार्य: प्रो. के. बी. सुब्बरायुडु: तथा शिक्षाशास्त्रविभागाध्यक्ष: डॉ. श्रीगोविन्दपाण्डेय: निरीक्षणसमीत्या सह अपेक्षितवस्तूनां तथा व्यवस्थां च प्रदर्श्य निरीक्षणं सुगमरीत्या सम्पादितवन्तौ। मुख्यालयपक्षत: परिक्षानियन्त्रक: डॉ. गोपीरमणमिश्र अपि निरीक्षणकर्मणि उपस्थाय सहयोगं कृतवान्। परिसरस्य सर्वे अध्यापपका: कर्मचारिणश्च अहर्निशं समयं प्रदाय नूतने परिसरेऽस्मिन् शिक्षाशास्त्रि(B.Ed.)कक्षाया: आरम्भाय पूर्वापेक्षितानां भौतिकवस्तूनां प्रयोगशालादीनां सम्यक् समायोजनं कृतवन्त:। निरीक्षकदलीया: सर्वविधव्यवस्थां दृष्ट्वा अतीव सन्तुष्टा आसन्।

**शिक्षकदिवससमारोह:** – सितम्बरमासस्य पञ्चमे दिनाङ्के परिसरच्छात्रै: शिक्षकदिवस: आयोजित:। कार्यक्रमेऽस्मिन् UGTC महाविद्यालयस्य प्राचार्य: डॉ. मालाकारमहोदय: मुख्यातिथिरूपेण आहूता आसन्। कार्यक्रमस्याध्यक्ष्यं परिसरप्राचार्येण प्रो. के. बी. सुब्बरायुडुमहोदयेन निरूढम्। एतदतिरिक्तं परिसरस्य सर्वेषां विभागानाम् विभागाध्यक्षा:, अध्यापका:, कार्यालय-कर्मचारिणश्चोपस्थिता आसन्। मुख्यातिथिभि: अध्यक्षपादैश्च दीपप्रज्वालनेन कार्यक्रमस्यारम्भ: कृत:। तत: परं परिसरच्छात्रै: पुष्पगुच्छप्रदानेन उपहारादिप्रदानेन च अतिथनां गुरुणाञ्च स्वागतं विहितम्। कार्यक्रमस्यान्ते मुख्यातिथिमहोदयेन स्वकीय-उद्बोधने डॉ. एस. राधाकृष्णनमहोदयस्य जीवनसन्दर्भे विविध-उदाहरणानि प्रदाय परिसरच्छात्राणां मार्गदर्शनं विहितम्। मुख्यातिथिमहोदयेन आधुनिके युगे शिक्षकस्य कर्तव्यबोध: इत्यादिविषयेऽपि छात्राणां मार्गदर्शनं कृतम्। कार्यक्रमस्यान्ते अध्यक्षमहोदयेन स्वकीय-उद्बोधने आदर्शशिक्षकस्य गुणानां जीवनमूल्यानाञ्च विषये सविस्तरं व्याख्यानं प्रस्तुतम्।

**हिन्दीदिवससमारोह: (१३.०९.२०१३)** – सितम्बरमासस्य पूर्वार्धे एकलव्यपरिसरे हिन्दीपखवाडा इत्यस्यायोजनं संस्थानपरिसरे



शिक्षकदिवसावसरस्य किञ्चन दृश्यम्

विहितम्। अस्मिन् क्रमे संस्थानपरिसरे विविधप्रतियोगिताः संस्कृतभाषण–कविताप–निबन्धलेखन–अन्त्याक्षरीप्रभृतयः आयोजिताः। भाषणप्रतियोगितायां विषयः– हिन्दीभाषा एवं भारतीयैकता इत्यासीत्। एतासु प्रतियोगितासु सर्वे छात्राः सोत्साहं भागम् अगृह्णन्। सर्वासु प्रतियोगितासु रजनीकान्तः, प्रवीणपाण्डेयः, राहुल दे, भास्करबैनर्जी, प्रसूनभौमिकः, हीरावाल्मीकि, कवितासिह्वा इत्यादयः छात्राः पुरस्कारं प्राप्तवन्तः।

अस्यैव मासस्य त्रयोदशे दिनाङ्के संस्थानपरिसरे समापनसमारोहः आयोजितः। अस्मिन् समारोहे मुख्यातिथिरूपेण स्वामिविवेकानन्दमहाविद्यालयस्य प्राचार्याः डॉ. निर्मलभद्रमहोदयाः, सारस्वतातिथिरूपेण ओ. एन. जी. सी. केन्द्रियविद्यालयस्य प्रधानाचार्याः श्रीप्रवीणकुमारपाण्डेयमहोदयाः आसन्। समारोहस्याध्यक्षयं परिसरप्राचार्येण प्रो. रंजितकुमारबर्मनमहोदयेनाधारि। एतदतिरिक्तम् अस्मिन् समारोहे परिसरस्य सर्वे अध्यापकाः, कर्मचारिणः छात्राश्च उपस्थिता आसन्। मुख्यातिथिमहोदयाः हिन्दीभाषायाः उत्पत्तिः, वर्तमानकालिकस्थितिः, हिन्दीभाषायाम् ऐक्यभावना चेति विषयान् विशदतया व्यतन्वन्। सारस्वतातिथिना विविधोदाहरणैः हिन्दीभाषायाः महत्त्वमुपापादि। कार्यक्रमस्यास्य संयोजनं शिक्षाशास्त्रविभागाध्यक्षेन डॉ. श्रीगोविन्दपाण्डेयमोदयेन विहितम्।

कार्यक्रमस्यान्ते अतिथयः प्रतियोगितासु विजेतृभ्यः छात्रेभ्यः पुरस्कारान् प्रदाय तेषामुत्साहं समवर्धयन्। राष्ट्रियगानेन मिष्ठान्नावन्टनेन च कार्यक्रमः समाप्तिमगात्।

## पुरीपरिसरस्य गतिविधयः



व्याख्यानमालायां भाषमाणः प्रो. श्रीधरमिश्रः

**व्याकरणविभागे विशिष्टव्याख्यानमाला आयोजिता** – पुरीपरिसरे व्याकरणविभागे ३०.०१.२०१४ दिनाङ्के विशिष्टव्याख्यानमाला आयोजिता। व्याख्यानमालायामस्यां 'स्फोटस्य चिल्लग्नत्वं जगतः शब्दतत्त्वविवर्तत्वञ्च' इति विषये जयपुरपरिसरस्य व्याकरणविभागाचार्यः विशिष्टं व्याख्यानं प्रादात्। अवसरेऽस्मिन् परिसरप्राचार्यः जी. गङ्गन्ना अन्ये प्राध्यापकाः छात्राश्च समुपस्थिताः आसन्।



व्याख्यानमालाकार्यक्रमस्य किञ्चन दृश्यम्

**पण्डितकुलमणिमिश्रस्मृतिव्याख्यानमाला** – परिसरेऽस्मिन् धर्मशास्त्रेविभागे ०४.०३.२०१४ दिनाङ्के पण्डितकुलमणिमिश्रस्मृतिव्याख्यानमाला आयोजिता। व्याख्यानमालायामस्यां श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. गङ्गाधरपण्डा, प्रो. किशोरचन्द्रमहापात्रः, परिसरप्राचार्यः अन्ये च अध्यापकाः स्वाशयं प्रास्तुवन्।



व्याख्यानमालायां भाषमाणः पं. गोविन्दचन्द्रदीक्षितः

**साहित्यविभागे विशिष्टव्याख्यानमाला** – पुरीपरिसरे २५.०२.२०१४ दिनाङ्के साहित्यविभागे विशिष्टव्याख्यानमाला सम्पन्ना, यत्र पण्डितगोविन्दचन्द्रमिश्रः विशिष्टं व्याख्यानं प्रास्तौत्।



व्याख्यानमालायां भाषमाणः डा. उमारमणझाः

**नव्यन्यायविभागे विशिष्टव्याख्यानमाला** – पुरीपरिसरे ३०.०१.२०१४ दिनाङ्के नव्यन्यायविभागे काचित् विशिष्टव्याख्यानमाला आयोजिता। अस्यां व्याख्यानमालायां न्यायशास्त्रस्य वैशिष्ट्यम् इति विषये लखनऊ परिसरस्य प्राचार्यचरः डा. उमारमणझा व्याख्यानं प्रादात्। अवसरेऽस्मिन् परिसरप्राचार्यः, प्राध्यापकाः छात्राश्च उपस्थिताः आसन्।

## गुरुवायूरपरिसरस्य गतिविधयः

**राष्ट्रियसंगोष्ठी समायोजिता** – परिसरस्यास्य साहित्यविभागाध्यक्षाणाम् आचार्याणां पि.सि.मुरलीमाधवन् वर्याणां मार्गदर्शने तद्विभागेन ३०-३१.०७.२०१३ दिनाङ्कयोः 'काव्यलङ्कारशास्त्रयोः कालानुसारी परिणामः' इति शीर्षके राष्ट्रियसंगोष्ठी समायोजिता आसीत्। परिसरप्राचार्यस्य च.लक्ष्मीनारायणशर्मणः अध्यक्षभाषणपुरस्सरं समारब्धे कार्यक्रमेऽस्मिन् आचार्यः पि.वि.रामन् कुट्टी महोदयः कुञ्चिकाभाषणमकरोत्। अत्र आचार्यः एन्.पि.उण्णी मुख्यातिथिः आसीत्। संगोष्ठ्यां केरलराज्यीयविविधसंस्कृतमहाविद्यालयेषु कार्यरताः नैकविद्वांसः शोधपत्राणि समार्पयन्।



संस्कृतसप्ताहकार्यक्रमस्य किञ्चन दृश्यम्

**संस्कृतसप्ताहोत्सवः समनुष्ठितः** – संस्कृतभाषायाः कीर्तिं प्रसारयितुं तथा छात्राणां संस्कृताध्ययने उत्साहं संवर्धयितुं परिसरेणानेन २१.०८.२०१३ दिनाङ्कप्रभृतिः २७.०८.२०१३ पर्यन्तं सप्तदिनव्यापि संस्कृतसप्ताहोत्सवः महता वैभवेन समनुष्ठितः अभवत्। २१.०८.२०१३ प्रातः १०:३० वादने श्रीजगन्नाथविश्वविद्यालयस्य कुलपतिचरेण आचार्येण नीलकण्ठपतिना समुद्घाटितं संस्कृतसप्ताहस्य प्रथमं सत्रं परिसरप्राचार्यस्य च.ल.न.शर्मणः अध्यक्षभाषणेन, तिरुपतिस्थस्य राष्ट्रियसंस्कृतविद्यापीठस्य साहित्याचार्यस्य सत्यनारायणाचार्यस्य विशेषकुञ्चिकाभाषणेन सुसम्पन्नमभवत्। समुद्घाटनसमारोहे एवं अनेके प्राचीनसंस्कृतविद्वदुत्तमाः सभाजिताः अभवन्। गुरुवायूर् परिसरे एव प्राक् शास्त्री द्वितीयवर्षे अधीयाना कुमारी गिफ्टी जोन्सन् नामिका छात्रा 'लिम्का बुक् ओफ् वेल्ड् रेकोर्ड्' तथा 'गिन्नस् बुक् ओफ् वेल्ड् रेकोर्ड्स्' इति द्वौ पुरस्कारौ प्राप्तवती। साऽपि 'प्रतिभा'-नामकपुरस्कारेण प्राचार्येण सभाजिताऽभवत्। सप्तदिनेषु परिसरीयच्छात्राणामेवं तृश्शूर् मण्डलान्तर्गतविविध-छात्राणामनेकविधस्पर्धाः समायोजिताः अभवन्।



संस्कृतसप्ताहे कार्यक्रमं प्रस्तुतिं कुर्वत्यः छात्र्यः

संस्कृतसप्ताहोत्सवः २७.०८.२०१३ दिनाङ्के अपराह्णे समापनसमारोहेण समाप्तिं गतः। समापनोत्सवे आचार्याः एन्.पि.उण्णी अध्यक्षः आसीत्। एवं कर्नाटकसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः मल्लेपुरम् वेङ्कटेशः मुख्यातिथिः आसीत्। परिसरीयसाहित्यविभागाध्यक्षः पि.सि.मुरलीमाधवन् संस्कृतसप्ताहोत्सवस्य संयोजकः आसीत्।

**'हिन्दी पखवाडा' उत्सवः समनुष्ठितः** – सेप्टम्बर्मासे मानवसंसाधनविकास-मन्त्रालयस्य निर्देशानुगुणं परिसरेणानेन १९.०९.२०१३ प्रभृति २७.०९.२०१३ दिनाङ्कपर्यन्तं 'हिन्दी पखवाडा' उत्सवः समनुष्ठितः अभवत्। एषु दिनेषु परिसरस्यास्य अध्यापकानध्यापकेभ्यश्च हिन्दीभाषायां नैकस्पर्धाः समायोजताः। २७.०९.२०१३ दिनाङ्के सम्पन्ने समापनसमारोहे श्रीमती नवजोत खोशा IAS (असिस्टन्ट् कलक्टर् तृश्शूर्) मुख्यातिथिः भूत्वा स्पर्धासु विजेतॄणां पुरस्कारान् प्रादात्। एवं तृश्शूर् दूरदर्शनकेन्द्रस्य निदेशकः सि.के.थामस् सम्माननीयातिथिः अभवत्। परिसरप्राचार्यस्याध्यक्षे संप्रवृत्तकार्यक्रमं हिन्दीभाषाध्यापिका श्रीमती रम्या पि.आर्. सञ्चालितवती।

**राष्ट्रियसंगोष्ठी** – २३.०९.२०१३ तथा २४.०९.२०१३ दिनाङ्कयोः परिसरीयव्याकरणविभागेन 'धात्वर्थनिर्णयः' इति शीर्षक राष्ट्रियसंगोष्ठी सञ्चालिता। २३.०९.२०१३ दिनाङ्के परिसरीयव्याकरणविभागाध्यक्षस्य प्रो. वि.के.शैलजामहाभागस्य स्वागतभाषणपुरस्सरं समारब्धे प्रथमसत्रे पुरीस्थसदाशिवपरिसरस्य व्याकरणविभागे आचार्यः हरेकृष्णमहापात्रः 'रक्षोहागमलघ्वसन्देहाः' इति शीर्षके विशिष्टव्याख्यानमकरोत्। दिनद्वयेऽत्र भारतदेशस्य विविधस्थानेभ्यः विद्वांसः समागत्य शोधपत्राणि समर्पितवन्तः।

**'मलयालभाषा'दिनोत्सवः समाचरितः** – ०१.११.२०१३ दिनाङ्के 'मलयालभाषा'दिनोत्सवः समाचरितः। कोडालीसर्वकारप्राथमिकविद्यालयस्य निवृत्तप्रधानाध्यापकः राष्ट्रपतिसम्मानितो विद्वान् चात्र ए.वै.मोहन् दास् मुख्यातिथिः आसीत्। कार्यक्रमेऽस्मिन् शास्त्रीतृतीयवर्षीयः छात्रः भागीष्.वि.बी. स्वकीयकवितां आलापयत्। कार्यक्रममिमं मलयालभाषाध्यापिका डा.जेस्सी सञ्चालितवती।



कार्यक्रमाङ्गतया आयोजितस्पर्धायाः किञ्चन दृश्यम्

**विशिष्टव्याख्यानमाला राष्ट्रियसंगोष्ठी च समायोजिते** – परिसरीयवेदान्त-विभागेन १८.११.२०१३ तथा १९.११.२०१३ दिनाङ्कयोः विशिष्टव्याख्यानमाला राष्ट्रियसंगोष्ठी च समायोजिते। वेदान्तविभागाध्यक्षस्य आचार्यस्य पि.महाबलेश्वरभट्टस्य स्वागतभाषणेन समारब्धं कार्यक्रमं श्री विवेकानन्दविश्ववद्यालयस्य (बेङ्गलूर्) कुलपतिः जी.

परिसरवार्ताः

रामचन्द्रभट्टः समुद्घाटयत्। एवं राष्ट्रियसंस्कृतसंस्थानस्य अगरतलास्थ-एकलव्यपरिसरस्य प्राचार्यः के.बि.सुब्बरायुडुः 'विवर्त्तवादः' इति शीर्षके विशिष्टव्याख्यानमकरोत्। तदनु 'भगवद्गीतासु दार्शनिकविचाराः' इति विषये प्रवृत्तराष्ट्रियसङ्गोष्ठ्यां अनेकविदुषां योग्यविचाराः समुपस्थापिताः अभवन्।

**शोधछात्राणां मौखिकपरीक्षाः** – गुरुवायूर्परिसरे अनुसन्धानविभागेन अस्मिन् संवत्सरे चतुर्णां शोधछात्राणां मौखिकपरीक्षाः विविधदिनेषु समायोजिताः अभवन्। यथा–

(१) के.जि.शिमोदवर्यस्य ०४.०१.२०१३ दिनाङ्के, (२) सुशान्तकुमारराया महोदयस्य १५.०३.२०१३ दिनाङ्के, (३) ओ.वि.षिबुवर्यस्य ०१.०८.२०१३ दिनाङ्के, (४) के.के.षैन् वर्यस्य २३.०९.२०१३ दिनाङ्के च।

**व्याकरणकार्यशाला** – व्याकरणशास्त्रे व्युत्पत्तिं सम्पादयितुं परिसरीयछात्रेभ्यः 'व्याकरणकार्यशाला' इति नाम्ना परिसरीयव्याकरणविभागेन २५.११.०१३ तः ०६.१२.२०१३ यावत् समायोजिता आसीत्। डा.नन्दकिशोर्तिवारी (सहायकाचार्यः व्याकरणविभागः) अस्याः कार्यशालायाः सञ्चालकः आसीत्। प्रतिदिनं प्रातः काले नववादनतः दशवादनपर्यन्तं तथा सायं ३:३० तः ४:३० तः प्रवृत्तासु कक्षासु व्याकरणविभागीयाध्यापकाः सर्वे अपाठयन्। कार्यशालायां प्राक् शास्त्री तथा शास्त्री कक्षासु अधीयानाः छात्राः तथा शोधछात्राः एवं केचन अधायापकाः इत्येवं आहत्य ७५ जनाः भागमगृह्णन्। भागग्राहिभ्यः प्रमाणपत्रं प्रदत्तमासीत्।

**नेट्/जे.आर्.एफ्. प्रशिक्षणकार्यक्रमः** – यु.जि.सि.नेट्/जे.आर्.एफ्. परीक्षासु तच्छात्राणां क्लेशपरिहाराय गुरुवायूर् परिसरेण प्रतिवर्षमिव अस्मिन्नपि संवत्सरे नेट्/जे.आर्.एफ्. प्रशिक्षणकार्यक्रमः २५.११.२०१३ तः ०८.१२.२०१३ पर्यन्तं सञ्चालितः आसीत्। डा.एस्.वि. आर्.मूर्ति महोदयाः आधुनिकविषयविभागाध्यक्षाः प्रशिक्षणकार्यक्रमं समायोजयन्। २५.११.२०१३ दिनाङ्के प्रवृत्ते समुद्घाटनसत्रे डा.सि.गिरिः कुलसचिवः, IIPA नवदेहली, प्रशिक्षणकार्यक्रमं समुद्घाट्य अनुसन्धानपद्धतिः इति विषये छात्रान् समबोधयत्। प्रतिदिनं सायं ३:४५ तः ४:४५ पर्यन्तं प्रवृत्तकक्षासु अनेके विद्वांसः भागग्राहिणः २५ छात्रान् अपाठयन्।

**व्यक्तित्त्वविकासकार्यक्रमः सञ्चालितः** – परिसरीयराष्ट्रियसेवायोजना (NSS) पक्षतः ०२.१२.२०१३ दिनाङ्के परिसरे व्यक्तित्त्व-विकासकार्यक्रमः सञ्चालितः। तस्मिन् कार्यक्रमे श्रीविनोदः Bulwark international संस्थायाः अधिकारी छात्रेभ्यः व्यक्तित्वविकासोपायान् प्राबोधयत्। डा.पि.इन्दिरा सहाचार्या साहित्यविभागस्य तथा NSS परिसरीयसंयोजिका स्वागतभाषणपुरस्सरं कार्यक्रमं समचालयताम्।

**प्रवचनं रक्तदानकार्यक्रमश्च** – २६.११.२०१३ दिनाङ्के स्वामीविवेकानन्दस्य आदर्शान् प्रवचनमाध्यमेन रामकृष्णमठीयाध्यापकाः प्राकटयन्। ०५.१२.२०१३ दिनाङ्के परीसरीयछात्राः अमला चिकित्सालये रक्तदानम् अकुर्वन्।

## श्रीशङ्करशिक्षायतने पं. मोतीलालशास्त्रि-स्मारकव्याख्यानं सम्पन्नम्

२८.०८.२०१३ तमे दिनाङ्के इण्डिया इन्टर नेशनल सेन्टर इत्यत्र श्रीशङ्करशिक्षायतनस्य तत्त्वावधाने पं मोतीलालशास्त्रिस्मारकं व्याख्यानद्वयं सम्पन्नम्। अस्मिन्नवसरे काशीहिन्दूविश्वविद्यालयस्य आचार्येण डा. हृदयरञ्जनशर्मणा शतपथब्राह्मणस्य विज्ञानभाष्ये पण्डितमोतीलालशास्त्रिणा प्रतिपादितां वेदव्याख्यानपद्धतिमलम्ब्य अभिभाषितम्। तेनोक्तम् यत् विश्वस्य वैज्ञानिकैः अद्यावधिः यद् विज्ञातम् तत् केवलं पादमात्रं वर्तते। त्रिपादात्मकं (७५ प्रतिशतं) तु अद्यापि ज्ञेयत्वेन अवतिष्ठते।

राष्ट्रपतिसम्मानप्रमाणपत्रसभाजितेन किञ्च पद्मश्रीसम्मानितेन अर्वाचीनसंस्कृतपत्रिकायाः प्रधानसम्पादकेन आचार्येण रमाकान्तशुक्लेन पं. मधुसूदनओझाविरचितस्य छन्दःसमीक्षाख्यस्य ग्रन्थस्य विश्लेषणं कृतम्। तेनोक्तम् यत् ओझामहाभागैः अस्मिन् ग्रन्थे वर्णगणानां मात्रागणानां काचिद् अभिनवैव उद्भावना कृताऽस्ति यामनुसृत्य स्वल्पैरेव अक्षरैः सर्वेषामपि वृत्तानां लक्षणानि प्रस्तोतुं शक्यन्ते।

कार्यक्रमस्य अध्यक्षतां कुर्वाणेन जयपुरस्थ-जगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालयस्य आचार्येण पं. अनन्तशर्मणा पं. मधुसूदनओझामहाभागानां पं. मोतीलालशास्त्रिणाम् अथ च श्रीशङ्करशिक्षायतनस्य संस्थापकानां विश्रुतसम्पादकानामथ च पं. मोतीलालशास्त्रिणां शिष्यभूतानां पं. ऋषिकुमारमिश्राणां पुण्यस्मरणं कृतं किञ्च पुराणवेदस्य, श्रीशङ्करशिक्षायतनस्य वेदविज्ञानविद्यायाः च विस्तरशः परिचयः प्रदत्तः।

श्रीशङ्करशिक्षायतनस्य सचिवेन श्रीमता आनन्दबोर्डियामहाभागेन त्रयाणामपि वक्तृणां अतिथीनां श्रोतृणां च कृते धन्यवादज्ञापनं कृतम्। अस्मिन् अवसरे देशस्य विभिन्नेभ्यः विश्वविद्यालयेभ्यः किञ्च शिक्षासंस्थानेभ्यः अनेके विद्वांसः शोधकर्त्तारः, छात्राश्च उपस्थिताः आसन्। स्मरणीयं विद्यते यत् श्रीशङ्करशिक्षायतनस्य संस्थापकस्य पं. ऋषिकुमारमिश्रस्य जन्मतिथिं (२८ सितम्बर) उपलक्ष्य प्रतिवर्षं व्याख्यानगोष्ठी समायोज्यते इति।

# वृत्तदर्पणे संस्थानम्



# राष्ट्रियसंस्कृतसंस्थानम्

(राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए-श्रेण्यां' प्रत्यायितः,
भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

# मुक्तस्वाध्यायपीठम्

## दूरस्थशिक्षाविधिना उपाधिपाठ्यक्रमाः प्रमाणपत्रीयपाठ्यक्रमाश्च
(Institute of Distance Education)

**प्राक्शास्त्री (+2)** अवधिः- वर्षद्वयम्। अर्हता- ससंस्कृतं दशमकक्षोत्तीर्णता तत्समकक्षोत्तीर्णता वा।

**सेतुपाठ्यक्रमः (संस्कृतावतरणी)** (प्राक्शास्त्रिप्रवेशाय) अवधिः- 6 मासाः। अर्हता- विना संस्कृतं दशमकक्षोत्तीर्णता।

**शास्त्री (बी.ए.)** (व्याकरणे साहित्ये फलितज्यौतिषे) अवधिः- वर्षत्रयम्। अर्हता- प्राक्शास्त्री/ तत्समकक्षोत्तीर्णता।

**सेतुपाठ्यक्रमः (संस्कृतावगाहनी)** (शास्त्रिप्रवेशाय) अवधिः- एकवर्षम्। अर्हता- विना संस्कृतं द्वादशकक्षोत्तीर्णता

**आचार्यः (एम्.ए.)** (व्याकरणे साहित्ये फलितज्योतिषे) अवधिः-वर्षद्वयम्। अर्हता- स्नातककक्षोत्तीर्णता तत्समकक्षोत्तीर्णता वा।

**सेतुपाठ्यक्रमः (शास्त्रावगाहनी)** (आचार्यप्रवेशाय) अवधिः-एकवर्षम्। अर्हता- त्रिवर्षीयस्नातककक्षोत्तीर्णता तत्समकक्षोत्तीर्णता वा।

## नूतनाः प्रमाणपत्रीयपाठ्यक्रमाः

**संस्कृतपत्रकारिताप्रमाणपत्रीयपाठ्यक्रमः** - अवधिः- 6 मासाः। शुल्कम्-1000/-। अर्हता- बी.ए./तत्समकक्षोत्तीर्णता।

**पालिप्रमाणपत्रीयपाठ्यक्रमः** - अवधिः- 6 मासाः। शुल्कम्-1000/-। अर्हता- बी.ए./तत्समकक्षोत्तीर्णता।

**प्राकृतप्रमाणपत्रीयपाठ्यक्रमः** - अवधिः- 6 मासाः। शुल्कम्-1000/-। अर्हता- बी.ए./तत्समकक्षोत्तीर्णता।

**पालिपरिचयपाठ्यक्रमः** - अवधिः- 3 मासाः। शुल्कम्-500/-। अर्हता- दशमकक्षा/तत्समकक्षोत्तीर्णता।

**प्राकृतपरिचयपाठ्यक्रमः** - अवधिः- 3 मासाः। शुल्कम्-500/-। अर्हता- दशमकक्षा/तत्समकक्षोत्तीर्णता।

**विशेषाकर्षणम्**

**आचार्यप्रवेशपरीक्षा, दिनाङ्कः - 24.08.2014, रविवासरः 11.00 वादने**

- आवेदनपत्रस्य विवरणिकायाः च शुल्कम् – साक्षात् ` 300/-, (अ.जा./अ.ज.जा./विक.- ` 250/-) पत्रालयमाध्यमेन ` 350/-, (अ.जा./अ.ज.जा./ विक.- ` 300/-)।
- प्रपूरितावेदनपत्रं समर्पयितुम् अवधिः – विना विलम्बशुल्कम् 04-08-2014। शतस्य रूप्यकाणां (` 100/-) विलम्बशुल्कसहितम् – 14-08-2014।

**देहली-इलाहाबाद-पुरी-जम्मू-गुरुवायूरु-जयपुर-लखनऊ-शृङ्गेरी-बलाहार-भोपाल-मुम्बईपरिसरस्वाध्यायकेन्द्रेभ्यः इमे पाठ्यक्रमाः कर्तुं शक्यन्ते।**

**सङ्केतः**

**मुक्तस्वाध्यायपीठम्**

राष्ट्रियसंस्कृतसंस्थानम्, ५६-५७, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-११० ०५८

दूरवाणी - ०११-२८५२३६११

**e-mail** - mspeetham@gmail.com, mspeetham@yahoo.co.in

website : www.sanskrit.nic.in/msp

Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.VI Issue Nos.21-24 Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007